# Gospel of St. John in Sanskrit

In April 2008, I bought a very precious old translation of the New Testament from Greek into Sanskrit, published as second edition in the year 1851. It seems to be the translation made by **William Carey** and Bengali Sanskritists in 1808:

The New Testament
of our Lord and Saviour Jesus Christ
in Sanscrit.
Translated from the Greek
by the Calcutta Baptist Missionaries
with native assistants.
Calcutta 1851
Second Edition

Dharmya-pustakasya śeṣāṃśaḥ
arthataḥ
prabhunā yīśu-khrīṣṭena nirūpitasya
nūtana-dharmya-niyamasya
grantha-saṃgrahaḥ

In 2008, Mihail Bayaryn re-typeset all 28 chapters of the **Gospel of St. Matthew**, and the result of his work was presented in http://www.sanskritweb.net/sansdocs/matthew.pdf. This file was typeset using the font Alpa 99. See http://www.sanskritweb.net/itrans.

In 2012, Mihail Bayaryn re-typeset all 21 chapters of the **Gospel of St. John**, and the result of his work is presented in this new file http://www.sanskritweb.net/sansdocs/john.pdf. This file was typeset using Mihail Bayaryn's own Devanagari font Siddhanta. See website http://www.sanskritweb.net/cakram/index.html.

For facsimile scans of these Gospels in Sanskrit see http://www.sanskritweb.net/sansdocs. For this St. John's Gospel see file http://www.sanskritweb.net/sansdocs/john-facsimile.pdf.

Ulrich Stiehl, Heidelberg, June 2012

This small file **John-skt.pdf** contains the Sanskrit text only, while the large file **John.pdf** contains the Sanskrit text accompanied by translations into English, German, and Latin. This small file is typeset using the tiny Alpa classic typeface with compact 8-bit encoding.

http://www.sanskritweb.net/sansdocs/#BIBLE

१-१ आदौ वाद आसीत्। स च वाद ईश्वरेण सार्धमासीत्। स वादः स्वयमीश्वर एव।

1-1 ādau vāda āsīt | sa ca vāda īśvareṇa sārdham_āsīt | sa vādaḥ svayam īśvara eva |

१-२ स आदावीश्वरेण सहासीत्

1-2 sa ādāv_īśvareṇa sahāsīt

१-३ तेन सर्वं वस्तु ससृजे। सृष्टवस्तुषु किमपि वस्तु तेनासृष्टं नास्ति

1-3 tena sarvaṃ vastu sasṛje | sṛṣṭa-vastuṣu kim_api vastu tenāsṛṣṭaṃ nāsti

१-४ स जीवनस्याकारः। तच्च जीवनं मनुष्याणां ज्योतिः।

1-4 sa jīvanasyākāraḥ | tac_ca jīvanaṃ manuṣyāṇāṃ jyotiḥ |

१-५ तज्ज्योतिरन्धकारे प्रचकाशे किंत्वन्धकारस्तन्न जग्राह।

1-5 taj_jyotir_andha-kāre pra-cakāśe kiṃ_tv_andha-kāras tan_na jagrāha |

१-६ योहन्नामक एको मनुज ईश्वरेण प्रेषयांचक्रे।

1-6 yohan_nāmaka eko manu-ja īśvareṇa preṣayāṃ_cakre |

१-७ तद्द्वारा यथा सर्वे विश्वसन्ति तदर्थं स तज्ज्योतिषि प्रमाणं दातुं साक्षिस्वरूपो भूत्वागमत्

1-7 tad-dvārā yathā sarve vi-śvasanti tad-arthaṃ sa taj-jyotiṣi pra-māṇaṃ dātuṃ sākṣi-svarūpo bhūtvāgamat

१-८ स स्वयं तज्ज्योतिर्न। किंतु तज्ज्योतिषि प्रमाणं दातुमागमत्।

1-8 sa svayaṃ taj_jyotir_na | kiṃ_tu taj_jyotiṣi pra-māṇaṃ dātum ā-gamat |

१-९ जगत्यागत्य यः सर्वमनुजेभ्यो दीप्तिं ददाति तदेव सत्यज्योतिः।

1-9 jagaty_ā-gatya yaḥ sarva-manu-jebhyo dīptiṃ dadāti tad_eva satya-jyotiḥ |

१-१० स यज्जगदसृजत्तन्मध्य एव स आसीत्। किंतु जगतो लोकास्तं नाजानन्

1-10 sa yaj_jagad_asṛjat tan-madhya eva sa āsīt | kiṃ_tu jagato lokās_taṃ nājānan

१-११ निजाधिकारं स आगच्छत्। किंतु प्रजास्तं नागृह्णन्।

1-11 ni-jādhi-kāraṃ sa ā-gacchat | kiṃ_tu pra-jās_taṃ nāgṛhṇan |

१-१२ तथापि ये ये तमगृह्णन्। अर्थात्तस्य नाम्नि व्यश्वसन्तेभ्य ईश्वरस्य पुत्रा भवितुमधिकारमददात्।

1-12 tathāpi ye ye tam_agṛhṇan | arthāt_tasya nāmni vy-aśvasan tebhya īśvarasya putrā bhavitum adhi-kāram adadāt |

१-१३ तेषां जनिः शोणितान्न शारीरिकाभिलाषान्न मानवानामिच्छातो न किंत्वीश्वरादभवत्।

1-13 teṣāṃ janiḥ śoṇitān_na śārīrikābhilāṣān_na mānavānām icchāto na kiṃ_tv_īśvarād_abhavat |

१-१४ स वादो मनुष्यरूपेणावतीर्य सत्यतानुग्रहभ्यां परिपूर्णः सन्सार्धमस्माभिर्न्यवसत्ततः पितुरद्वितीयपुत्रस्य योग्यो यो महिमा तं महिमानं तस्यापश्याम।

1-14 sa vādo manuṣya-rūpeṇāva-tīrya satyatānu-grahabhyāṃ pari-pūrṇaḥ san sārdham asmābhir_ny-avasat tataḥ pitur_a-dvitīya-putrasya yogyo yo mahimā taṃ mahimānaṃ tasyāpaśyāma |

१-१५ ततो योहनपि प्रचार्य साक्ष्यमिदं दत्तवान्यो मम पश्चादागमिष्यति स मत्तो गुरुतरः। यतो मत्पूर्वं स विद्यमान आसीत्। यदर्थमहं साक्ष्यमिदमदां स एषः।

1-15 tato yohan_api pra-cārya sākṣyam_idaṃ dattavān yo mama paścād ā-gamiṣyati sa matto gurutaraḥ | yato mat-pūrvaṃ sa vidyamāna āsīt | yad-artham ahaṃ sākṣyam_idam adāṃ sa eṣaḥ |

१-१६ अपरं च तस्य पूर्णताया वयं सर्वे क्रमशः क्रमशो ऽनुग्रहं प्राप्ताः।

1-16 a-paraṃ ca tasya pūrṇatāyā vayaṃ sarve kramaśaḥ kramaśo 'nu-grahaṃ prāptāḥ |

१-१७ मूसाद्वारा व्यवस्था दत्ता किंत्वनुग्रहः सत्यत्वं च यीशुख्रीष्टद्वारा समुपातिष्ठताम्।

1-17 mūsā-dvārā vy-ava-sthā dattā kiṃ_tv_anu-grahaḥ satyatvaṃ ca yīśu-khrīṣṭa-dvārā sam-upātiṣṭhatām |

१-१८ कोऽपि मनुज ईश्वरं कदापि नापश्यत्किंतु पितुः क्रोडस्यो ऽद्वितीयः पुत्रस्तं प्राकाशयत्।

1-18 ko'pi manu-ja īśvaram kadāpi nāpaśyat kiṃ_tu pituḥ kroḍasyo 'dvitīyaḥ putras_taṃ prākāśayat |

१-१९ त्वं कः इति वाक्यं प्रष्टुं यदा यिहूदीयलोका याज्कान्लेविलोकांश्च यिरूशालमो योहनः समीपे प्रेषयामासुः।

1-19 tvaṃ kaḥ? iti vākyaṃ praṣṭuṃ yadā yihūdīya-lokā yājkān levi-lokāṃś_ca yirūśālamo yohanaḥ sam-īpe preṣayām_āsuḥ |

१-२० तदा स स्वीकृतवान्नापह्नुतवान्नाहमभिषिक्त इत्यङ्गीकृतवान्।

1-20 tadā sa svī-kṛtavān nāpahnutavān nāham abhi-ṣikta ity_aṅgī-kṛtavān |

१-२१ तदा ते ऽपृच्छन्तर्हि को भवान् किमेलियः सोऽवदन्न। ततस्तेऽपृच्छन्तर्हि भवान्स भविष्यद्वादी सोऽवदन्नाहं सः।

1-21 tadā te 'pṛcchan tarhi ko bhavān? kim eliyaḥ? so'vadat na | tatas_te'pṛcchan tarhi bhavān sa bhaviṣyad-vādī? so'vadat nāhaṃ saḥ |

१-२२ तदा तेऽपृच्छन्। तर्हि भवान्कः वयं गत्वा प्रेरकान्त्वयि किं वक्ष्यामः स्वस्मिन्किं वदसि

1-22 tadā te'pṛcchan | tarhi bhavān kaḥ? vayaṃ gatvā prerakān tvayi kiṃ vakṣyāmaḥ? svasmin kiṃ vadasi?

१-२३ तदा सोऽवदत्। परमेशस्य पन्थानं परिष्कुरुत सर्वतः। इतीदं प्रान्तरे वाक्यं वदतः कस्यचिद्रवः। कथामिमां यस्मिन्यिशयियो भविष्यद्वादी लिखितवान्सोऽहम्।

1-23 tadā so'vadat | parameśasya panthānaṃ pariṣ-kuruta sarvataḥ | itīdaṃ prāntare vākyaṃ vadataḥ kasya_cid_ravaḥ | kathām_imāṃ yasmin yiśayiyo bhaviṣyad-vādī likhitavān so'ham |

१-२४ ये प्रेषितास्ते फिरूशिलोकाः।

1-24 ye preṣitās_te phirūśi-lokāḥ |

१-२५ तदा तेऽपृच्छन्। यदि नाभिषिक्तोऽसि एलियोऽसि न स भविष्यद्वाद्यपि नासि च तर्हि लोकान्मज्जयसि कुतः

1-25 tadā te'pṛcchan | yadi nābhi-ṣikto'si eliyo'si na sa bhaviṣyad-vādy_api nāsi ca tarhi lokān majjayasi kutaḥ?

१-२६ ततो योहन्प्रत्यवोचत्। तोयेऽहं मज्जयामीति सत्यं किंतु यं यूयं न जानीथ तादृश एको जनो युष्माकं मध्य उपतिष्ठति।

1-26 tato yohan praty-avocat | toye'haṃ majjayāmīti satyaṃ kiṃ_tu yaṃ yūyaṃ na jānītha tādṛśa eko jano yuṣmākaṃ madhya upa-tiṣṭhati |

१-२७ स मत्पश्चादागतोऽपि मत्पूर्वं वर्तमान आसीत्तस्य पादुकाबन्धनं मोचयितुमपि नाहं योग्योऽस्मि।

1-27 sa mat-paścād ā-gato'pi mat-pūrvaṃ vartamāna āsīt tasya pādukā-bandhanaṃ mocayitum_api nāhaṃ yogyo'smi |

१-२८ यर्दननद्याः पारस्थवैथवारायां यस्मिन्स्थाने योहनमज्जयत्तस्मिन्स्थाने सर्वमेतदघटत।

1-28 yardana-nadyāḥ pārastha-vaithavārāyāṃ yasmin sthāne yohan amajjayat tasmin sthāne sarvam_etad aghaṭata |

१-२९ परेऽहनि योहन्खनिकटमागच्छन्तं यीशुं विलोक्य प्रावोचत्जगतः पापमोचकमीश्वरस्य मेषशावकं पश्यत।

1-29 pare'hani yohan khanikaṭam ā-gacchantaṃ yīśuṃ vi-lokya prāvocat jagataḥ pāpa-mocakam īśvarasya meṣa-śāvakaṃ paśyata |

१-३० यो मम पश्चादागमिष्यति स मत्तो गुरुतरः। यतो हेतोर्मत्पूर्वं सोऽवर्तत। यस्मिन्नहं कथामिमां कथितवान्स एवायं।

1-30 yo mama paścād ā-gamiṣyati sa matto gurutaraḥ | yato hetor_mat-pūrvaṃ so'vartata | yasmin_nahaṃ kathām_imāṃ kathitavān sa evāyaṃ |

१-३१ अपरम्नाह्हमेनं प्रत्यभिज्ञातवान्। किंतु इस्रायेल्लोका एनं यथा परिचिन्वन्ति तदभिप्राययेणाहं जले मज्जयितुमागच्छम्।

1-31 aparam nāhham_enaṃ praty-abhi-jñātavān | kiṃ_tu isrāyel_lokā enaṃ yathā pari-cinvanti tad-abhi-prāyayeṇāhaṃ jale majjayitum ā-gaccham |

१-३२ पुनश्च योहनपरमेकम्प्रमाणं दत्त्वा कथितवान्। विहायसः कपोतवदवतरन्तमात्मानमस्योपर्यवतिष्ठन्तं च दृष्टवानहम्।

1-32 punaś_ca yohan aparam_ekam pra-māṇaṃ dattvā kathitavān | vi-hāyasaḥ kapotavad ava-tarantam_ātmānam asyopary-ava-tiṣṭhantaṃ ca dṛṣṭavān aham |

१-३३ नाहमेनं प्रत्यभिज्ञातवानिति सत्यं किंतु यो जले मज्जयितुं मां प्रैरयत्स एवेमां कथामकथयत्यस्योपर्यात्मानमवतरन्तमवतिष्ठन्तं च द्रक्ष्यसि स एव पवित्रे आत्मनि मज्जयिष्यति।

1-33 nāham_enaṃ praty-abhi-jñātavān iti satyaṃ kiṃ_tu yo jale majjayituṃ māṃ prairayat sa evemāṃ kathām_akathayat yasyopary_ātmānam ava-tarantam ava-tiṣṭhantaṃ ca drakṣyasi sa eva pavitre ātmani majjayiṣyati |

१-३४ अतस्तन्निरीक्ष्यायमीश्वरस्य तनय इति  प्रमाणं ददामि।

1-34 atas_tan-nir-īkṣyāyam īśvarasya tanaya iti  pra-māṇaṃ dadāmi |

१-३५ परेऽहनि योहन्द्वाभ्यां शिष्याभ्यां सार्धे तिष्ठन्

1-35 pare'hani yohan dvābhyāṃ śiṣyābhyāṃ sārdhe tiṣṭhan

१-३६ यीशुं गच्छन्तं विलोक्य गदितवान्। ईश्वरस्य मेषशावकं पश्यत।

1-36 yīśuṃ gacchantaṃ vi-lokya gaditavān | īśvarasya meṣaśāvakaṃ paśyata |

१-३७ इमां कथां श्रुत्वा द्वौ शिष्यौ यीशोः पश्चादीयतुः।

1-37 imāṃ kathāṃ śrutvā dvau śiṣyau yīśoḥ paścād īyatuḥ |

१-३८ ततो यीशुः परावृत्य तौ पश्चादागच्छन्तौ दृष्ट्वा पृष्टवान्। युवां किं गवेषयथ तावपृच्छतां हे रब्बि अर्थाथे गुरो भवान्कुत्र तिष्ठति

1-38 tato yīśuḥ parā-vṛtya tau paścād ā-gacchantau dṛṣṭvā pṛṣṭavān | yuvāṃ kiṃ gaveṣayatha? tāv_apṛcchatāṃ he rabbi arthāt he guro bhavān kutra tiṣṭhati?

१-३९ ततः सोऽवादीत्। एत्य पश्यतम्। तदा तौ तेन साकं व्रजित्वा तस्य वासस्थानमदर्शताम्। ततो दिवसस्य तृतीयप्रहरस्य गतत्वात्तौ तद्दिनं तस्य सङ्गेऽस्थाताम्।

1-39 tataḥ so'vādīt | etya paśyatam | tadā tau tena sākaṃ vrajitvā tasya vāsa-sthānam adarśatām | tato divasasya tṛtīya-pra-harasya gatatvāt tau tad-dinaṃ tasya saṅge'sthātām |

१-४० यौ द्वौ योहनो वाक्यं श्रुत्वा यीशोः पश्चादगमतां तयोः शिमोन्पितरस्य भ्राता य आन्द्रियः।

1-40 yau dvau yohano vākyaṃ śrutvā yīśoḥ paścād agamatāṃ tayoḥ śimon_pitarasya bhrātā ya āndriyaḥ |

१-४१ स इत्वा प्रथमं निजसोदरं शिमोनं साक्षात्प्राप्य कथितवान्। वयं ख्रीष्टमर्थातभिषिक्तपुरुषं साक्षात्कृतवन्तः।

1-41 sa itvā prathamaṃ ni-ja-sodaraṃ śimonaṃ sākṣāt prāpya kathitavān | vayaṃ khrīṣṭam arthāt abhi-ṣikta-puruṣaṃ sākṣāt kṛtavantaḥ |

१-४२ पश्चात्स तं यीशोः समीपमानयन्। तदा यीशुस्तं दृष्ट्वावदत्। त्वं यूनसः पुत्रः शिमोन्। किंतु त्वन्नामधेयं कैफाः वा पितरः अर्थात्प्रस्तरो भविष्यति।

1-42 paścāt sa taṃ yīśoḥ sam-īpam ānayan | tadā yīśus_taṃ dṛṣṭvāvadat | tvaṃ yūnasaḥ putraḥ śimon | kiṃ_tu tvan_nāma-dheyaṃ kaiphāḥ (vā pitaraḥ) arthāt pra-staro bhaviṣyati |

१-४३ परेऽहनि यीशौ गालीलं गन्तुं निश्चितचेतसि सति फिलिपनामानं जनं साक्षात्प्राप्यावोचत्। मम पश्चादागच्छ।

1-43 pare'hani yīśau gālīlaṃ gantuṃ niś-cita-cetasi sati philipa-nāmānaṃ janaṃ sākṣāt prāpyāvocat | mama paścād ā-gaccha |

१-४४ वैत्सैदानाम्नि यस्मिन्ग्रामे पितरान्द्रिययोर्वास आसीत्।

1-44 vaitsaidā-nāmni yasmin grāme pitarāndriyayor_vāsa āsīt |

१-४५ तस्मिन्ग्रामे तस्य फिलिपस्य वसतिरासीत्। पश्चात्फिलिपो निथनेलं साक्षात्प्राप्यावदत्मूसाव्यवस्थाग्रन्थे भविष्यद्वादिनां ग्रन्थेषु च यस्याख्यानं लिखितमास्ते तं यूषफः पुत्रं नासरतीयं यीशुं साक्षादकार्ष्म वयम्।

1-45 tasmin grāme tasya philipasya vasatir_āsīt | paścāt philipo nithanelaṃ sākṣāt prāpyāvadat mūsā-vy-ava-sthā-granthe bhaviṣyad-vādināṃ grantheṣu ca yasyākhyānaṃ likhitam_āste taṃ yūṣaphaḥ putraṃ nāsaratīyaṃ yīśuṃ sākṣād akārṣma vayam |

१-४६ तदा निथनेल्कथितवान्नासरन्नगरात्किं कश्चिदुत्तम उत्पत्तुं शक्नोति ततः फिलिपोऽवोचतेत्य पश्य।

1-46 tadā nithanel kathitavān nāsaran-nagarāt kiṃ kaś_cid_uttama ut-pattuṃ śaknoti? tataḥ philipo'vocat etya paśya |

१-४७ अपरं च यीशुः स्वस्य समीपं तमागच्छन्तं दृष्ट्वा व्याहृतवान्। पश्यायं निष्कपटः सत्य इस्रायेल्लोकः।

1-47 a-paraṃ ca yīśuḥ svasya sam-īpaṃ tam ā-gacchantaṃ dṛṣṭvā vy-ā-hṛtavān | paśyāyaṃ niṣkapaṭaḥ satya isrāyel-lokaḥ |

१-४८ ततः सोऽवदत्। भवान्मां कथं प्रत्यभिजानाति यीशुरवादीत्। फिलिपस्य आह्वानात्पूर्वं यदा त्वमुडुम्बरस्य तरोर्मूलेऽस्थास्तदा त्वामदर्शम्।

1-48 tataḥ so'vadat | bhavān māṃ kathaṃ praty-abhi-jānāti? yīśur_avādīt | philipasya ā-hvānāt pūrvaṃ yadā tvam_uḍumbarasya taror_mūle'sthās_tadā tvām_adarśam |

१-४९ निथलेमचकथत्। हे गुरो भवान्नितान्तमीश्वरस्य पुत्रोऽसि। भवानिस्रायेल्वंशस्य राजा।

1-49 nithalem acakathat | he guro bhavān ni-tāntam īśvarasya putro'si | bhavān isrāyel-vaṃśasya rājā |

१-५० ततो यीशुर्व्याहरत्। त्वामुडुम्बरस्य पादपस्य मूले दृष्टवानहं ममैतस्माद्वाक्यात्किं त्वं व्यश्वसीः एतस्मादप्याश्चर्याणि कार्याणि द्रक्ष्यसि।

1-50 tato yīśur_vy-āharat | tvām_uḍumbarasya pāda-pasya mūle dṛṣṭavān_ahaṃ mamaitasmād_vākyāt kiṃ tvaṃ vy-aśvasīḥ? etasmād_apy_āścaryāṇi kāryāṇi drakṣyasi |

१-५१ अन्यच्चावादीद्युष्मानहं यथार्थं वदामि। इतः परं मोचिते मेघद्वारे तस्मान्मनुजसूनुना ईश्वरस्य दूतगणमवरोहन्तमारोहन्तं च द्रक्ष्यथ।

1-51 anyac_cāvādīd yuṣmān_ahaṃ yathārthaṃ vadāmi | itaḥ paraṃ mocite megha-dvāre tasmān_manu-ja-sūnunā īśvarasya dūta-gaṇam ava-rohantam ā-rohantaṃ ca drakṣyatha |

२-१ अनन्तरं तृतीयदिवसे गालील्प्रदेशीये कान्नानाम्नि नगरे विवाह आसीत्तत्र च यीशोर्मातातिष्ठत्।

2-1 an-antaraṃ tṛtīya-divase gālīl-pra-deśīye kānnā-nāmni nagare vi-vāha āsīt tatra ca yīśor mātātiṣṭhat |

२-२ तस्मै विवाहाय यीशुस्तस्य शिष्याश्च निमन्त्रिता आसन्।

2-2 tasmai vi-vāhāya yīśus_tasya śiṣyāś_ca ni-mantritā āsan |

२-३ तदनन्तरं द्राक्षारसस्य न्यूनत्वाद्यीशोर्माता तमवदत्। एतेषां द्राक्षारसो नास्ति।

2-3 tad-anantaraṃ drākṣā-rasasya nyūnatvād yīśor_mātā tam_avadat | eteṣāṃ drākṣā-raso nāsti |

२-४ तदा स तामवोचत्। हे नारि मया सह तव किं कार्यम् मम समय इदानीं नोपतिष्ठति।

2-4 tadā sa tām avocat | he nāri mayā saha tava kiṃ kāryam? mama sam-aya idānīṃ nopa-tiṣṭhati |

२-५ ततस्तस्य माता दासानवोचद्। अयं यद्वदति तदेव कुरुत।

2-5 tatas_tasya mātā dāsān avocad | ayaṃ yad_vadati tad_eva kuruta |

२-६ तस्मिन्स्थाने यिहूदीयानां शुचित्वकरणव्यवहारानुसारेणाढकैकजलधराणि पाषाणम्यानि षड्वृहत्पात्राणि आसन्।

2-6 tasmin sthāne yihūdīyānāṃ śucitva-karaṇa-vyavahārānusāreṇāḍhakaika-jaladharāṇi pāṣāṇamyāni ṣaḍ vṛhat-pātrāṇi āsan |

२-७ तदा यीशुस्तान्सर्वकलशाञ्जलैः पूरयितुं तानाज्ञापयत्। ततस्ते सर्वान् कुम्भानाकर्णं जलैः पर्यपूरयन्।

2-7 tadā yīśus tān sarva-kalaśān jalaiḥ pūrayituṃ tān_ājñāpayat | tatas_te sarvān_ kumbhān ā-karṇaṃ jalaiḥ pary-apūrayan |

२-८ अथ तेभ्यः किंचिदुत्तार्य भोज्याधिपतेः समीपं नेतुं स तानादिशत्। ते तदनयत्।

2-8 atha tebhyaḥ kiṃ_cid_ut-tārya bhojyādhi-pateḥ sam-īpaṃ netuṃ sa tān_ādiśat | te tad_anayat |

२-९ अपरं च तज्जलं कथं द्राक्षारसोऽभवत्तज्जलवाहका दासा ज्ञातुं शक्ताः किंतु तद्भोज्याधिपो ज्ञातुं नाशक्नोत्तदवलिह्य वरं सम्बोध्यावदत्।

2-9 a-paraṃ ca taj_jalaṃ kathaṃ drākṣā-raso'bhavat taj-jala-vāhakā dāsā jñātuṃ śaktāḥ kiṃ_tu tad-bhojyādhi-po jñātuṃ nāśaknot tad_ava-lihya varaṃ sam-bodhyāvadat |

२-१० लोकाः प्रथमं उत्तमद्राक्षारसं ददति। तेषु यथेष्टं पीतवत्सु तस्मात्किंचिदनुत्तमं च ददति। किंतु त्वमिदानीं यावतुत्तमद्राक्षारसं स्थापयसि।

2-10 lokāḥ prathamaṃ uttama-drākṣā-rasaṃ dadati | teṣu yatheṣṭaṃ pītavatsu tasmāt kiṃ_cid_an_uttamaṃ ca dadati | kiṃ_tu tvam_idānīṃ yāvat uttama-drākṣā-rasaṃ sthāpayasi |

२-११ इत्थं यीशुर्गालीलप्रदेशे आश्चर्यकर्म प्रारभ्य निजमहिमानम्प्राकाशयत्। ततः शिष्यास्तस्मिन्व्यश्वसन्।

2-11 itthaṃ yīśur_gālīla-pradeśe āścarya-karma prārabhya nija-mahimānam prākāśayat | tataḥ śiṣyās_tasmin vy-aśvasan |

२-१२ ततः परं स निजमातृभ्रातृशिष्यैः सार्धं कफर्नाहूममगमत्। किंतु तत्र बहुदिनानि नातिष्ठत्।

2-12 tataḥ paraṃ sa nija-mātṛ-bhrātṛ--śiṣyaiḥ sārdhaṃ kapharnāhūmam agamat | kiṃ_tu tatra bahu-dināni nātiṣṭhat |

२-१३ तदनन्तरं यिहूदीयानां निस्तारोत्सवे निकटमागते यीशुर्यिरूशालम्नगरमगच्छत्।

2-13 tad-anantaraṃ yihūdīyānāṃ nistārotsave nikaṭam_ā-gate yīśur_yirūśālam-nagaram agacchat |

२-१४ ततो मन्दिरस्य मध्ये गोमेषपारावतविक्रयिणो वाणिजश्चोपविष्टान्विलोक्य

2-14 tato mandirasya madhye go-meṣa-pārāvata-vikrayiṇo vāṇijaś_copa-viṣṭān vi-lokya

२-१५ रज्जुभिः कशां निर्माय सर्वगोमेषादिभिः सार्धं तान्मन्दिराद्दूरीकृतवान्।

2-15 rajjubhiḥ kaśāṃ nir-māya sarva-go-meṣādibhiḥ sārdhaṃ tān mandirād dūrīkṛtavān |

२-१६ वणिजां मुद्रादि विकीर्य आसनानि न्युब्जीकृत्य पारावतविक्रयिभ्योऽकथयद्। अस्मात्स्थानात्सर्वाण्येतानि नयत। मम पितुर्गृहं वाणिज्यगृहं मा कार्ष्ट।

2-16 vaṇijāṃ mudrādi vi-kīrya āsanāni nyubjī-kṛtya pārāvata-vikrayibhyo'kathayad | asmāt sthānāt sarvāṇy_etāni nayata | mama pitur_gṛhaṃ vāṇijya-gṛhaṃ mā kārṣṭa |

२-१७ तस्मात्। ऽतन्मन्दिरार्थ उद्योगो यस्तु स ग्रसतीव माम्ऽ। इमम्शास्त्रीयलिपिं शिष्याः समस्मरन्।

2-17 tasmāt | 'tan-mandirārtha ud-yogo yas_tu sa grasatīva mām' | imam śāstrīya-lipiṃ śiṣyāḥ sam_asmaran |

२-१८ ततः परं यिहूदीयलोका यीशुमवदन्। त्वमीदृश्कर्मकरणात्किं चिह्नमस्मान्दर्शयसि

2-18 tataḥ paraṃ yihūdīya-lokā yīśum_avadan | tvam_īdṛś-karma-karaṇāt kiṃ cihnam_asmān darśayasi?

२-१९ ततो यीशुस्तानवोचद्युष्माभिरेतस्मिन्मन्दिरे नाशिते दिनत्रयमध्येऽहं तदुत्थापयिष्यामि।

2-19 tato yīśus_tān_avocad yuṣmābhir_etasmin mandire nāśite dina-traya-madhye'haṃ tad ut-thāpayiṣyāmi |

२-२० तदा यिहूदीया व्याहार्षुः। एतस्य मन्दिरस्य निर्माणेन षट्चत्वारिंशद्वत्सरा गताः। त्वं किं दिनत्रयमध्ये तदुत्थापयिष्यसि

2-20 tadā yihūdīyā vy-āhārṣuḥ | etasya mandirasya nir-māṇena ṣaṭ-catvāriṃśad_vatsarā gatāḥ | tvaṃ kiṃ dina-traya-madhye tad ut-thāpayiṣyasi?

२-२१ किंतु स निजदेहरूपमन्दिरे कथामिमां कथितवान्।

2-21 kiṃ_tu sa nija-deha-rūpa-mandire kathām_imāṃ kathitavān |

२-२२ स यदेतादृशं गदितवान्तच्छिष्याः श्मशानात्तदीयोत्थाने सति स्मृत्वा धर्मग्रन्थे यीशुनोक्तकथायां च व्यश्वसिषुः।

2-22 sa yad_etādṛśaṃ gaditavān tac-chiṣyāḥ śmaśānāt tadīyotthāne sati smṛtvā dharma-granthe yīśunokta-kathāyāṃ ca vy-aśvasiṣuḥ |

२-२३ अनन्तरं निस्तारोत्स्वस्य भोज्यसमये यिरूशालम्नगरे तत्कृताश्चर्यकर्माणि विलोक्य बहुभिस्तस्य नामनि विश्वसितम्।

2-23 an-antaraṃ nis-tārotsvasya bhojya-samaye yirūśālam-nagare tat-kṛtāś_carya-karmāṇi vi-lokya bahubhis_tasya nāmani viśvasitam |

२-२४ किंतु स तेषां करेषु स्वं न समर्पयत्यतः स सर्वानवैत्।

2-24 kiṃ_tu sa teṣāṃ kareṣu svaṃ na sam-arpayat yataḥ sa sarvān_avait |

२-२५ स मानवेषु कस्यचित्प्रमाणं नापेक्षत यतो मनुजानां मध्ये यद्यदस्ति तत्तत्सोऽजानात्।

2-25 sa mānaveṣu kasya_cit pra-māṇaṃ nāpekṣata yato manu-jānāṃ madhye yad_yad_asti tat_tat so'jānāt |

३-१ निकदीमनामा यिहूदीयानामधिपतिः फिरूशी क्षणदायां।

3-1 nikadīma-nāmā yihūdīyānām adhi-patiḥ phirūśī kṣaṇa-dāyāṃ ।

३-२ यीशोरभ्यर्णमाव्रज्य व्याहार्षीत्। हे गुरो भवानीश्वरादागत एक उपदेष्टा। एतदस्माभिर्ज्ञायते। यतो भवता यान्याश्चर्यकर्माणि क्रियन्ते परमेश्वरस्य साहाय्यं विना केनापि तत्तत्कर्माणि कर्तुं न शक्यन्ते।

3-2 yīśor_abhy-arṇam ā-vrajya vy-āhārṣīt । he guro bhavān īśvarād ā-gata eka upa-deṣṭā । etad asmābhir_jñāyate । yato bhavatā yāny_āścarya-karmāṇi kriyante parameśvarasya sāhāyyaṃ vinā kenāpi tat_tat_karmāṇi kartuṃ na śakyante ।

३-३ तदा यीशुरुत्तरं दत्तवान्। त्वामहं यथार्थतरं व्याहरामि पुनर्जन्मनि न सति कोऽपि मानव ईश्वरस्य राज्यं द्रष्टुं न शक्नोति।

3-3 tadā yīśur_uttaraṃ dattavān । tvām_ahaṃ yathārthataraṃ vy-ā-harāmi punar-janmani na sati ko'pi mānava īśvarasya rājyaṃ draṣṭuṃ na śaknoti ।

३-४ ततो निकादीमः प्रत्यवोचत्। मनुजो वृद्धो भूत्वा कथं जनिष्ये स किं पुनर्मातुर्जठरं प्रविश्य जनितुं शक्नोति

3-4 tato nikādīmaḥ praty-avocat । manu-jo vṛddho bhūtvā kathaṃ janiṣye? sa kiṃ punar_mātur_jaṭharaṃ pra-viśya janituṃ śaknoti?

३-५ यीशुरवादीद्। यथार्थतरमहं कथयामि मनुजे तोयात्मभ्यां पुनर्न जाते स ईश्वरस्य राज्यं प्रवेष्टुं न शक्नोति।

3-5 yīśur_avādīd । yathārthataram ahaṃ kathayāmi manu-je toyātmabhyāṃ punar_na jāte sa īśvarasya rājyaṃ pra-veṣṭuṃ na śaknoti ।

३-६ मांसाद्यत्जायते तन्मांसमेव तथात्मनो यो जायते स आत्मैव।

3-6 māṃsād yat jāyate tan_māṃsam_eva tathātmano yo jāyate sa ātmaiva ।

३-७ युष्माभिः पुनर्जनितव्यं ममैतस्यां कथायामाश्चर्यं मा मंस्थाः।

3-7 yuṣmābhiḥ punar_janitavyaṃ mamaitasyāṃ kathāyām āścaryaṃ mā maṃsthāḥ ।

३-८ सदागतिर्यां दिशमिच्छति तस्यामेव दिशि वाति। त्वं तस्य स्वनं शृणोषि किंतु स कुत आयाति कुत्र याति वा किमपि न जानासि। तद्वदात्मनः सकाशात्सर्वेषां मनुजानां जन्म भवति।

3-8 sad-āgatir_yāṃ diśam_icchati tasyām_eva diśi vāti । tvaṃ tasya svanaṃ śṛṇoṣi kiṃ-tu sa kuta ā-yāti kutra yāti vā kim_api na jānāsi । tadvad ātmanaḥ sakāśāt sarveṣāṃ manu-jānāṃ janma bhavati ।

३-९ तदा निकदीमः पृष्टवान्। एतत्कथं भवितुं शक्नोति

3-9 tadā nikadīmaḥ pṛṣṭavān । etat kathaṃ bhavituṃ śaknoti?

३-१० यीशुः प्रत्युक्तवान्। त्वमिस्रायेलो गुरुर्भूत्वापि किमेतां कथां न वेत्सि

3-10 yīśuḥ praty-uktavān । tvam_isrāyelo gurur_bhūtvāpi kim_etāṃ kathāṃ na vetsi?

३-११ तुभ्यं यथार्थं कथयामि। वयं यद्विद्मस्तद्वच्मः यं च पश्यामस्तस्यैव साक्ष्यं दद्मः। किंतु युष्माभिरस्माकं साक्षित्वं न गृह्यते।

3-11 tubhyaṃ yathārthaṃ kathayāmi । vayaṃ yad_vidmas_tad_vacmaḥ yaṃ ca paśyāmas_tasyaiva sākṣyaṃ dadmaḥ । kiṃ_tu yuṣmābhir_asmākaṃ sākṣitvaṃ na gṛhyate ।

३-१२ एतस्य संसारस्य कथायां कथितायां यदि यूयं न विश्वसिथ तर्हि स्वर्गीयायां कथायां विश्वसिष्यथ

3-12 etasya saṃ-sārasya kathāyāṃ kathitāyāṃ yadi yūyaṃ na vi-śvasitha tarhi svargīyāyāṃ kathāyāṃ viśvasiṣyatha?

३-१३ यः स्वर्गेऽस्ति यं च स्वर्गादवारोहत्तं मानवतनयं विना कोऽपि स्वर्गं नारोहत्।

3-13 yaḥ svarge'sti yaṃ ca svargād avārohat taṃ mānava-tanayaṃ vinā ko'pi svargaṃ nārohat ।

३-१४ अपरं च सूसा यथा प्रान्तरे सर्पं प्रोत्थापितवान्मनुष्यपुत्रोऽपि तथैवोत्थापितव्यः

3-14 a-paraṃ ca sūsā yathā prāntare sarpaṃ protthāpitavān manuṣya-putro'pi tathaivotthāpitavyaḥ

३-१५ तस्माद्तः कश्चित्तस्मिन्विश्वसिष्यति सोऽविनाश्यः सनन्तायुः प्राप्स्यति।

3-15 tasmād taḥ kaś_cit tasmin vi-śvasiṣyati so'vi-nāśyaḥ san an-antāyuḥ prāpsyati ।

३-१६ ईश्वर इत्थं जगददयत यत्स्वमद्वितीयं तनयं प्राददात्ततो यः कश्चित्तस्मिन्विश्वसिष्यति सोऽविनाश्यः सननन्तायुः प्राप्स्यति।

3-16 īśvara itthaṃ jagad_adayata yat svam_advitīyaṃ tanayaṃ prādadāt tato yaḥ kaś_cit tasmin vi-śvasiṣyati so'vi-nāśyaḥ san an-antāyuḥ prāpsyati |

३-१७ ईश्वरो जगतो लोकान्दण्डयितुं स्वपुत्रं न प्रेष्य तान्परित्रातुं प्रेषितवान्।

3-17 īśvaro jagato lokān daṇḍayituṃ sva-putraṃ na preṣya tān paritrātuṃ preṣitavān |

३-१८ अत एव यः कश्चित्तस्मिन्विश्वसिति स दण्डार्हो न भवति किंतु यः कश्चित्तस्मिन्न विश्वसिति स इदानीमेव दण्डार्हो भवति यतः स ईश्वरस्याद्वितीयपुत्रस्य नामनि प्रत्ययं न करोति।

3-18 ata eva yaḥ kaś_cit tasmin vi-śvasiti sa daṇḍārho na bhavati kiṃ_tu yaḥ kaś_cit tasmin na vi-śvasiti sa idānīm_eva daṇḍārho bhavati yataḥ sa īśvarasyādvitīya-putrasya nāmani praty-ayaṃ na karoti |

३-१९ जगतो मध्ये ज्योतिः प्राकाशत किंतु मनुष्याणां कर्मणां दुष्टत्वात्ते ज्योतिषो।पि तिमिरे प्रीयन्ते एतदेव दण्डस्य कारणं भवति।

3-19 jagato madhye jyotiḥ prākāśata kiṃ_tu manuṣyāṇāṃ karmaṇāṃ duṣṭatvāt te jyotiṣolpi timire prīyante etad_eva daṇḍasya kāraṇaṃ bhavati |

३-२० यः कुकर्म करोति तस्याचारस्य दुष्टत्वात्स ज्योतिर्ऋतीयित्वा तन्निकटं नायाति।

3-20 yaḥ ku-karma karoti tasyā-cārasya duṣṭatvāt sa jyotir_ṛtīyitvā tan_ni-kaṭaṃ nā-yāti |

३-२१ किंतु यः सत्कर्म करोति तस्य सर्वाणि कर्माणीश्वरेण कृतानीति यथा प्रकाशते तदभिप्रायेण स ज्योतिषः सन्निधिमायाति।

3-21 kiṃ_tu yaḥ sat-karma karoti tasya sarvāṇi karmāṇīśvareṇa kṛtānīti yathā prakāśate tad-abhiprāyeṇa sa jyotiṣaḥ san-ni-dhim ā-yāti |

३-२२ ततः परं यीशुः शिष्यैः सार्धं यिहूदीयदेशं गत्वा तत्र स्थित्वा मज्जयितुमारभत।

3-22 tataḥ paraṃ yīśuḥ śiṣyaiḥ sārdhaṃ yihūdīya-deśaṃ gatvā tatra sthitvā majjayitum ā-rabhata |

३-२३ तदा शालम्नगरस्य समीपस्थायिनि ऐनन्ग्रामे हबुतरतोयस्थितेस्तत्र योहनमज्जयत्तथा च लोका आगत्य तेन मज्जिता अभवन्।

3-23 tadā śālam-nagarasya samīpa-sthāyini ainan-grāme habutara-toya-sthites_tatra yohan amajjayat tathā ca lokā ā-gatya tena majjitā abhavan |

३-२४ तदा योहन्कारायां न बद्धः।

3-24 tadā yohan kārāyāṃ na baddhaḥ |

३-२५ अपरं च शाचकर्मणि योहनः शिष्यैः सह यिहूदीयलोकानां विवादे जाते ते योहनः सन्निधिं गत्वाकथयन्।

3-25 a-paraṃ ca śāca-karmaṇi yohanaḥ śiṣyaiḥ saha yihūdīya-lokānāṃ vi-vāde jāte te yohanaḥ san-ni-dhiṃ gatvākathayan |

३-२६ हे गुरो यर्दननद्याः पारे भवता सार्धं य आसीत्यस्मिंश्च भवान्साक्ष्यं प्राददात्पश्यतु सोऽपि मज्जयति सर्वे तस्य समीपं यान्ति च।

3-26 he guro yardana-nadyāḥ pāre bhavatā sārdhaṃ ya āsīt yasmiṃśca bhavān sākṣyaṃ prādadāt paśyatu so'pi majjayati sarve tasya sam-īpaṃ yānti ca |

३-२७ तदा योहन्प्रत्यवोचद्। ईश्वरेण न दत्ते कोऽपि मनुजः किमपि प्राप्तुं न शक्नोति।

3-27 tadā yohan praty-avocad | īśvareṇa na datte ko'pi manu-jaḥ kim_api prāptuṃ na śaknoti |

३-२८ अहमभिषिक्तो न भवामि किंतु तदग्रे प्रोषितोऽस्मि यामिमां कथां कथितवानहं तत्र यूयं सर्वे साक्षिणः स्थ।

3-28 aham abhi-ṣikto na bhavāmi kiṃ_tu tad-agre proṣito'smi yām_imāṃ kathāṃ kathitavān_ahaṃ tatra yūyaṃ sarve sākṣiṇaḥ stha |

३-२९ यो जनः कन्यां लभते स एव वरः किंतु वरस्य संनिधौ दण्डायमानं तस्य यन्मित्रं तेन वरस्य शब्दे श्रुतेऽतीवाह्लाद्यते ममापि तद्वदानन्दिसद्धिर्जाता।

3-29 yo janaḥ kanyāṃ labhate sa eva varaḥ kiṃ_tu varasya saṃ-nidhau daṇḍāyamānaṃ tasya yan_mitraṃ tena varasya śabde śrute'tīvāhlādyate mamāpi tadvad ā-nand-siddhir_jātā |

३-३० तेन क्रमशो वर्द्धितव्यं किंतु मया ह्रसितव्यं।

3-30 tena kramaśo varddhitavyaṃ kiṃ_tu mayā hrasitavyaṃ |

३-३१ य ऊर्ध्वादागच्छत्स सर्वेषां मुख्यो यश्च संसारादुदपद्यत स सांसारिकः संसारीयां कथां च कथयति यस्तु स्वर्गादागच्छत्स सर्वेषां मुख्यः।

3-31 ya ūrdhvād_ā-gacchat sa sarveṣāṃ mukhyo yaś_ca saṃ-sārād ud-apadyata sa sāṃsārikaḥ saṃ-sārīyāṃ kathāṃ ca kathayati yas_tu svargād_āgacchat sa sarveṣāṃ mukhyaḥ |

३-३२ स यदपश्यदशृणोच्च तस्मिन्नेव साक्ष्यं ददाति तथापि प्रायशः कश्चित्तस्य साक्ष्यं न गृह्णाति।

3-32 sa yad_apaśyad aśṛṇoc_ca tasmin_neva sākṣyaṃ dadāti tathāpi prāyaśaḥ kaś_cit tasya sākṣyaṃ na gṛhṇāti |

३-३३ किंतु यो गृह्णाति स ईश्वरस्य सत्यवादित्वं मुद्राङ्कितं करोति।

3-33 kiṃ_tu yo gṛhṇāti sa īśvarasya saty-vāditvaṃ mudrāṅkitaṃ karoti |

३-३४ ईश्वरेण यः प्रेरितः स एव ईश्वरीयकथां कथयति यत ईश्वर आत्मानं तस्मै अपरिमितमददात्।

3-34 īśvareṇa yaḥ preritaḥ sa eva īśvarīya-kathāṃ kathayati yata īśvara ātmānaṃ tasmai a-pari-mitam adadāt |

३-३५ पिता पुत्रे स्नेहं कृत्वा तस्य हस्ते सर्वाणि समर्पितवान्।

3-35 pitā putre snehaṃ kṛtvā tasya haste sarvāṇi samarpitavān |

३-३६ यः कश्चित्पुत्रे विश्वसिति स एवानन्तम्परमायुः प्राप्नोति किंतु यः कश्चित्पुत्रे न विश्वसिति स परमायुषो दर्शनं न प्राप्नोति किंत्वीश्वरस्य कोपभोजनं भूत्वा तिष्ठति।

3-36 yaḥ kaś_cit putre vi-śvasiti sa evānantam paramāyuḥ prāpnoti kiṃ_tu yaḥ kaś_cit putre na vi-śvasiti sa paramāyuṣo darśanaṃ na prāpnoti kiṃ_tv_īśvarasya kopa-bhojanaṃ bhūtvā tiṣṭhati |

४-१ यीशुः स्वयं नामज्जयत्केवलं तस्य शिष्या अमज्जयन्किंतु योहनोऽधिकशिष्यान्स करोति मज्जयति च।

4-1 yīśuḥ svayaṃ nāmajjayat kevalaṃ tasya śiṣyā amajjayan kiṃ_tu yohano'dhikaśiṣyān sa karoti majjayati ca |

४-२ फिरूशिन इमां वर्त्तामशृण्वनिति प्रभुरवगत्य

4-2 phirūśina imāṃ varttām_aśṛṇvan iti pra-bhur_ava-gatya

४-३ यिहूदीयदेशं विहाय पुनर्गालीलमगात्।

4-3 yihūdīya-deśaṃ vi-hāya punar_gālīlam agāt |

४-४ ततः शोमिरोणप्रदेशस्य मध्येन तेन गन्तव्ये सति

4-4 tataḥ śomiroṇa-pra-deśasya madhyena tena gantavye sati

४-५ याकूब्निजपुत्राय यूषफे यां भूमिमददात्तत्समीपस्थायिशोमिरप्रदेशस्य सुखार्नाम्ना विख्यातस्य नगरस्य संनिधावुपास्थात्।

4-5 yākūb nija-putrāya yūṣaphe yāṃ bhūmim adadāt tat-samīpa-sthāyi-śomira-pradeśasya sukhār-nāmnā vi-khyātasya nagarasya saṃ-ni-dhāv_upāsthāt |

४-६ तत्र याकूबः प्रहिरासीत्। तदा द्वितीययामवेलायाम्जातायां स मार्गे श्रमापन्नस्तस्य प्रहेः पार्श्व उपाविशत्।

4-6 tatra yākūbaḥ prahirāsīt | tadā dvitīya-yāma-velāyām jātāyāṃ sa mārge śramāpannas_tasya pra-heḥ pārśva upāviśat |

४-७ एतर्हि काचित्शोमिरोणीया योषित्तोयोत्तोलनार्थम्तत्रागमत्।

4-7 etarhi kā_cit śomiroṇīyā yoṣit toyottolanārtham tatrāgamat |

४-८ तदा शिष्याः खाद्यद्रव्याणि क्रेतुं नगरमगच्छन्।

4-8 tadā śiṣyāḥ khādya-dravyāṇi kretuṃ nagaram agacchan |

४-९ यीशुः शोमिरोणीयां तां योषितम्व्याहार्षीत्मह्यं किंचित्पानीयं पातुं देहि। किंतु शोमिरोणीयैः साकं यिहूदीयलोका न व्यवाहरन्। तस्माद्धेतोः साकथयत्। शोमिरोणीया योषिदहं त्वं यिहूदीयऽसि। कथं मत्तः पानीयं पातुमिच्छसि

4-9 yīśuḥ śomiroṇīyām tām yoṣitam vy-āhārṣīt mahyaṃ kiṃ_cit pānīyaṃ pātuṃ dehi | kiṃ_tu śomiroṇīyaiḥ sākaṃ yihūdīya-lokā na vy-avāharan | tasmād_dhetoḥ sākathayat | śomiroṇīyā yoṣid_ahaṃ tvaṃ yihūdīya'si | kathaṃ mattaḥ pānīyaṃ pātum icchasi?

४-१० ततो यीशुरवददीश्वरस्य यद्दानं तत्कीदृक्पानीयं पातुं मह्यं देहि य इत्थं त्वां याचते स वा क इति चेदज्ञास्यथास्तर्हि तमयाचिष्यथाः स च तुभ्यममृतं तोयमदास्यत्।

4-10 tato yīśur_avadad īśvarasya yad_dānaṃ tat_kīdṛk pānīyaṃ pātuṃ mahyaṃ dehi ya itthaṃ tvāṃ yācate sa vā ka iti ced_ajñāsyathās_tarhi tam_ayāciṣyathāḥ sa ca tubhyam a-mṛtaṃ toyam_adāsyat |

४-११ तदा सा सीमन्तिनी भाषितवती। हे महेच्छ प्रहिर्गम्भीरो भवतो नीरोत्तोलनपात्रं नाद्ति च तस्मात्तदमृतं कीलालं कुतः प्राप्स्यसि

4-11 tadā sā sīmantinī bhāṣitavatī | he maheccha pra-hir_gambhīro bhavato nīrottolana-pātraṃ nādti ca tasmāt tad-amṛtaṃ kīlālaṃ kutaḥ prāpsyasi?

४-१२ योऽस्मभ्यमिममन्धुं ददौ यस्य च परिजना गोमेषादयश्च सर्वेऽस्य प्रहेः पानीयं पपुरेतादृशो योऽस्माकं पूर्वपुरुषो याकूब्तस्मादपि भवान्महान्किम्

4-12 yo'smabhyam imam_andhuṃ dadau yasya ca pari-janā go-meṣādayaś_ca sarve'sya pra-heḥ pānīyaṃ papur_etādṛśo yo'smākaṃ pūrva-puruṣo yākūb tasmād_api bhavān mahān kim?

४-१३ ततो यीशुरकथयदिदं पानीयं यः पिबति स पुनस्तृषार्तो भविष्यति।

4-13 tato yīśur_akathayad idaṃ pānīyaṃ yaḥ pibati sa punas_tṛṣārto bhaviṣyati |

४-१४ किंतु मया दत्तम्पानीयं यः पिबति स पुनः कदापि तृषार्तो न भविष्यति। मया दत्तमिदं तोयं तस्यान्तः प्रस्रवणरूपं भूत्वा अनन्तायुर्यावत्स्रोष्यति।

4-14 kiṃ_tu mayā dattam pānīyaṃ yaḥ pibati sa punaḥ kadāpi tṛṣārto na bhaviṣyati | mayā dattam idaṃ toyaṃ tasyāntaḥ prasravaṇa-rūpaṃ bhūtvā anantāyur_yāvat sroṣyati |

४-१५ तदा सा वनिताकथयत्। हे महेच्छ तर्हि मम पुनः पिपासा यथा न जायते तोयोत्तोलनाय यथात्रागमनं न भवति च तदर्थं मह्यं तत्तोयं देहि।

4-15 tadā sā vanitākathayat | he maheccha tarhi mama punaḥ pipāsā yathā na jāyate toyottolanāya yathātrāgamanaṃ na bhavati ca tad-arthaṃ mahyaṃ tat-toyaṃ dehi |

४-१६ ततो यीशुरवदद्याहि तव पतिमाहूय स्थाने ऽत्रागच्छ।

4-16 tato yīśur_avadad yāhi tava patim_ā-hūya sthāne 'trā-gaccha |

४-१७ सा वामावदत्मम पतिर्नास्ति। यीशुरवदत्। मम पतिर्नास्तीति वाक्यं भद्रमवोचः।

4-17 sā vāmāvadat mama patir_nāsti | yīśur_avadat | mama patir_nāstīti vākyaṃ bhadram avocaḥ |

४-१८ यतस्तव पञ्च पतयोऽभवनधुना तु त्वया सार्धं यस्तिष्ठति स तव भर्ता न वाक्यमिदं सत्यमवादीः।

4-18 yatas_tava pañca patayo'bhavan adhunā tu tvayā sārdhaṃ yas_tiṣṭhati sa tava bhartā na vākyam_idaṃ satyam avādīḥ |

४-१९ तदा सा महिला गदितवती। हे महेच्छ भवानेको भविष्यद्वादीति बुद्धं मया।

4-19 tadā sā mahilā gaditavatī | he maheccha bhavān eko bhaviṣyad-vādīti buddhaṃ mayā |

४-२० अस्माकं पितृलोका एतस्मिन्शिलोच्चयेऽभजन्त किंतु भवद्भिरुच्यते यिरूशालम्नगरे भजनयोग्यं स्थानमास्ते।

4-20 asmākaṃ pitṛ-lokā etasmin śiloccaye'bhajanta kiṃ_tu bhavadbhir_ucyate yirūśālam-nagare bhajana-yogyaṃ sthānam_āste |

४-२१ यीशुरवोचत्। हे योषित्मम वाक्ये विश्वसिहि यदा यूयं केवलशैले ऽस्मिन्वा यिरूशालम्नगरे पितुर्भजनं न करिष्यध्वे काल एतादृश आयाति।

4-21 yīśur_avocat | he yoṣit mama vākye vi-śvasihi yadā yūyaṃ kevala-śaile 'smin vā yirūśālam-nagare pitur_bhajanaṃ na kariṣyadhve kāla etādṛśa ā-yāti |

४-२२ यूयं यं भजध्वे तं न्जानीथ किंतु वयं यं भजामहे तं जानीमहे यतो यिहूदीयलोकानां मध्यात्परित्राणं जायते।

4-22 yūyaṃ yaṃ bhajadhve taṃ n jānītha kiṃ_tu vayaṃ yaṃ bhajāmahe taṃ jānīmahe yato yihūdīya-lokānāṃ madhyāt pari-trāṇaṃ jāyate |

४-२३ किंतु यदा सत्यभक्ता आत्मना सत्यरूपेण च पितुर्भजनं करिष्यन्ते समय एतादृश आयाति वरमिदानीमपि विद्यते यत एतादृशो भक्तान्पिता चेष्टते।

4-23 kiṃ_tu yadā satya-bhaktā ātmanā satya-rūpeṇa ca pitur-bhajanaṃ kariṣyante sam-aya etādṛśa ā-yāti varam idānīm_api vidyate yata etādṛśo bhaktān pitā ceṣṭate |

४-२४ ईश्वर आत्मा। ततस्तस्य ये भक्तास्तैः स आत्मना सत्यरूपेण च भजनीयः।

4-24 īśvara ātmā | tatas_tasya ye bhaktās_taiḥ sa ātmanā satya-rūpeṇa ca bhajanīyaḥ |

४-२५ तदा सा महिलावादीत्। ख्रीष्टनाम्ना विख्यातोऽभिषिक्तः पुरुष आगमिष्यतीति जानामि स च सर्वाः कथा अस्मान्ज्ञापयिष्यति।

4-25 tadā sā mahilāvādīt | khrīṣṭa-nāmnā vi-khyāto'bhiṣiktaḥ puruṣa ā-gamiṣyatīti jānāmi sa ca sarvāḥ kathā asmān jñāpayiṣyati |

४-२६ ततो यीशुरवदत्त्वया सार्धं कथनं करोमि योऽहमहमेव स पुरुषः।

4-26 tato yīśur_avadat tvayā sārdhaṃ kathanaṃ karomi yo'ham aham_eva sa puruṣaḥ |

४-२७ एतस्मिन्समये शिष्या आगत्य तया स्त्रिया सार्धं तस्य कथोपकथने महाश्चर्यममन्यन्त तथापि भवान्किमिच्छति यद्वा किमर्थमेतया सार्धं कथां कथयति इति कोऽपि नापृच्छत्।

4-27 etasmin sam-aye śiṣyā ā-gatya tayā striyā sārdhaṃ tasya kathopakathane mahāścaryam amanyanta tathāpi bhavān kim_icchati? yad_vā kim-artham etayā sārdhaṃ kathāṃ kathayati? iti ko'pi nāpṛcchat |

४-२८ ततः परं सा नारी कलशं स्थापयित्वा नगरमध्यं गत्वा लोकेभ्योऽकथयदहं यद्यत्कर्माकरवं तत्सर्वं मह्यमकथयद्।

4-28 tataḥ paraṃ sā nārī kalaśaṃ sthāpayitvā nagara-madhyaṃ gatvā lokebhyo'kathayad ahaṃ yad_yat karmākaravaṃ tat_sarvaṃ mahyam_akathayad |

४-२९ एतादृशं मानवमेकमागत्य पश्यत स किमभिषिक्तो न भवति

4-29 etādṛśaṃ mānavam_ekam ā-gatya paśyata sa kim abhi-ṣikto na bhavati?

४-३० ततस्ते नगराद्बहिरागत्य तस्य समीपमायन्।

4-30 tatas_te nagarād bahir_ā-gatya tasya sam-īpam āyan |

४-३१ एतर्हि शिष्याः साधयित्वा तं व्याहार्षुः। हे गुरो भवान्किंचिद्भुक्ताम्।

4-31 etarhi śiṣyāḥ sādhayitvā taṃ vyāhārṣuḥ | he guro bhavān kiṃ_cid bhuktām |

४-३२ ततः सोऽवदत्। युष्माभिर्यन्न ज्ञायते तादृशं भक्ष्यं ममास्ते।

4-32 tataḥ so'vadat | yuṣmābhir_yan_na jñāyate tādṛśaṃ bhakṣyaṃ mamāste |

४-३३ तदा शिष्याः परस्परं प्रष्टुमारभन्त। किमस्मै कोऽपि किमपि भक्ष्यमानीय दत्तवान्

4-33 tadā śiṣyāḥ paras-paraṃ praṣṭum ārabhanta | kim_asmai ko'pi kim_api bhakṣyam_ā-nīya dattavān?

४-३४ यीशुरवोचत्। मत्प्रेरकस्याभिमतानुरूपकरणं तस्यैव कर्मसिद्धिकरणं च मम भक्ष्यम्।

4-34 yīśur_avocat | mat-prerakasyābhi-matānurūpa-karaṇaṃ tasyaiva karma-siddhi-karaṇaṃ ca mama bhakṣyam |

४-३५ मासचतुष्टये जाते शस्यकर्तनसमयो भविष्यतीति वाक्यं युष्माभिः किं नोद्यते किंत्वहं वदामि। शिर उत्तोल्य क्षेत्राणि प्रति निरीक्ष्य पश्यत। इदानीं कर्तनयोग्यानि शुक्लवर्णान्यभवन्।

4-35 māsa-catuṣṭaye jāte śasya-kartana-samayo bhaviṣyatīti vākyaṃ yuṣmābhiḥ kiṃ nodyate? kiṃ_tv_ahaṃ vadāmi | śira ut-tolya kṣetrāṇi prati nir-īkṣya paśyata | idānīṃ kartana-yogyāni śukla-varṇāny_abhavan |

४-३६ यश्छिनत्ति स वेतनं लभते। अनन्तायुःस्वरूपं शस्यं स गृह्णाति च। तेनैव वप्ता छेत्ता च युगपदानन्दतः।

4-36 yaś_chinatti sa vetanaṃ labhate | anantāyuḥ-svarūpaṃ śasyaṃ sa gṛhṇāti ca | tenaiva vaptā chettā ca yugapad ā-nandataḥ |

४-३७ इत्थं सति वपत्येकश्छिनत्त्यन्य इति वचनं सिद्ध्यति।

4-37 itthaṃ sati vapaty_ekaś_chinatty_anya iti vacanaṃ siddhyati |

४-३८ यत्र यूयं न पर्यश्राम्यत तादृशं शस्यं छेत्तुं युष्मान्प्रैरयम्। अन्ये जनाः पर्यश्राम्यन्यूयं तेषां श्रमस्य फलमलभन्त।

4-38 yatra yūyaṃ na pary-aśrāmyata tādṛśaṃ śasyṃ chettuṃ yuṣmān prairayam | anye janāḥ pary_aśrāmyan yūyaṃ teṣāṃ śramasya phalam alabhanta |

४-३९ यस्मिन्काले यद्यत्कर्माकार्षं तत्सर्वं स मह्यमकथयत्तस्या वनिताया इदं साक्ष्यवाक्यं श्रुत्वा तन्नगरनिवासिनो बहवः शोमिरोणीयलोका व्यश्वसन्।

4-39 yasmin kāle yad_yat karmākārṣaṃ tat_sarvaṃ sa mahyam akathayat tasyā vanitāyā idaṃ sākṣya-vākyaṃ śrutvā tan-nagara-nivāsino bahavaḥ śomiroṇīya-lokā vy-aśvasan |

४-४० तथा च तस्यान्तिके समुपस्थाय स्वेषां सन्निधौ कतिचिद्दिनानि स्थातुं तस्मिन्विनयमकुर्वन्तस्मात्स दिनद्वयं तत्स्थाने न्यवसत्।

4-40 tathā ca tasyāntike sam-upa-sthāya sveṣāṃ san-ni-dhau kati_cid dināni sthātuṃ tasmin vi-nayam akurvan tasmāt sa dina-dvayaṃ tat-sthāne ny-avasat |

४-४१ ततस्तस्योपदेशेन बहवोऽपरे विश्वस्य

4-41 tatas_tasyopa-deśena bahavo'pare viśvasya

४-४२ तां योषामवदन्केवलं तव वाक्येन प्रतीम इति न। किंतु स जगतोऽभिषिक्तस्त्रातेति तस्य कथां श्रुत्वा वयं स्वयमेवाज्ञास्महि।

4-42 tāṃ yoṣām_avadan kevalaṃ tava vākyena pratīma iti na | kiṃ_tu sa jagato'bhi-ṣiktas_trāteti tasya kathāṃ śrutvā vayaṃ svayam_evā-jñāsmahi |

४-४३ स्वदेशे भविष्यद्वक्तुः सत्कारो नास्तीति यद्यपि यीशुः प्रमाणं दत्त्वाकथयत्

4-43 sva-deśe bhaviṣyad-vaktuḥ sat-kāro nāstīti yady_api yīśuḥ pramāṇaṃ dattvākathayat

४-४४ तथापि दिवसद्वयात्परं स तस्मात्स्थानाद्गालीलं गतवान्।

4-44 tathāpi divasa-dvayāt paraṃ sa tasmāt sthānād gālīlaṃ gatavān |

४-४५ अनन्तरं ये गालीलीयलोका उत्सवे गता उत्सवसमये यिरूशालम्नगरे तस्य सर्वाः क्रिया अपश्यन्ते गालीलमागतं तमगृह्णम्।

4-45 anantaraṃ ye gālīlīya-lokā ut-save gatā utsava-samaye yirūśālam-nagare tasya sarvāḥ kriyā apaśyan te gālīlam ā-gataṃ tam agṛhṇam |

४-४६ ततः परं यीशुर्यस्मिन्कान्नानगरे जलं द्राक्षारसमकरोत्तत्स्थानं पुनर्गात्। तस्मिन्नेव समये कस्यचिद्राजसभास्तारस्य पुत्रः कफर्नाहूमपुरि रोगग्रस्त आसीत्।

4-46 tataḥ paraṃ yīśur_yasmin kānnā-nagare jalaṃ drākṣā-rasam akarot tat-sthānaṃ punar_gāt | tasmnin_neva sam-aye kasya_cid rāja-sabhās_tārasya putraḥ kapharnāhūma-puri roga-grasta āsīt |

४-४७ स यिहूदीयदेशाद्यीशोर्गालीलागमनवार्त्तां निशम्य तस्य समीपं गत्वा प्रार्थ्य व्याहृतवान्। मम पुत्रस्य प्रायेण काल आसन्नः। भवानागत्य तं स्वथं करोतु।

4-47 sa yihūdīya-deśād yīśor_gālīlā-gamana-vārttāṃ ni-śamya tasya sam-īpaṃ gatvā prārthya vy-ā-hṛtavān | mama putrasya prāyeṇa kāla ā-sannaḥ | bhavān ā-gatya taṃ sva-thaṃ karotu |

४-४८ तदा यीशुरकथयद्। आश्चर्यं कर्म चित्रं चिह्नं च न दृष्ट्वा यूयं न प्रेष्यथ।

4-48 tadā yīśur_akathayad | āścaryaṃ karma citraṃ cihnaṃ ca na dṛṣṭvā yūyaṃ na preṣyatha |

४-४९ ततः स सभासदवदत्। हे महेच्छ मम पुत्रे न मृते भवानागच्छतु।

4-49 tataḥ sa sabhā-sad_avadat | he maheccha mama putre na mṛte bhavān_ā-gacchatu |

४-५० यीशुस्तमवदत्। गच्छ तव पुत्रोऽजीवीत। तदा यीशुनोक्तवाक्ये स विश्वस्य गतवान्।

4-50 yīśus_tam_avadat | gaccha tava putro'jīvīta | tadā yīśunokta-vākye sa viśvasya gatavān |

४-५१ गमनकाले मार्गमध्ये दासास्तं साक्षात्प्राप्रावदत्। भवतः पुत्रोऽजीवीत्।

4-51 gamana-kāle mārga-madhye dāsās_taṃ sākṣāt prāprāvadat | bhavataḥ putro'jīvīt |

४-५२ ततः कं कालमारभ्य रोगप्रतीकारारम्भो जात इति पृष्टे तैरुक्तं ह्यः सार्धदण्डद्वयाधिकद्वितीययामे तस्य ज्वरत्यागोऽभवत्।

4-52 tataḥ kaṃ kālam_ā-rabhya roga-pratīkārārambho jāta iti pṛṣṭe tair_uktaṃ hyaḥ sārdha-daṇḍa-dvayādhika-dvitīya-yāme tasya jvara-tyāgo'bhavat |

४-५३ तदा यीशुस्तस्मिन्क्षणे प्रोक्तवान्। तव पुत्रोऽजीवीत्। पिता तद्बुद्ध्वा सपरिवारो व्यश्वसीत्।

4-53 tadā yīśus_tasmin kṣaṇe proktavān | tava putro'jīvīt | pitā tad_buddhvā sa-parivāro vy-aśvasīt |

४-५४ यिहूदीयदेशादागत्य गालीलि यीश्युरेतद्द्वितीयमाश्चर्यकर्माकरोत्।

4-54 yihūdīya-deśād ā-gatya gālīli yīśyur_etad dvitīyam āścarya-karmākarot |

५-१ ततः परं यिहूदीयानामुत्सव ङ्क्ष्पस्थिते यीशुर्यिरूशालं गतवान्।

5-1 tataḥ param yihūdīyānām ut-sava fpa-sthite yīśur yirūśālaṃ gatavān |

५-२ तस्मिन्नगरे मेषनाम्नो द्वारस्य समीपे इब्रीयभाषया बैथेस्दानम्ना पुष्करिणी पञ्चघट्टयुक्तासीत्।

5-2 tasmin nagare meṣa-nāmno dvārasya sam-īpe ibrīya-bhāṣayā baithesdā-namnā puṣkariṇī pañca-ghaṭṭa-yuktāsīt |

५-३ तस्यास्तेषु घट्टेषु कीलालकम्पनमपेक्ष्य अन्धखञ्जशुष्काङ्गादयो बहवो रोगिणः पतन्तस्तिष्ठन्ति स्म।

5-3 tasyās_teṣu ghaṭṭeṣu kīlāla-kampanam apekṣya andha-khañja-śuṣkāṅgādayo bahavo rogiṇaḥ patantas_tiṣṭhanti sma |

५-४ यतो विशेषकाले तस्य सरसो वारि स्वर्गीयदूत एत्याकम्पयत्तत्कीलालकम्पनात्परं यः कश्चिद्रोगी प्रथमं पानीयमवारोहत्। स एव रर्क्षणाद्रोगमुक्तोऽभवत्।

5-4 yato viśeṣa-kāle tasya saraso vāri svargīya-dūta etyākampayat tat-kīlāla-kampanāt paraṃ yaḥ kaś_cid rogī prathamaṃ pānīyam_avārohat | sa eva rar-kṣaṇād rogam_ukto'bhavat |

५-५ तदाष्टात्रिंशद्वर्षाणि यावद्रोगग्रस्त एकजनस्तस्मिन्स्थाने स्थितवान्।

5-5 tadāṣṭātriṃśad-varṣāṇi yāvad roga-grasta eka-janas_tasmin sthāne sthitavān |

५-६ यीशुस्तं शयितं दृष्ट्वा बहुकालिकरोगीति ज्ञात्वा व्याहृतवान्। त्वं किं स्वस्थो बुभूषसि

5-6 yīśus_taṃ śayitaṃ dṛṣṭvā bahu-kālika-rogīti jñātvā vyāhṛtavān | tvaṃ kiṃ svastho bubhūṣasi?

५-७ ततो रोगी कथितवान्। हे महेच्छ यदा कीलालं कम्पते तदा मां पुष्करिणीमवरोहयितुं मम कोऽपि नास्ति। तस्मान्मम गमनकाले कश्चिदन्योऽग्रे गत्वा अवरोहति।

5-7 tato rogī kathitavān | he mahecchha yadā kīlālaṃ kampate tadā māṃ puṣkariṇīm ava-rohayituṃ mama ko'pi nāsti | tasmān mama gamana-kāle kaś_cid_anyo'gre gatvā ava-rohati |

५-८ तदा यीशुरकथयदुत्तिष्ठ तव शय्यामुत्तोल्य गृहीत्वा याहि।

5-8 tadā yīśur_akathayad ut-tiṣṭha tava śayyām_uttolya gṛhītvā yāhi |

५-९ स तत्क्षणात्स्वस्थो भूत्वा शय्यामुत्तोल्यादाय गतवान्। किंतु तद्दिनं विश्रामवारः।

5-9 sa tat-kṣaṇāt sva-stho bhūtvā śayyām_uttolyā-dāya gatavān | kiṃ_tu tad-dinaṃ viśrāma-vāraḥ |

५-१० तस्माद्यिहूदीयाः स्वस्थं नरं व्याहरन्। अद्य विश्रामवारे शयनीयमादाय न यातव्यम्।

5-10 tasmād yihūdīyāḥ sva-sthaṃ naraṃ vy-āharan | adya viśrāma-vāre śayanīyam ā-dāya na yātavyam |

५-११ ततः स प्रत्यवोचद्यो मां स्वस्थमकार्षीत्। शयनीयमुत्तोल्यादाय यातुं मां स एवादिशत्।

5-11 tataḥ sa praty-avocad yo māṃ sva-stham akārṣīt | śayanīyam ut-tolyā-dāya yātuṃ māṃ sa evādiśat |

५-१२ तदा तेऽपृच्छन्शयनीयमुत्तोल्यादाय यातुं य आज्ञापयत्स कः।

5-12 tadā te'pṛcchan śayanīyam ut-tolyā-dāya yātuṃ ya ājñāpayat sa kaḥ |

५-१३ किंतु स क इति स्वस्थीभूतो नाजानाद्यतस्तस्मिन्स्थाने जनतासत्त्वाद्यीशुः स्थानान्तरमगमत्।

5-13 kiṃ_tu sa ka iti svasthī-bhūto nājānād yatas_tasmin sthāne janatā-sattvād yīśuḥ sthānāntaram agamat ।

५-१४ ततः परं यीशुर्मन्दिरे तं नरं साक्षात्प्राप्याकथयत्। पश्येदानीमनामयो जातोसि यथाधिका दुर्दशा न घटते तद्धेतोः पापं कर्म पुनर्मा कार्षीः।

5-14 tataḥ paraṃ yīśur_mandire taṃ naraṃ sākṣāt prāpyākathayat । paśyedānīm anāmayo jātosi yathādhikā durdaśā na ghaṭate tad-dhetoḥ pāpaṃ karma punar_mā kārṣīḥ ।

५-१५ ततः स गत्वा यिहूदीयानवदद्। यीशुर्मामरोगिणमकार्षीत्।

5-15 tataḥ sa gatvā yihūdīyān avadad । yīśur_mām aroginam akārṣīt ।

५-१६ ततो यीशुर्विश्रामवारे कर्मेदृशं कृतवानिति हेतोर्यिहूदीयास्तं ताडयित्वा हन्तुमचेष्टन्त।

5-16 tato yīśur_viśrāma-vāre karmedṛśaṃ kṛtavān iti hetor_yihūdīyās_taṃ tāḍayitvā hantum aceṣṭanta ।

५-१७ यीशुस्तानाख्यात्। मम पिता यत्कार्यं करोति तदनुरूपमहमपि करोमि।

5-17 yīśus_tān_ākhyāt । mama pitā yat kāryaṃ karoti tad-anurūpam aham_api karomi ।

५-१८ ततो यिहूदीयास्तं हन्तुं पुनरयतन्त यतो विश्रामवारं नामन्यत। तदेव केवलं न अधिकंतु ईश्वरं स्वपितरं प्रोच्य स्वमपीश्वरतुल्यं कृतवान्।

5-18 tato yihūdīyās_taṃ hantuṃ punar_ayatanta yato viśrāma-vāraṃ nāmanyata । tad_eva kevalaṃ na adhikaṃ_tu īśvaraṃ svapitaraṃ procya svam_apīśvara-tulyaṃ kṛtavān ।

५-१९ पश्चाद्यीशुरवदद्युष्मानहं यथार्थतरं वदामि। पुत्रः पितरं यद्यत्कर्म कुर्वन्तं पश्यति। तदतिरिक्तं स्वेच्छातः किमपि कर्म कर्तुं न शक्नोति। पिता यत्करोति पुत्रोऽपि तदेव करोति।

5-19 paścād yīśur_avadad yuṣmān_ahaṃ yathārthataraṃ vadāmi । putraḥ pitaraṃ yad_yat karma kurvantaṃ paśyati । tad-atiriktaṃ svecchātaḥ kim_api karma kartuṃ na śaknoti । pitā yat karoti putro'pi tad_eva karoti ।

५-२० पिता पुत्रे स्नेहं करोति तस्मात्स्वयं यद्यत्कर्म करोति तत्सर्वं पुत्रं दर्शयति। यथा च युष्माकं आश्चर्यज्ञानं जनिष्यते तदर्थमितोऽपि महाकर्म तं दर्शयिष्यति।

5-20 pitā putre snehaṃ karoti tasmāt svayaṃ yad_yat karma karoti tat_sarvaṃ putraṃ darśayati । yathā ca yuṣmākaṃ āścarya-jñānaṃ janiṣyate tad-artham ito'pi mahā-karma taṃ darśayiṣyati ।

५-२१ वस्तुतस्तु पिता यथा प्रमीतानुत्थाप्य सजीवान्करोति तद्वत्पुत्रोऽपि यं यमिच्छति तं तं सजीवं करोति।

5-21 vastutas_tu pitā yathā pra-mītān ut-thāpya sa-jīvān karoti tadvat putro'pi yaṃ yam icchati taṃ taṃ sa-jīvaṃ karoti ।

५-२२ सर्वे पितरं यथा सत्कुर्वन्ति तथा पुत्रमपि सत्कारयितुं पिता स्वयं कस्यापि विचारमकृत्वा सर्वविचाराणां भारं पुत्रे समर्पितवान्।

5-22 sarve pitaraṃ yathā sat-kurvanti tathā putram_api sat-kārayituṃ pitā svayaṃ kasyāpi vicāram_a-kṛtvā sarva-vicārāṇāṃ bhāraṃ putre sam-arpitavān ।

५-२३ यः पुत्रं सत्करोति स तस्य प्रेरकमपि सत्करोति।

5-23 yaḥ putraṃ sat-karoti sa tasya prerakam_api sat-karoti ।

५-२४ युष्मानहं यथार्थतरं वदामि यो जनो मम वाक्यं श्रुत्वा मत्प्रेरके विश्वसिति सोऽनन्तायुः प्राप्नोति कदापि दण्डभाजनं न भवति निधनादुत्थाय परमायुः प्राप्नोति।

5-24 yuṣmān_ahaṃ yathārthataraṃ vadāmi yo jano mama vākyaṃ śrutvā mat-prerake vi-śvasiti so'nantāyuḥ prāpnoti kadāpi daṇḍa-bhājanaṃ na bhavati nidhanād_ut-thāya paramāyuḥ prāpnoti ।

५-२५ अहं युष्मानतियथार्थं वदामि यदा मृता ईश्वरपुत्रस्य निनादं श्रोष्यन्ति। ये च श्रोष्यन्ति ते सजीवा भविष्यन्ति। समय एतादृश आयाति वरमिदानीमप्युपतिष्ठन्ति।

5-25 ahaṃ yuṣmān_ati-yathārthaṃ vadāmi yadā mṛtā īśvara-putrasya ni-nādaṃ śroṣyanti । ye ca śroṣyanti te sajīvā bhaviṣyanti । sam-aya etādṛśa ā-yāti varam idānīm_apy_upa-tiṣṭhanti ।

५-२६ पिता यथा स्वयंजीवी तथा पुत्राय स्वयंजीवित्वाधिकारं दत्तवान्।

5-26 pitā yathā svayaṃ-jīvī tathā putrāya svayaṃ-jīvitvādhi-kāraṃ dattavān |

५-२७ स मनुष्यपुत्रः एतस्मात्कारणात्पिता दण्डकरणाधिकारमपि तस्मिन्समर्पितवान्।

5-27 sa manuṣya-putraḥ etasmāt kāraṇāt pitā daṇḍa-karaṇādhi-kāram_api tasmin sam-arpitavān |

५-२८ एतदर्थे यूयमाश्चर्यं न मन्यध्वं यतो यस्मिन्समये तस्य निनादं श्रुत्वा श्मशानस्थाः सर्वे बहिर्गमिष्यन्ति समय एतादृश उपस्थास्यति।

5-28 etad-arthe yūyam āścaryaṃ na manyadhvaṃ yato yasmin sam-aye tasya ni-nādaṃ śrutvā śmaśāna-sthāḥ sarve bahir_-gamiṣyanti sam-aya etādṛśa upa-sthāsyati |

५-२९ तस्माद्ये सत्कर्माणि कृतवन्तस्त उत्थाय आयुः प्राप्स्यन्ति। ये च कुकर्माणि कृतवन्तस्त उत्थाय दण्डं प्राप्स्यन्ति।

5-29 tasmād ye sat-karmāṇi kṛtavantas_ta ut-thāya āyuḥ prāpsyanti | ye ca ku-karmāṇi kṛtavantas_ta ut-thāya daṇḍam prāpsyanti |

५-३० अहं स्वयं किमपि कर्तुं न शक्नोमि यथा शृणोमि तथा विचारयामि। मम विचारश्च न्याय्यः यतोऽहं स्वीयाभीष्टं नेहित्वा मत्प्रेरयितुः पितुरिष्टमीहे।

5-30 ahaṃ svayaṃ kim_api kartuṃ na śaknomi yathā śṛṇomi tathā vi-cārayāmi | mama vi-cāraś_ca ny-āyyaḥ yato'haṃ svīyābhīṣṭaṃ nehitvā mat-prerayituḥ pitur_iṣṭam īhe |

५-३१ यदि स्वस्मिन्स्वयं साक्ष्यं ददामि तर्हि तत्साक्ष्यमग्राह्यं भवति।

5-31 yadi svasmin svayaṃ sākṣyaṃ dadāmi tarhi tat-sākṣyam agrāhyaṃ bhavati |

५-३२ किंतु मदर्थेऽपरो जनः साक्ष्यं ददाति मदर्थे तस्य यत्साक्ष्यं तत्सत्यमेतदप्यहं जानामि।

5-32 kiṃ_tu mad-arthe'paro janaḥ sākṣyaṃ dadāti mad-arthe tasya yat sākṣyaṃ tat satyam etad_apy_ahaṃ jānāmi |

५-३३ युष्माभिर्योहनं प्रति लोकेषु प्रेरितेषु स सत्यकथायां साक्ष्यमददात्।

5-33 yuṣmābhir_yohanaṃ prati lokeṣu preriteṣu sa satya-kathāyāṃ sākṣyam_adadāt |

५-३४ मानुषादहं साक्ष्यं नोपेक्षे तथापि यूयं यथा परित्रयध्वे तदर्थमिदं वाक्यं वदामि।

5-34 mānuṣād_ahaṃ sākṣyaṃ nopekṣe tathāpi yūyaṃ yathā pari-trayadhve tad-artham idaṃ vākyaṃ vadāmi |

५-३५ योहन्देदीप्यमानो दीप इव तेजस्वी स्थितवान्। यूयमल्पकालं तस्य दीप्त्यानन्दितुं सममन्यध्वम्।

5-35 yohan dedīpyamāno dīpa iva tejasvī sthitavān | yūyam alpa-kālaṃ tasya dīptyā-nanditum sam-amanyadhvam |

५-३६ किंतु तत्प्रमाणादपि मम गुरुतरं प्रमाणं विद्यते। पिता मां प्रेष्य यद्यत्कर्म समापयितुं शक्तिमददात्मया कृतं तत्तत्कर्म मदर्थे प्रमाणं ददाति।

5-36 kiṃ_tu tat-pramāṇād_api mama gurutaraṃ pra-māṇaṃ vidyate | pitā māṃ preṣya yad_yat karma sam-āpayituṃ śaktim_adadāt mayā kṛtaṃ tat-tat karma mad-arthe pra-māṇaṃ dadāti |

५-३७ तस्य वाक्यं युष्माभिः कदापि न श्रुतं तस्य रूपं च न दृष्टं।

5-37 tasya vākyaṃ yuṣmābhiḥ kadāpi na śrutaṃ tasya rūpaṃ ca na dṛṣṭaṃ |

५-३८ तस्य वाक्यं च युष्माकमन्तः कदापि स्थानं नाप्नोति। यतः स यं प्रेषितवान्। यूयं तस्मिन्न विश्वसिति।

5-38 tasya vākyaṃ ca yuṣmākam antaḥ kadāpi sthānaṃ nāpnoti | yataḥ sa yaṃ preṣitavān | yūyaṃ tasmin na vi-śvasiti |

५-३९ धर्मपुस्तकानि यूयमालोचयध्वं। तैर्वाक्यैरनन्तायुः प्राप्स्याम इति यूयं बुध्यध्वे तद्धर्मपुस्तकानि मदर्थे प्रमाणं ददति।

5-39 dharma-pustakāni yūyam ā-locayadhvaṃ | tair_vākyair_anantāyuḥ prāpsyāma iti yūyaṃ budhyadhve tad-dharma-pustakāni mad-arthe pra-māṇaṃ dadati |

५-४० तथापि यूयं परमायुः प्राप्तये मम सन्निधिम्न जिगमिष्यथ।

5-40 tathāpi yūyaṃ paramāyuḥ prāptaye mama san-ni-dhim na jigamiṣyatha |

५-४१ अहं मानुषेभ्यः सत्कारं न गृह्णामि।

5-41 ahaṃ mānuṣebhyaḥ sat-kāraṃ na gṛhṇāmi |

५-४२ अहं युष्मान्जानामि। युष्माकमन्तर ईश्वरप्रेम नास्ति।
5-42 ahaṃ yuṣmān jānāmi | yuṣmākam_antara īśvara-prema nāsti |
५-४३ अहं निजपितुर्नाम्नागतोऽस्मि तथापि मां न गृह्णीथ किंतु कश्चिद्यदि स्वनाम्ना समागमिष्यति तर्हि तं ग्रहीष्यथ।
5-43 ahaṃ nija-pitur_nāmnāgato'smi tathāpi māṃ na gṛhṇītha kiṃ_tu kaścid yadi sva-nāmnā sam-ā-gamiṣyati tarhi taṃ grahīṣyatha |
५-४४ यूयमीश्वरात्सत्कारं न चेष्टित्वा केवलं परस्परं सत्कारम्चेदादध्वे तर्हि कथं विश्वसितुं शक्नुथ
5-44 yūyam īśvarāt sat-kāraṃ na ceṣṭitvā kevalaṃ paras-paraṃ sat-kāram ced ā-dadhve tarhi kathaṃ vi-śvasituṃ śaknutha?
५-४५ पितुः समीपेऽहं युष्मानपवदिष्यामीति मा चिन्तयत। यस्मिन्युष्माकं विश्वासः स एव मूसा युष्मानपवदति।
5-45 pituḥ samīpe'haṃ yuṣmān apa-vadiṣyāmīti mā cintayata | yasmin yuṣmākaṃ vi-śvāsaḥ sa eva mūsā yuṣmān apa-vadati |
५-४६ यदि यूयं तस्मिन्व्यश्वसिष्यत तर्हि मय्यपि व्यश्वसिष्यत यत्स मयि लिखितवान्।
5-46 yadi yūyaṃ tasmin vy-aśvasiṣyata tarhi mayy_api vy-aśvasiṣyata yat sa mayi likhitavān |
५-४७ ततो यदि तेन लिखितानि न प्रतीथ तर्हि मम वाक्यानि कथं प्रत्येष्यथ
5-47 tato yadi tena likhitāni na pratītha tarhi mama vākyāni kathaṃ pratyeṣyatha?
६-१ ततः परं यीशुर्गालील्प्रदेशीयस्य तिविरियानाम्नः सिन्धोः पारं गतवान्।
6-1 tataḥ paraṃ yīśur_gālīl-pradeśīyasya tiviriyā-nāmnaḥ sindhoḥ pāraṃ gatavān |
६-२ ततो व्याधिमल्लोकस्वास्थ्यकरणरूपाणि तस्याश्चर्याणि कर्माणि दृष्ट्वा बहवो जनास्तत्पश्चादगच्छन्।
6-2 tato vyādhimal_loka-svāsthya-karaṇa-rūpāṇi tasyāścaryāṇi karmāṇi dṛṣṭvā bahavo janās_tat-paścād agacchan |
६-३ ततो यीशुः पर्वतमारुह्य तत्र शिष्यैः साकमुपाविशत्।
6-3 tato yīśuḥ parvatam_ā-ruhya tatra śiṣyaiḥ sākam upāviśat |
६-४ तस्मिन्समये निस्तारोत्सवनाम्नि यिहूदीयानाम उत्सव उपस्थिते
6-4 tasmin sam-aye nistārotsava-nāmni yihūdīyā-nāma ut-sava upasthite
६-५ यीशुर्नेत्रे उत्तोल्य बहुलोकान्स्वसमीपागतान्विलोक्य फिलिपं पृष्टवानेतेषां भोजनाय भोज्यद्रव्याणि वयं कुत्र क्रेतुं शक्नुमः
6-5 yīśur_netre ut-tolya bahu-lokān sva-samīpāgatān vi-lokya philipaṃ pṛṣṭavān eteṣāṃ bhojanāya bhojya-dravyāṇi vayaṃ kutra kretuṃ śaknumaḥ?
६-६ वाक्यमिदं तस्य परीक्षार्थमवादीत्किंतु यत्करिष्यति तत्स्वयमजानात्।
6-6 vākyam_idaṃ tasya parīkṣārtham avādīt kiṃ_tu yat kariṣyati tat svayam ajānāt |
६-७ फिलिपः प्रत्यवोचतेतेषामेकैको यद्यल्पमल्पं प्राप्नोति तर्हि मुद्रापादद्विशतेन क्रीतपूआ अपि न्यूना भविष्यन्ति।
6-7 philipaḥ praty-avocat eteṣām ekaiko yady_alpam alpaṃ prāpnoti tarhi mudrā-pāda-dvi-śatena krīta-pūoā api nyūnā bhaviṣyanti |
६-८ शिमोन्पितरस्य भ्राता आन्द्रियाख्यः शिष्याणाको व्याहृतवान्।
6-8 śimon-pitarasya bhrātā āndriyākhyaḥ śiṣyāṇā_eko vy-ā-hṛtavān |
६-९ अत्र कस्यचिद्बालकस्य समीपे पञ्च यावपूपाः क्षुद्रमत्स्यद्वयं च सन्ति किंतु लोकानां एतावतां मध्येतैः किं भविष्यति
6-9 atra kasya_cid bālakasya sam-īpe pañca yāva-pūpāḥ kṣudra-matsya-dvayaṃ ca santi kiṃ_tu lokānāṃ etāvatāṃ madhyetaiḥ kiṃ bhaviṣyati?
६-१० पश्चाद्यीशुरवदत्। लोकानुपवेशयत। तत्र बहुयवससत्त्वात्पञ्चसहस्रेभ्यो न्यूना अधिका वा पुरुषा भूम्यामुपाविशन्।
6-10 paścād yīśur_avadat | lokān_upa-veśayata | tatra bahu-yava-sasattvāt pañca-sahasrebhyo ny-ūnā adhikā vā puruṣā bhūmyām upāviśan |
६-११ ततो यीशुस्तान्पूपानादाय ईश्वरस्य गुणाम्कीर्तयित्वा शिष्येषु समार्पयत्। ततस्ते तेभ्य उपविष्टलोकेभ्यः पूपान्यथेष्टमत्स्यं च प्रादुः।
6-11 tato yīśus_tān pūpān_ā-dāya īśvarasya guṇām kīrtayitvā śiṣyeṣu sam-ārpayat | tatas_te tebhya upaviṣṭa-lokebhyaḥ pūpān yatheṣṭa-matsyaṃ ca prāduḥ |

६-१२ तेषु तृप्तेषु स तानवोचदेतेषां किंचिदपि यथा नापचीयते तथा सर्वाण्यवशिष्टानि संगृह्णीत।
6-12 teṣu tṛpteṣu sa tān_avocad eteṣāṃ kiṃ_cid_api yathā nāpacīyate tathā sarvāṇy_ava-śiṣṭāni sṃ-gṛhṇīta |
६-१३ ततः सर्वेषां भोजनात्परं ते तेषां पञ्चानां यावपूपानामवशिष्टान्यखिलानि संगृह्य द्वादशदल्लकानपूरयन्।
6-13 tataḥ sarveṣāṃ bhojanāt paraṃ te teṣāṃ pañcānāṃ yāva-pūpānām ava-śiṣṭāny_a-khilāni sṃ-gṛhya dvā-daśa-dallakān apūrayan |
६-१४ अपरं यीशोरेतादृशीमाश्चर्यक्रियां दृष्ट्वा लोका मिथो वक्तुमारेभिरे। जगति यस्यागमनं भविष्यति स एवायमवश्यं भविष्यद्वक्ता।
6-14 a-paraṃ yīśor_etādṛśīm āścarya-kriyāṃ dṛṣṭvā lokā mitho vaktum_ā-rebhire | jagati yasyāgamanaṃ bhaviṣyati sa evāyam a-vaśyaṃ bhaviṣyad-vaktā |
६-१५ अत एव लोका आगत्य तमाक्रम्य राजानं करिष्यन्ति यीशुस्तेषामीदृशं मानसं विज्ञाय पुनश्च पर्वतमेकाकी गतवान्।
6-15 ata eva lokā ā-gatya tam_ā-kramya rājānaṃ kariṣyanti yīśus_teṣām īdṛśaṃ mānasaṃ vi-jñāya punaś_ca parvatam ekākī gatavān |
६-१६ सायंकाल उपस्थिते शिष्या जलधितटं व्रजित्वा नावमारुह्य कफर्नाहूम्नगरदिशि सिन्धौ वाहयित्वागमन्।
6-16 sāyaṃ-kāla upa-sthite śiṣyā jaladhi-taṭaṃ vrajitvā nāvam_ā-ruhya kapharnāhūm-nagara-diśi sindhau vāhayitvāgaman |
६-१७ तस्मिन्समये तिमिर उपातिष्ठत्किंतु यीशुस्तेषां समीपं नागच्छत्।
6-17 tasmin sam-aye timira upātiṣṭhat kiṃ_tu yīśus_teṣāṃ samīpaṃ nāgacchat |
६-१८ तदा प्रबलपवनवहनात्सागरे महातरङ्गो भवितुमारेभे।
6-18 tadā prabala-pavana-vahanāt sāgare mahā-taraṅgo bhavitum ā-rebhe |
६-१९ ततस्ते वाहयित्वा द्वित्रान्क्रोशान्गताः पश्चाद्यीशुं जलधेरुपरि पद्भ्यां व्रजन्तं नौकान्तिकमागच्छन्तं विलोक्य त्रासयुक्ता अभवन्।
6-19 tatas_te vāhayitvā dvi-trān krośān gatāḥ paścād yīśuṃ jaladher_upari padbhyāṃ vrajantaṃ naukāntikam ā-gacchantaṃ vi-lokya trāsa-yuktā abhavan |
६-२० किंतु स तानुक्तवानयमहं मा भैष्ट।
6-20 kiṃ_tu sa tān_uktavān ayam_ahaṃ mā bhaiṣṭa |
६-२१ तदा ते तं स्वैरं नावि गृहीतवन्तः। तदा तत्क्षणादुद्दिष्टस्थाने नौरुपास्थात्।
6-21 tadā te taṃ svairaṃ nāvi gṛhītavantaḥ | tadā tat-kṣaṇād uddiṣṭa-sthāne naur_upāsthāt |
६-२२ यया नावा शिष्या  अगच्छन्तदन्या कापि नौका तस्मिन्स्थाने नासीत्ततो यीशुः शिष्यैः साकं नागमत्केवलाः शिष्या अगमनेतत्पारस्था लोका ज्ञातवन्तः।
6-22 yayā nāvā śiṣyā  agacchan tad-anyā kāpi naukā tasmin sthāne nāsīt tato yīśuḥ śiṣyaiḥ sākaṃ nāgamat kevalāḥ śiṣyā agaman etat pāra-sthā lokā jñātavantaḥ |
६-२३ किंतु ततः परं प्रभुर्यत्र ईश्वरस्य गुणाननुकीर्त्य लोकान्पूपानभोजयत्तत्स्थानस्य समीपस्थतिविरियाया अपरास्तरणय आगमन्।
6-23 kiṃ_tu tataḥ paraṃ pra-bhur_yatra īśvarasya guṇān anu-kīrtya lokān pūpān abhojayat tat-sthānasya samīpa-stha-tiviriyāyā aparās_taraṇaya āgaman |
६-२४ यीशुस्तत्र नास्ति शिष्या अपि तत्र न सन्ति। लोका इति विज्ञाय यीशुं गवेषयितुं तरणिभिः कफर्नाहूम्पुरं गताः।
6-24 yīśus_tatra nāsti śiṣyā api tatra na santi | lokā iti vi-jñāya yīśuṃ gaveṣayituṃ taraṇibhiḥ kapharnāhūm-puraṃ gatāḥ |
६-२५ ततस्ते सरित्पतेः पारे तं साक्षात्प्राप्य प्रावोचन्। हे गुरो भवानत्र स्थाने कदागमत
6-25 tatas_te sarit-pateḥ pāre taṃ sākṣāt prāpya prāvocan | he guro bhavān atra sthāne kadāgamat?
६-२६ तदा यीशुस्तान्प्रत्यवादीद्। युस्मानहं यथार्थतरं वदामि आश्चर्यकर्मदर्शनाद्धेतोर्न किंतु पूपभोजनात्तेन तृप्तत्वाच्च मां गवेषयथ।

6-26 tadā yīśus_tān praty-avādīd | yusmān_ahaṃ yathārthataraṃ vadāmi āścarya-karma-darśanād_dhetor_na kiṃ_tu pūpa-bhojanāt tena tṛptatvāc_ca māṃ gaveṣayatha |

६-२७ क्षयणीयभक्ष्यार्थं मा श्रामिष्ट किंत्वनन्तायुर्भक्ष्यार्थं श्राम्यत। तस्मात्तादृशं भक्ष्यं मनुजपुत्रो युष्मभ्यं दास्यति। तस्मिन्तात ईश्वरः प्रमाणं प्रादात्।

6-27 kṣayaṇīya-bhakṣyārthaṃ mā śrāmiṣṭa kiṃ_tv_anantāyur-bhakṣyārthaṃ śrāmyata | tasmāt tādṛśaṃ bhakṣyaṃ manuja-putro yuṣmabhyaṃ dāsyati | tasmin tāta īśvaraḥ pramāṇaṃ prādāt |

६-२८ तदा तेऽपृच्छनीश्वराभिमतं कर्म कर्तुमस्माभिः किं कर्तव्य

6-28 tadā te'pṛcchan īśvarābhimataṃ karma kartum asmābhiḥ kiṃ kartavya?

६-२९ ततो यीशुरवददीश्वरो यं प्रैरयत्तस्मिन्विश्वसनमीश्वराभिमतं कर्म।

6-29 tato yīśur_avadad īśvaro yaṃ prairayat tasmin vi-śvasanam īśvarābhi-mataṃ karma |

६-३० तदा ते व्याहरन्। भवता किं लक्षणं दर्शितं यद्दृष्ट्वा भवति विश्वसिष्यामः त्वया किं कर्म कृतम्

6-30 tadā te vy-āharan | bhavatā kiṃ lakṣaṇaṃ darśitaṃ yad-dṛṣṭvā bhavati viśvasiṣyāmaḥ? tvayā kiṃ karma kṛtam?

६-३१ अस्माकं पूर्वपुरुषा महाप्रान्तरे मान्नां भोक्तुं प्रापुः यथा लिपिरास्ते। ऽस्वर्गीयाणि तु भक्ष्याणि प्रददौ परमेश्वरः।ऽ

6-31 asmākaṃ pūrva-puruṣā mahā-prāntare mānnāṃ bhoktuṃ prāpuḥ yathā lipirās_te | 'svargīyāṇi tu bhakṣyāṇi pra-dadau parameśvaraḥ |'

६-३२ तदा यीशुरवददहं युष्मानतियथार्थं वदामि मूसा युष्मभ्यं स्वर्गीयं भक्ष्यं नादात्। किंतु मम पिता युष्मभ्यं स्वर्गीयं परमं भक्ष्यं ददाति।

6-32 tadā yīśur_avadad ahaṃ yuṣmān_ati-yathārthaṃ vadāmi mūsā yuṣmabhyaṃ svargīyaṃ bhakṣyaṃ nādāt | kiṃ_tu mama pitā yuṣmabhyaṃ svargīyaṃ paramaṃ bhakṣyaṃ dadāti |

६-३३ यः स्वर्गादवरुह्य जगते जीवनं ददाति स ईश्वरदत्तभक्ष्यरूपः।

6-33 yaḥ svargād_avaruhya jagate jīvanaṃ dadāti sa īśvara-datta-bhakṣya-rūpaḥ |

६-३४ तदा ते प्रावोचन्। हे प्रभो भक्ष्यमिदं नित्यमस्मभ्यं ददातु।

6-34 tadā te prāvocan | he pra-bho bhakṣyam_idaṃ nityam_asmabhyaṃ dadātu |

६-३५ यीशुरवददहमेव जीवनरूपं भक्ष्यं यो जनो मम सन्निधिमागच्छति स जातु क्षुधार्तो न भविष्यति।

6-35 yīśur_avadad aham_eva jīvana-rūpaṃ bhakṣyaṃ yo jano mama san-ni-dhim ā-gacchati sa jātu kṣudhārto na bhaviṣyati |

६-३६ मां दृष्ट्वापि यूयं न विश्वसिथ युष्मानहमित्यवोचम्।

6-36 māṃ dṛṣṭvāpi yūyaṃ na vi-śvasitha yuṣmān_aham ity_avocam |

६-३७ पिता मह्यं यावतो लोकानददात्ते सर्व एव ममान्तिकमागमिष्यन्ति यः कश्चिच्च मम सन्निधिमायास्यति तं केनापि प्रकारेण न दूरीकरिष्यामि।

6-37 pitā mahyaṃ yāvato lokān_adadāt te sarva eva mamāntikam ā-gamiṣyanti yaḥ kaś-cic_ca mama san-ni-dhim ā-yāsyati taṃ kenāpi pra-kāreṇa na dūrī-kariṣyāmi |

६-३८ निजाभिमतं साधयितुं न हि किंतु प्रेरयितुरभिमतं साधयितुं स्वर्गादागतोऽस्मि।

6-38 nijābhimataṃ sādhayituṃ na hi kiṃ_tu prerayitur_abhimataṃ sādhayituṃ svargād ā-gato'smi |

६-३९ स यान्यान्लोकान्मह्यमददात्तेषामेकमपि न हारयित्वा शेषदिने सर्वानहमुत्थापयामि। इदं मत्प्रेरयितुः पितुरभिमतम्।

6-39 sa yān yān lokān mahyam_adadāt teṣām_ekam_api na hārayitvā śeṣa-dine sarvān_aham ut-thāpayāmi | idaṃ mat-prerayituḥ pitur_abhi-matam |

६-४० यः कश्चिन्मानवसुतं विलोक्य विश्वसिति स शेषदिने मयोत्थापितः सननन्तायुः प्राप्स्यति इति मत्प्रेरकस्याभिमतम्।

6-40 yaḥ kaś_cin mānava-sutaṃ vi-lokya vi-śvasiti sa śeṣa-dine mayotthāpitaḥ san anantāyuḥ prāpsyati iti mat-prerakasyābhi-matam |

६-४१ तदा स्वर्गाद्यद्भक्षमवारोहत्तद्भक्ष्यमहमेव यिहूदीयलोकास्तस्यैतद्वाक्ये विवदमाना वक्तुमारेभिरे।

6-41 tadā svargād yad bhakṣam avārohat tad bhakṣyam aham_eva yihūdīya-lokās_tasyaitad-vākye vi-vadamānā vaktum_ā-rebhire |

६-४२ यूषफः पुत्रो यीशुर्यस्य मातापितरौ वयं जानीम एष किं स एव न तर्हि स्वर्गादवारोहमिति वाक्यं कथं वक्ति

6-42 yūṣaphaḥ putro yīśur_yasya mātāpitarau vayaṃ jānīma eṣa kiṃ sa eva na? tarhi svargād avāroham iti vākyaṃ kathaṃ vakti?

६-४३ तदा यीशुस्तान्प्रत्यवदत्परस्परं मा विवदध्वं

6-43 tadā yīśus_tān praty-avadat paras-paraṃ mā vi-vadadhvaṃ

६-४४। मत्प्रेरकेण पित्रा नाकृष्टः कोऽपि जनो ममान्तिकमायातुं न शक्नोति। किंत्वागतं जनं चरमेऽह्नि प्रोत्थापयिष्यामि।

6-44 | mat-prerakeṇa pitrā nākṛṣṭaḥ ko'pi jano mamāntikam āyātuṃ na śaknoti | kiṃ_tv_ā-gataṃ janaṃ carame'hni protthāpayiṣyāmi |

६-४५ ऽते सर्व ईश्वरेण शिक्षिता भविष्यन्तिऽ भविष्यद्वादिनां ग्रन्थेषु लिपिरित्थमास्ते। अतो यः कश्चित्पितुः सकाशात्श्रुत्वा शिक्षते स एव मम समीपमागमिष्यति।

6-45 'te sarva īśvareṇa śikṣitā bhaviṣyanti' bhaviṣyad-vādināṃ grantheṣu lipir_ittham_āste | ato yaḥ kaś_cit pituḥ sa-kāśāt śrutvā śikṣate sa eva mama sam-īpam ā-gamiṣyati |

६-४६ य ईश्वरादजायत तं विना कोल्पि मनुष्यो जनकं नादर्शत केवलः स एव तातमद्राक्षीत्।

6-46 ya īśvarād ajāyata taṃ vinā koḷpi manuṣyo janakaṃ nādarśata kevalaḥ sa eva tātam adrākṣīt |

६-४७ अहं युष्मान्यथार्थतरं वदामि यो जनो मयि विश्वासं करोति सोऽनन्तायुः प्राप्नोति।

6-47 ahaṃ yuṣmān yathārthataraṃ vadāmi yo jano mayi vi-śvāsaṃ karoti so'nantāyuḥ prāpnoti |

६-४८ अहमेव तज्जीवनभक्ष्यं।

6-48 aham_eva taj-jīvana-bhakṣyaṃ |

६-४९ युष्माकं पूर्वपुरुषा महाप्रान्तरे मान्नाभक्ष्यं भुक्त्वापि मृताः।

6-49 yuṣmākaṃ pūrva-puruṣā mahā-prāntare mānnā-bhakṣyaṃ bhuktvāpi mṛtāḥ |

६-५० किंतु यद्भक्ष्यं स्वर्गादागच्छत्तद्यदि कश्चिद्भुङ्क्ते तर्हि स न म्रियते।

6-50 kiṃ_tu yad_bhakṣyaṃ svargād_āgacchat tad yadi kaś_cid bhuṅkte tarhi sa na mriyate |

६-५१ यज्जीवनभक्ष्यं स्वर्गादागच्छत्सोऽहमेव। इदं भक्ष्यं यो जनो भुङ्क्ते स नित्यजीवी भविष्यति। पुनश्च जगतो जीवनार्थमहं यत्स्वकीयपिशितं दास्यामि। तदेव मया वितरितं भक्ष्यम्।

6-51 yaj-jīvana-bhakṣyaṃ svargād_āgacchat so'ham_eva | idaṃ bhakṣyaṃ yo jano bhuṅkte sa nitya-jīvī bhaviṣyati | punaś_ca jagato jīvanārtham_ahaṃ yat svakīya-piśitaṃ dāsyāmi | tad_eva mayā vi-taritaṃ bhakṣyam |

६-५२ तस्माद्यिहूदीयाः परस्परं विवदमाना वक्तुमारेभिरे एष भोजनार्थं स्वीयं पललं कथमस्मभ्यं दास्यति

6-52 tasmād yihūdīyāḥ paras-paraṃ vivadamānā vaktum_ā-rebhire eṣa bhojanārthaṃ svīyaṃ palalaṃ katham asmabhyaṃ dāsyati?

६-५३ तदा यीशुस्तानवोचद्युष्मानहं यथार्थतरं वदामि। मनुष्यपुत्रस्यामिषे युष्माभिर्न भुक्ते तस्य रुधिरे च न पीते जीवनेन सार्द्धं युष्माकं सम्बन्धो नास्ति।

6-53 tadā yīśus_tān avocad yuṣmān_ahaṃ yathārthataraṃ vadāmi | manuṣyaputrasyāmiṣe yuṣmābhir_na bhukte tasya rudhire ca na pīte jīvanena sārddhaṃ yuṣmākaṃ sambandho nāsti |

६-५४ यो ममामिषं स्वादति मम रुधिरं च पिबति सोऽनन्तायुः प्राप्नोति ततः शेषेऽह्नि तमहमुत्थापयिष्यामि।

6-54 yo mamāmiṣaṃ svādati mama rudhiraṃ ca pibati so'nantāyuḥ prāpnoti tataḥ śeṣe'hni tam_aham ut-thāpayiṣyāmi |

६-५५ यतो मदीयमामिषम्परमं भक्ष्यं तथा मदीयं शोणितं परमं पेयम्।

6-55 yato madīyam_āmiṣam paramaṃ bhakṣyaṃ tathā madīyaṃ śoṇitaṃ paramaṃ peyam |

६-५६ यो जनो मदीयं पललं खादति मदीयं रुधिरं च पिबति स मयि वसति तस्मिन्नहं च वसामि।

6-56 yo jano madīyaṃ palalaṃ khādati madīyaṃ rudhiraṃ ca pibati sa mayi vasati tasminnahaṃ ca vasāmi ।

६-५७ मत्प्रेरयित्रा जीवता तातेन यथाहं जीवामि तद्वद्यः कश्चिन्मामत्ति सोऽपि मया जीविष्यति।

6-57 mat-prerayitrā jīvatā tātena yathāhaṃ jīvāmi tadvad yaḥ kaś_cin mām_atti so'pi mayā jīviṣyati ।

६-५८ यद्भक्ष्यम्स्वर्गादागच्छत्तदिदं यन्मान्नां खादित्वा युष्माकं पितरोऽम्रियन्त तादृशमिदं भक्ष्यं न भवति। इदं भक्ष्यं यो भक्षति स नित्यं जीविष्यति।

6-58 yad_bhakṣyam svargād_āgacchat tad_idaṃ yan_mānnāṃ khāditvā yuṣmākaṃ pitaro'mriyanta tādṛśam idaṃ bhakṣyaṃ na bhavati । idaṃ bhakṣyaṃ yo bhakṣati sa nityaṃ jīviṣyati ।

६-५९ यदा कफर्नाहूम्पुर्यां भजनगेहे उपादिशत्तदा कथा एता अकथयत्।

6-59 yadā kapharnāhūm-puryāṃ bhajana-gehe upādiśat tadā kathā etā akathayat ।

६-६० तदेत्तं श्रुत्वा तस्य शिष्याणामनेके परस्परमकथयन्। इदं गाढं वाक्यम्। वाक्यमीदृशं कः श्रोतुं शक्नुयात

6-60 tadettaṃ śrutvā tasya śiṣyāṇām aneke paras-param akathayan । idaṃ gāḍhaṃ vākyam । vākyam_īdṛśaṃ kaḥ śrotuṃ śaknuyāt?

६-६१ किंतु यीशुः शिष्याणामित्थं विवादं स्वचित्ते विज्ञाय कथितवान्। इदं वाक्यं किं युष्माकं विघ्नं जनयति

6-61 kiṃ_tu yīśuḥ śiṣyāṇām itthaṃ vi-vādaṃ sva-citte vi-jñāya kathitavān । idaṃ vākyaṃ kiṃ yuṣmākaṃ vi-ghnaṃ janayati?

६-६२ यदि मनुजसुतं पूर्ववासस्थानमूर्ध्वं गच्छन्तं पश्यथ तर्हि किं भविष्यति

6-62 yadi manuja-sutaM pūrva-vāsa-sthānam ūrdhvaṃ gacchantaṃ paśyatha tarhi kiṃ bhaviṣyati?

६-६३ आत्मैव जीवनदायकः वपुर्निष्फलं। युष्मभ्यमहं यानि वचांसि कथयामि तान्यात्मा जीवनंच।

6-63 ātmaiva jīvana-dāyakaḥ vapur_niṣphalaṃ । yuṣmabhyam ahaṃ yāni vacāṃsi kathayāmi tāny_ātmā jīvanaṃ_ca ।

६-६४ किंतु युष्माकं मध्ये केचन अविश्वासिनः सन्ति। के के न विश्वसन्ति को वा तं परकरेषु समर्पयिष्यति तान्यीशुराप्रथमाद्वेत्ति।

6-64 kiṃ_tu yuṣmākaṃ madhye ke_ca_na av-viśvāsinaḥ santi । ke ke na vi-śvasanti ko vā taṃ para-kareṣu sam-arpayiṣyati tān yīśur_āprathamād vetti ।

६-६५ अपरमपि कथितवानस्मात्कारणादकथयं पितुः सकाशात्शक्तिमप्राप्य कोऽपि ममान्तिकमागन्तुं न शक्नोति।

6-65 a-param_api kathitavān asmāt kāraṇād akathayaṃ pituḥ sa-kāśāt śaktim_aprāpya ko'pi mamāntikam ā-gantuṃ na śaknoti ।

६-६६ तत्काले ऽनेके शिष्या व्याघुट्य तेन सार्धं पुनर्नागच्छन्।

6-66 tat-kāle 'neke śiṣyā vy-ā-ghuṭya tena sārdhaṃ punar_nāgacchan ।

६-६७ तदा यीशुर्द्वादशशिष्यानुक्तवान्यूयमपि किं यास्यथ

6-67 tadā yīśur_dvā-daśa-śiṣyān uktavān yūyam_api kiṃ yāsyatha?

६-६८ ततः शिमोन्पितरः प्रत्यवोचथे प्रभो कस्याभ्यर्णं गमिष्यामः

6-68 tataḥ śimon-pitaraḥ praty-avocat he prabho kasyābhyarṇaṃ gamiṣyāmaḥ?

६-६९ अनन्तजीवनदायिन्यो याः कथास्तास्तवैव। भवानमरेश्वरस्याभिषिक्तपुत्र इति विश्वस्य निश्चितं जानीमः।

6-69 ananta-jīvana-dāyinyo yāḥ kathās_tās_tavaiva । bhavān amareśvarasyābhi-ṣikta-putra iti vi-śvasya niścitaṃ jānīmaḥ ।

६-७० तदा यीशुरवदत्। किमहं युष्माकं द्वादशजनान्मनोनीतान्न कृतवान् किंतु युष्माकं मध्येऽपि कश्चिदेको विघ्नकारी विद्यते।

6-70 tadā yīśur_avadat । kim_ahaṃ yuṣmākaṃ dvā-daśa-janān mano-nītān na kṛtavān? kiṃ_tu yuṣmākaṃ madhye'pi kaś_cid_eko vighna-kārī vidyate ।

६-७१ इमां कथां स शिमोनः पुत्रमीष्करीयोतीयं यिहूदामुद्दिश्य कथितवान्। यतो द्वादशानां मध्ये गणितः स तं परकरेषु समर्पयिष्यति।

6-71 imāṃ kathāṃ sa śimonaḥ putram īṣkarīyotīyaṃ yihūdām ud-diśya kathitavān | yato dvā-daśānāṃ madhye gaṇitaḥ sa taṃ para-kareṣu sam-arpayiṣyati |

७-१ ततः परं यिहूदीयलोकास्तं हन्तुं समैहन्त तस्माद्यीशुर्यिहूदाप्रदेशे पर्यटितुं नेच्छन्गालीलप्रदेशे पर्यटितुं प्रारभत।

7-1 tataḥ paraṃ yihūdīya-lokās_taṃ hantuṃ sam-aihanta tasmād yīśur_yihūdā-pradeśe pary-aṭituṃ necchan gālīl-pradeśe pary-aṭituṃ prārabhata |

७-२ किंतु तस्मिन्समये यिहूदीयानां दूष्यवासनामोत्सव उपस्थिते

7-2 kiṃ_tu tasmin sam-aye yihūdīyānāṃ dūṣya-vāsanāmotsava upasthite

७-३ तस्य भ्रातरस्तमवदन्यानि कर्माणि त्वया क्रियन्ते तानि यथा तव शिष्याः पश्यन्ति तदर्थं त्वमितः स्थानाद्यिहूदीयदेशं व्रज।

7-3 tasya bhrātaras_tam avadan yāni karmāṇi tvayā kriyante tāni yathā tava śiṣyāḥ paśyanti tad-arthaṃ tvam_itaḥ sthānād yihūdīya-deśaṃ vraja |

७-४ यः कश्चित्स्वयं प्रचिकाशिषति स कदापि गुप्तं कर्म न करोति। यदीदृशं कर्म करोषि तर्हि जगतो निजं परिचायय।

7-4 yaḥ kaś_cit svayaṃ pracikāśiṣati sa kadāpi guptaṃ karma na karoti | yadīdṛśaṃ karma karoṣi tarhi jagato ni-jaṃ paricāyaya |

७-५ यतस्तस्य भ्रातरोऽपि तं न विश्वसन्ति।

7-5 yatas_tasya bhrātaro'pi taṃ na vi-śvasanti |

७-६ तदा यीशुस्तानवोचत्मम समय इदानीं नोपतिष्ठति किंतु युष्माकं समयः सततमुपतिष्ठति।

7-6 tadā yīśus_tān avocat mama sam-aya idānīṃ nopatiṣṭhati kiṃ_tu yuṣmākaṃ sam-ayaḥ sa-tatam upa-tiṣṭhati |

७-७ जगतो लोका युष्मानृतीयितुं न शक्नुवन्ति किंतु मामेव ऋतीयन्ते यतस्तेषां कर्माणि दुष्टानि तत्र साक्ष्यमिदमहं ददामि।

7-7 jagato lokā yuṣmān ṛtīyituṃ na śaknuvanti kiṃ_tu mām_eva ṛtīyante yatas_teṣāṃ karmāṇi duṣṭāni tatra sākṣyam_idam ahaṃ dadāmi |

७-८ अत एव यूयमुत्सवे ऽस्मिन्यात नाहमिदानीमस्मिन्नुत्सवे यामि यतो मम समय इदानीं न सम्पूर्णः।

7-8 ata eva yūyam ut-save 'smin yāta, nāham idānīm asminnutsave yāmi yato mama sam-aya idānīṃ na sam-pūrṇaḥ |

७-९ इति वाक्यमुक्त्वा स गालीलि स्थितवान्।

7-9 iti vākyam uktvā sa gālīli sthitavān |

७-१० किंतु तस्य भ्रातृषु तत्र प्रस्थितेषु सत्सु सो ऽप्रकट उत्सवमगच्छत्।

7-10 kiṃ_tu tasya bhrātṛṣu tatra pra-sthiteṣu satsu so 'prakaṭa ut-savam agacchat |

७-११ अनन्तरमुत्सवमुपस्थिता यिहूदीयास्तं मृगयित्वापृच्छन्स कुत्र

7-11 anantaram ut-savam upa-sthitā yihūdīyās_taṃ mṛgayitvāpṛcchan sa kutra?

७-१२ ततो लोकानां मध्ये तस्मिन्नानाविधा विवादा भवितुमारब्धवन्तः। केचिदवोचन्स उत्तमः पुरुषः केचिदचिचन्न तथा वरं लोकानां भ्रमं जनयति।

7-12 tato lokānāṃ madhye tasmin nānā-vidhā vi-vādā bhavitum ārabdhavantaḥ | ke_cid avocan sa uttamaḥ puruṣaḥ ke_cid acican na tathā varaṃ lokānāṃ bhramaṃ janayati |

७-१३ किंतु यिहूदीयानां भयात्कोऽपि तस्य पक्षे स्पष्टं नाकथयत्।

7-13 kiṃ_tu yihūdīyānāṃ bhayāt ko'pi tasya pakṣe spaṣṭaṃ nākathayat |

७-१४ ततः परमुत्सवस्य मध्यसमये यीशुर्मन्दिरं गत्वा समुपदिशति स्म।

7-14 tataḥ param ut-savasya madhya-samaye yīśur_mandiraṃ gatvā sam-upa-diśati sma |

७-१५ ततो यिहूदीया लोका आश्चर्यं ज्ञात्वाकथयन्। एष मानुषो नाधीत्य कथमेतादृशो विद्वानभूत

7-15 tato yihūdīyā lokā āścaryaṃ jñātvākathayan | eṣa mānuṣo nādhītya katham etādṛśo vidvān_abhūt?

७-१६ तदा यीशुः प्रत्यवोचदुपदेशो ऽयन्न मम किंतु यो मां प्रेषितवान्तस्य।

7-16 tadā yīśuḥ praty-avocad upa-deśo 'yam na mama kiṃ_tu yo māṃ preṣitavān tasya |

७-१७ यो जनो निदेशं ग्रहीष्यति ममोपदेशो मत्तो भवति किमीश्वराद्भवति स जनस्तज्ज्ञातुं शक्ष्यति।

7-17 yo jano ni-deśaṃ grahīṣyati mamopadeśo matto bhavati kim īśvarād bhavati sa janas_taj_jñātuṃ śakṣyati |

७-१८ यो जनः स्वतः कथयति स स्वीयं गौरवमीहते किंतु यः प्रेरयितुर्गौरवमीहते स सत्यवादी तस्मिन्कोऽप्यधर्मो नास्ति।

7-18 yo janaḥ svataḥ kathayati sa svīyaṃ gauravam īhate kiṃ_tu yaḥ prerayitur_gauravam īhate sa satya-vādī tasmin ko'py_adharmo nāsti |

७-१९ मूसा युष्मभ्यं व्यवस्थाग्रन्थं किं नाददात् किंतु युष्माकं कोऽपि तां व्यवस्थां न समाचरति। मां हन्तुं कुतो यतध्वे

7-19 mūsā yuṣmabhyaṃ vyavasthā-granthaṃ kiṃ nādadāt? kiṃ_tu yuṣmākaṃ ko'pi tāṃ vyava-sthāṃ na sam-ā-carati | māṃ hantuṃ kuto yatadhve?

७-२० तदा लोका अवदन्त्वं भूतग्रस्तस्त्वां हन्तुं को यतते

7-20 tadā lokā avadan tvaṃ bhūta-grastas_tvāṃ hantuṃ ko yatate?

७-२१ ततो यीशुरवोचदेकं कर्म मयाकारि तस्माद्यूयं सर्वे महाश्चर्यं मन्यध्वे।

7-21 tato yīśur_avocad ekaṃ karma mayākāri tasmād yūyaṃ sarve mahāścaryaṃ manyadhve |

७-२२ मूसा युष्मभ्यं त्वक्छेदविधिं प्रददौ। स मूसातो न जातः किंतु पितृपुरुषेभ्यो जातः। तेन विश्रामवारे ऽपि मानुषाणां त्वक्छेदं कुरुथ।

7-22 mūsā yuṣmabhyaṃ tvak-cheda-vidhiṃ pra-dadau | sa mūsāto na jātaḥ kiṃ_tu pitṛ-puruṣebhyo jātaḥ | tena viśrāma-vāre 'pi mānuṣāṇāṃ tvak-chedaṃ kurutha |

७-२३ अत एव विश्रामवारे मनुष्याणां त्वक्छेदे कृते यदि मूसाव्यवस्थालङ्घनं न भवति। तर्हि मया विश्रामवारे मानुषः सम्पूर्णरूपेण स्वस्थो ऽकारि तत्कारणाद्यूयं किं मह्यं कुप्यथ

7-23 ata eva viśrāma-vāre manuṣyāṇāṃ tvak-chede kṛte yadi mūsā-vyavasthā-laṅghanaṃ na bhavati | tarhi mayā viśrāma-vāre mānuṣaḥ sampūrṇa-rūpeṇa sva-stho 'kāri tat-kāraṇād yūyaṃ kiṃ mahyaṃ kupyatha?

७-२४ सपक्षपातं विचारमकृत्वा न्याय्यं विचारं कुरुथ।

7-24 sa-pakṣa-pātaṃ vi-cāram_a-kṛtvā nyāyyaṃ vi-cāraṃ kurutha |

७-२५ तदा यिरूशालम्निवासिनः कतिपयजना अकथयन्। इमे यं हन्तुं चेष्टन्ते स एवायं किं न

7-25 tadā yirūśālam_ni-vāsinaḥ katipaya-janā akathayan | ime yaṃ hantuṃ ceṣṭante sa evāyaṃ kiṃ na?

७-२६ किंतु पश्यत निर्भयः सन्कथां कथयति तथापि किमपि न वदन्त्येते। अयमेवाभिषिक्तो भवतीति निश्चितं किमधिपतयो जानन्ति

7-26 kiṃ_tu paśyata nir-bhayaḥ san kathāṃ kathayati tathāpi kim_api na vadanty_ete | ayam_evābhi-ṣikto bhavatīti niś-citaṃ kim_adhipatayo jānanti?

७-२७ मनुजो ऽयं कस्मादागमदिति वयं जानीमः लिंत्वभिषिक्त आगते स कस्मादागतवानिति कोऽपि ज्ञातुं न शक्ष्यति।

7-27 manu-jo 'yaṃ kasmād_āgamad iti vayaṃ jānīmaḥ liṃ_tv_abhi-ṣikta ā-gate sa kasmād_ā-gatavān iti ko'pi jñātuṃ na śakṣyati |

७-२८ तदा यीशुर्मध्येमन्दिरमुपदिशनुच्चैःकारमुक्तवान्। यूयं किं मां जानीथ कस्माच्चागतो ऽस्मि तदपि किं जानीथ कस्माच्चागतो ऽस्मि तदपि किं जानीथ नाहं स्वत आगतोऽस्मि किंतु यः सत्यवादी स एव मां प्रेषितवान्। यूयं तं न जानीथ।

7-28 tadā yīśur_madhye-mandiram upa-diśan ucchaiḥ-kāram uktavān | yūyaṃ kiṃ māṃ jānītha? kasmāc_cāgato 'smi tad_api kiṃ jānītha? kasmāc_cāgato 'smi tad_api kiṃ jānītha? nāhaṃ svata ā-gato'smi kiṃ_tu yaḥ satya-vādī sa eva māṃ preṣitavān | yūyaṃ taṃ na jānītha |

७-२९ तमहं जाने तेनाहं प्रेरित आगतोऽस्मि।

7-29 tam_ahaṃ jāne tenāhaṃ prerita ā-gato'smi |

७-३० तस्माद्यिहूदीयास्तं धर्तुमुद्यतास्तथापि कोऽपि तस्य गात्रे हस्तं नार्पयद्यतो हेतोस्तदा तस्य समयो नोपतिष्ठति।

7-30 tasmād yihūdīyās_taṃ dhartum ud-yatās_tathāpi ko'pi tasya gātre hastaṃ nārpayad yato hetos_tadā tasya sam-ayo nopa-tiṣṭhati |

७-३१ किंतु बहवो लोकास्तस्मिन्विश्वस्य कथितवन्तो ऽभिषिक्तपुरुष आगत्य मानुष्यस्यास्य क्रियाभ्यः किमधिका आश्चर्याः क्रियाः करिष्यति

7-31 kiṃ_tu bahavo lokās_tasmin vi-śvasya kathitavanto 'bhi-ṣikta-puruṣa ā-gatya mānuṣyasyāsya kriyābhyaḥ kim adhikā āścaryāḥ kriyāḥ kariṣyati?

७-३२ ततः परं लोकास्तस्मिनित्थं विवदन्ते। फिरूशिनः प्रधानयाजकाश्चेति श्रुतवन्तस्तं धृत्वा नेतुं पदातिगणं प्रेषयामासुः।

7-32 tataḥ paraṃ lokās_tasmin itthaṃ vi-vadante | phirūśinaḥ pradhāna-yājakāś_ceti śrutavantas_taṃ dhṛtvā netuṃ padāti-gaṇaṃ preṣayām_āsuḥ |

७-३३ ततो यीशुरवददहमल्पदिनानि युष्माभिः सार्धं स्थित्वा मत्प्रेरयितुः समीपं यास्यामि।

7-33 tato yīśur_avadad aham alpa-dināni yuṣmābhiḥ sārdhaṃ sthitvā mat-prerayituḥ sam-īpaṃ yāsyāmi |

७-३४ मां मृगयिष्यद्ध्वे किंतूद्देशं न लप्स्यध्वे।

7-34 māṃ mṛgayiṣyaDhve kiṃ_tūd-deśaṃ na lapsyadhve |

७-३५ यत्र स्थास्यामि तत्र यूयं गन्तुं न शक्ष्यथ। तदा यिहूदीयाः परस्परं वक्तुमारेभिरे। अस्योद्देशं न प्राप्स्याम एतादृशं किं स्थानं यास्यति भिन्नदेशे विकीर्णाणां यिहूदीयानां सन्निधिमेष गत्वा तानुपदेक्ष्यति किं

7-35 yatra sthāsyāmi tatra yūyaṃ gantuṃ na śakṣyatha | tadā yihūdīyāḥ paras-paraṃ vaktum_ā-rebhire | asyod-deśaṃ na prāpsyāma etādṛśaṃ kiṃ sthānaṃ yāsyati? bhinna-deśe vi-kīrṇāṇāṃ yihūdīyānāṃ san-ni-dhim eṣa gatvā tān upa-dekṣyati kiṃ?

७-३६ नो चेत्मां गवेषयिष्यथे किंतूद्देशं न प्राप्स्यथ। एष कीदृशं वाक्यमिदं वदति

7-36 no cet māṃ gaveṣayiṣyathe kiṃ_tūd-deśaṃ na prāpsyatha | eṣa kīdṛśaṃ vākyam_idaṃ vadati?

७-३७ अनन्तरमुत्सवस्य चरमेऽहनि अर्थात्प्रधानदिने यीशुरुत्तिष्ठन्च्चैःकारमाह्वयनुदितवान्। यदि कश्चित्तृषार्तो भवति तर्हि ममान्तिकमागत्य पिबतु।

7-37 anantaram ut-savasya carame'hani arthāt pradhāna-dine yīśur_uttiṣṭhan gccaiḥ-kāram ā-hvayan uditavān | yadi kaś_cit tṛṣārto bhavati tarhi mamāntikam ā-gatya pibatu |

७-३८ यः कश्चिन्मयि विश्वसिति धर्मग्रन्थस्य वचनानुसारेण तस्याभ्यन्तरतो ऽमृततोयस्य स्रोतांसि निर्गमिष्यन्ति।

7-38 yaḥ kaś_cin_mayi vi-śvasiti dharma-granthasya vacanānu-sāreṇa tasyābhyantarato 'mṛtatoyasya srotāṃsi nir-gamiṣyanti |

७-३९ ये तस्मिन्विश्वसन्ति त आत्मानं प्राप्स्यन्तीत्यर्थे स इदं वाक्यं व्याहृतवान्। एतत्कालं यावद्यीशुर्विभवं न प्राप्तस्तस्मात्पवित्र आत्मा नादीयत।

7-39 ye tasmin vi-śvasanti ta ātmānaṃ prāpsyantīty_arthe sa idaṃ vākyaṃ vyāhṛtavān | etat-kālaṃ yāvad yīśur_vi-bhavaṃ na prāptas_tasmāt pavitra ātmā nādīyata |

७-४० एतां वाणीं श्रुत्वा बहवो लोका अवदनयमेव निश्चितं स भविष्यद्वादी।

7-40 etāṃ vāṇīṃ śrutvā bahavo lokā avadan ayam_eva niś-citaṃ sa bhaviṣyad-vādī |

७-४१ केचिदकथयनेष एव सो ऽभिषिक्तः। किंतु केचिदवदन्सो ऽभिषिक्तः किं गालील्प्रदेशे जनिष्यते

7-41 ke_cid akathayan eṣa eva so 'bhiṣiktaḥ | kiṃ_tu ke_cid avadan so 'bhi-ṣiktaḥ kiṃ gālīl-pradeśe janiṣyate?

७-४२ सो ऽभिषिक्तो दायूदो वंशे दायूदो जन्मस्थाने बैत्लेहमि पत्तने जनिष्यते धर्मग्रन्थे किमित्थं लिखितं नास्ति

7-42 so 'bhi-ṣikto dāyūdo vaṃśe dāyūdo janma-sthāne vaitlehami pattane janiṣyate dharma-granthe kim_itthaṃ likhitaṃ nāsti?

७-४३ इत्थं तस्मिन्लोकानां भिन्नवाक्याता जाता।

7-43 itthaṃ tasmin lokānāṃ bhinna-vākyātā jātā |

७-४४ कतिपयलोकास्तं धर्तुमैच्छन्तथापि तद्वपुषि कोऽपि हस्तं नार्पयत्।

7-44 katipaya-lokās_taṃ dhartum aicchan tathāpi tad-vapuṣi ko'pi hastaṃ nārpayat |

७-४५ अनन्तरं पदातिगणे प्रधानयाजकानां फिरूशिनां च समीपमागतवति ते तानपृच्छन्कुतो हेतोस्तं नानयत
7-45 anantaraṃ padāti-gaṇe pradhāna-yājakānāṃ phirūśināṃ ca sam-īpam_ā-gatavati te tān apṛcchan kuto hetos_taṃ nānayata?
७-४६ तदा पदातयः प्रत्यवदन्स मानव इव कोऽपि कदापि नोपादिशत्।
7-46 tadā padātayaḥ praty-avadan sa mānava iva ko'pi kadāpi nopādiśat |
७-४७ ततः फिरूशिनः प्रावोचन्यूयमपि किमभामिष्ट
7-47 tataḥ phirūśinaḥ prāvocan yūyam_api kim_abhāmiṣṭa?
७-४८ अधिपतीनां फिरूशिनां च कोऽपि किं तस्मिन्व्यश्वसीत
7-48 adhipatīnāṃ phirūśināṃ ca ko'pi kiṃ tasmin vy-aśvasīt?
७-४९ ये शास्त्रं न जानन्ति त इमे ऽधमलोका एव शापग्रस्ताः।
7-49 ye śāstraṃ na jānanti ta ime 'dhama-lokā eva śāpa-grastāḥ |
७-५० तदा निकदीमनामा तेषामेको यः क्षणदायां यीशोः सन्निधिमगात्स उक्तवान्।
7-50 tadā nikadīma-nāmā teṣām_eko yaḥ kṣaṇa-dāyāṃ yīśoḥ san-ni-dhim agāt sa uktavān |
७-५१ तस्य वाक्ये न श्रुते कर्मणि च न विदिते।स्माकं व्यवस्था किं कंचन मनुजं दोषीकरोति
7-51 tasya vākye na śrute karmaṇi ca na vidite lsmākaṃ vy-ava-sthā kiṃ kaṃ_ca_na manu-jaṃ doṣī-karoti?
७-५२ ततस्ते व्याहरन्। त्वमपि किं गालीलीयलोकः विविच्य पश्य गालीलि कोऽपि भविष्यद्वादी नोत्पद्यते।
7-52 tatas_te vy-āharan | tvam_api kiṃ gālīlīya-lokaḥ? vivicya paśya gālīli ko'pi bhaviṣyad-vādī notpadyate |
७-५३ ततः परं सर्वे स्वं स्वं गृहं गताः। किंतु यीशुर्जैतुननामानं शिलोच्चयं गतवान्।
7-53 tataḥ paraṃ sarve svaṃ svaṃ gṛhaṃ gatāḥ | kiṃ_tu yīśur_jaituna-nāmānaṃ śiloccayaṃ gatavān |
८-१ प्रत्यूषे यीशुः पुनर्मन्दिरमागच्छत्।
8-1 praty-ūṣe yīśuḥ punar_mandiram āgacchat |
८-२ ततः सर्वेषु लोकेषु तस्य समीप आगतेषु स उपविश्य तानुपदेष्टुमारभत।
8-2 tataḥ sarveṣu lokeṣu tasya sam-īpa āgateṣu sa upaviśya tān upadeṣṭum ārabhata |
८-३ तदा अध्यापकाः फिरूशिनश्च व्यभिचारकर्मणि धृतां स्त्रितमेकामानीय सर्वेषां मध्ये स्थापयित्वा व्याहरन्।
8-3 tadā adhy-āpakāḥ phirūśinaś_ca vyabhicāra-karmaṇi dhṛtāṃ stritam_ekām ā-nīya sarveṣāṃ madhye sthāpayitvā vyāharan |
८-४ हे गुरो योषितमिमां व्यभिचारकरमकुर्वाणां लोका धृतवन्तः।
8-4 he guro yoṣitam imāṃ vyabhicāra-karama-kurvāṇāṃ lokā dhṛtavantaḥ |
८-५ एतादृशलोकाः पाषाणाघातेन हन्तव्या इति विधिर्मूसाव्यवस्थाग्रन्थे लिखितोऽस्ति किंतु भवान्किमादिशति
8-5 etādṛśa-lokāḥ pāṣāṇā-ghātena hantavyā iti vi-dhir_mūsā-vyavasthā-granthe likhito'sti kiṃ_tu bhavān kim_ādiśati?
८-६ ते तमपवदितुं परीक्षाभिप्रायेण वाक्यमिदमपृच्छन्किंतु स प्रह्वीभूय भूमावङ्गुल्या लेखितुमारभत।
8-6 te tam apa-vaditum parīkṣābhiprāyeṇa vākyam_idam apṛcchan kiṃtu sa prahvī-bhūya bhūmāv_aṅgulyā lekhitum ārabhata |
८-७ ततस्तैः पुनः पुनः पृष्ट उत्थाय कथितवान्। युष्माकं मध्ये यो जनो निरपराधी स एव प्रथममेनां पाषाणेनाहन्तु।
8-7 tatas_taiḥ punaḥ punaḥ pṛṣṭa utthāya kathitavān | yuṣmākaṃ madhye yo jano nir-aparādhī sa eva prathamam enāṃ pāṣāṇenāhantu |
८-८ पश्चात्स पुनश्च प्रह्वीभूय भूमौ लेखितुमारभत।
8-8 paścāt sa punaś_ca prahvī-bhūya bhūmau lekhitum ārabhata |
८-९ तां कथां श्रुत्वा ते स्वस्वमनसि प्रबोधं प्राप्य ज्येष्ठानुक्रममेकैकशः सर्वे बहिरगच्छन्। ततो यीशुरेकाकी त्यक्तोऽभवत्मध्यस्थाने दण्डायमाना सा योषा च स्थिता।

8-9 tāṃ kathāṃ śrutvā te sva-sva-manasi pra-bodhaṃ prāpya jyeṣṭhānukramam ekaikaśaḥ sarve bahir_agacchan | tato yīśur_ekākī tyakto'bhavat madhya-sthāne daṇḍāyamānā sā yoṣā ca sthitā |

८-१० तत्पश्चाद्यीशुरुत्थाय तां वनितां विना कमप्यपरं न विलोक्य पृष्टवान्। हे वामे तवापवादकाः कुत्र कोऽपि त्वां किं न दण्डयति

8-10 tat-paścād yīśur_ut-thāya tāṃ vanitāṃ vinā kam_apy_aparaṃ na vi-lokya pṛṣṭavān | he vāme tavāpavādakāḥ kutra? ko'pi tvāṃ kiṃ na daṇḍayati?

८-११ सावदत्। हे महेच्छ कोऽपि न। तदा यीशुरवोचत्। नाहमपि दण्डयामि। याहि पुनः पापं माकार्षीः।

8-11 sāvadat | he maheccha ko'pi na | tadā yīśur_avocat | nāham_api daṇḍayāmi | yāhi punaḥ pāpaṃ mākārṣīḥ |

८-१२ ततो यीशुः पुनरपि लोकेभ्य इत्थं कथयितुमारभत। जगतो।हं ज्योतिःस्वरूपो यः कश्चिन्मत्पश्चाद्गच्छति स तिमिरे न भ्रमित्वा जीवनरूपां दीप्तिं प्राप्स्यति।

8-12 tato yīśuḥ punar_api lokebhya itthaṃ kathayitum ārabhata | jagato|haṃ jyotiḥ-svarūpo yaḥ kaś_cin mat-paścād gacchati sa timire na bhramitvā jīvana-rūpāṃ dīptiṃ prāpsyati |

८-१३ ततः फिरूशिनोऽवादिषुस्त्वां स्वार्थे स्वयं साक्ष्यं ददासि तस्मात्तव साक्ष्यं ग्राह्यं न भवति।

8-13 tataḥ phirūśino'vādiṣus_tvāṃ svārthe svayaṃ sākṣyaṃ dadāsi tasmāt tava sākṣyaṃ grāhyaṃ na bhavati |

८-१४ तदा यीशुः प्रत्युदितवान्। यद्यपि स्वार्थेऽहं स्वयं साक्ष्यं ददामि तथापि मत्साक्ष्यं ग्राह्यं यस्मादहं कुतागतोऽस्मि क्व यामि च तदहं जानामि। किंतु कुत आगतोऽस्मि कुत्र गच्छामि च तद्यूयं न जानीथ।

8-14 tadā yīśuḥ pratyuditavān | yady_api svārthe'haṃ svayaṃ sākṣyaṃ dadāmi tathāpi mat-sākṣyaṃ grāhyaṃ yasmād ahaṃ kut ā-gato'smi kva yāmi ca tad_ahaṃ jānāmi | kiṃ_tu kuta ā-gato'smi kutra gacchāmi ca tad yūyaṃ na jānītha |

८-१५ यूयं लौकिकं विचारयथ नाहं किमपि विचारयामि।

8-15 yūyaṃ laukikaṃ vi-cārayatha nāhaṃ kim_api vi-cārayāmi |

८-१६ किंतु यदि विचारयामि तर्हि मम विचारो ग्रहीतव्यो यतोऽहमेकाकी नास्मि प्रेरयिता पिता मया सह विद्यते।

8-16 kiṃ_tu yadi vi-cārayāmi tarhi mama vi-cāro grahītavyo yato'ham ekākī nāsmi prerayitā pitā mayā saha vidyate |

८-१७ द्वयोर्जनयोः साक्ष्यं ग्रहणीयं भवतीति युष्माकं व्यवस्थाग्रन्थे लिखितमस्ति।

8-17 dvayor_janayoḥ sākṣyaṃ grahaṇīyaṃ bhavatīti yuṣmākaṃ vyavasthā-granthe likhitam_asti |

८-१८ अहं स्वार्थे स्वयं साक्षित्वं ददामि यश्च मम तातो मां प्रेरितवान्सोऽपि मदर्थे साक्ष्यं ददाति।

8-18 ahaṃ svārthe svayaṃ sākṣitvaṃ dadāmi yaś_ca mama tāto māṃ preritavān so'pi mad-arthe sākṣyaṃ dadāti |

८-१९ तदा ते।पृच्छन्तव तातः कुत्र ततो यीशुः प्रत्यवादीद्यूयं मां न जानीथ मत्पितरश्च न जानीथ। यदि मामज्ञास्यत तर्हि मम तातमप्यज्ञास्यत।

8-19 tadā te|pṛcchan tava tātaḥ kutra? tato yīśuḥ praty-avādīd yūyaṃ māṃ na jānītha mat-pitaraś_ca na jānītha | yadi māṃ ajñāsyata tarhi mama tātam_apy_ajñāsyata |

८-२० यीशुर्मन्दिर उपदिश्य भाण्डागारे कथा एता अकथयत्तथापि तं प्रति कोऽपि करं नोदतोलयत्।

8-20 yīśur_mandira upa-diśya bhāṇḍāgāre kathā etā akathayat tathāpi taṃ prati ko'pi karaṃ nodatolayat |

८-२१ ततः परं यीशुः पुनरुदितवानधुनाहं गच्छामि यूयं मां गवेषयिष्यथ किंतु निजैः पापैर्मरिष्यथ यत्स्थानमहं यास्यामि तत्स्थानं यूयं यातुं न शक्ष्यथ।

8-21 tataḥ paraṃ yīśuḥ punar_uditavān adhunāhaṃ gacchāmi yūyaṃ māṃ gaveṣayiṣyatha kiṃtu ni-jaiḥ pāpair_mariṣyatha yat-sthānam ahaṃ yāsyāmi tat-sthānaṃ yūyaṃ yātuṃ na śakṣyatha |

८-२२ तदा यिहूदीयाः प्रावोचन्किमयमात्मघातं करिष्यति यतो यत्स्थानमहं यास्यामि तत्स्थानं यूयं यातुं न शक्ष्यथ इति वाक्यं ब्रवीति।

8-22 tadā yihūdīyāḥ prāvocan kim_ayam ātma-ghātaṃ kariṣyati? yato yat sthānam ahaṃ yāsyāmi tat sthānaṃ yūyaṃ yātuṃ na śakṣyatha iti vākyaṃ bravīti l

८-२३ ततो तीशुस्तेभ्यः कथितवान्। यूयमधःस्थानीया लोका अहमूर्ध्वस्थानीयः। यूयमेतज्जगत्सम्बन्धीया अहमेतज्जगत्सम्बन्धीयो न।

8-23 tato tīśus_tebhyaḥ kathitavān l yūyam adhaḥ-sthānīyā lokā aham ūrdhva-sthānīyaḥ l yūyam etaj-jagat-sambandhīyā aham etaj-jagat-sambandhīyo na l

८-२४ तस्मात्कथितवान्यूयं निजैः पापैर्मरिष्यथ। यतोऽहं स पुमानिति यदि न विश्वसिथ तर्हि निजैः पापैर्मरिष्यथ।

8-24 tasmāt kathitavān yūyaṃ ni-jaiḥ pāpair_mariṣyatha l yato'haṃ sa pumān iti yadi na viśvasitha tarhi ni-jaiḥ pāpair_mariṣyatha l

८-२५ तदा ते ऽपृच्छन्कस्त्वाम् ततो यीशुः कथितवान्युष्माकं सन्निधौ यस्य प्रस्तावमा प्रथमात्करोमि स एव पुरुषोऽहम्।

8-25 tadā te 'pṛcchan kas_tvām? tato yīśuḥ kathitavān yuṣmākaṃ san-ni-dhau yasya prastāvam ā prathamāt karomi sa eva puruṣo'ham l

८-२६ युष्मासु मया हबुवाक्यं वक्तव्यं विचारयितव्यं च। किंतु मत्प्रेरयिता सत्यवादी तस्य समीपे यदहं श्रुतवान्तदेव जगते कथयामि।

8-26 yuṣmāsu mayā habu-vākyaṃ vaktavyaṃ vicārayitavyaṃ ca l kiṃtu mat-prerayitā satya-vādī tasya sam-īpe yad_ahaṃ śrutavān tad_eva jagate kathayāmi l

८-२७ किंतु स जनके वाक्यमिदं प्रोक्तवानिति ते नाबुध्यन्त।

8-27 kiṃ_tu sa janake vākyam_idaṃ proktavān iti te nābudhyanta l

८-२८ ततो यीशुरकथयद्। यदा मनुष्यपुत्रमूर्ध्व ङ्क्ष्फ्त्थापयिष्यथ तदाहं स पुमान्केवलः स्वयं किमपि कर्म न करोमि किंतु तातो यथा शिक्षयति तदनुसारेण वाक्यमिदं वदामीति च यूयं ज्ञातुं श्क्ष्यथ।

8-28 tato yīśur_akathayad l yadā manuṣya-putram ūrdhva ft-thāpayiṣyatha tadāhaṃ sa pumān kevalaḥ svayaṃ kim_api karma na karomi kiṃ_tu tāto yathā śikṣayati tad-anusāreṇa vākyam_idaṃ vadāmīti ca yūyaṃ jñātuṃ śkṣyatha l

८-२९ मत्प्रेरयिता पिता मामेकाकिनं न त्यजति स मया सार्धं तिष्ठति यतोऽहं तदभिमतं कर्म सदा करोमि।

8-29 mat-prerayitā pitā mām ekākinaṃ na tyajati sa mayā sārdhaṃ tiṣṭhati yato'haṃ tad-abhimataṃ karma sadā karomi l

८-३० तदा तस्यैतानि वाक्यानि श्रुत्वा बहवस्तस्मिन्व्यश्वसन्।

8-30 tadā tasyaitāni vākyāni śrutvā bahavas_tasmin vyaśvasan l

८-३१ तत्र ये यिहूदीया व्यश्वसन्यीशुस्तेभ्यो ऽकथयत्।

8-31 tatra ye yihūdīyā vyaśvasan yīśus_tebhyo 'kathayat l

८-३२ मम वाक्ये यदि यूयमास्थां कुरुथ तर्हि मम शिष्या भूत्वा सत्यत्वं ज्ञास्यथ। ततः सत्त्यया युष्माकं मोक्षो भविष्यति।

8-32 mama vākye yadi yūyam āsthāṃ kurutha tarhi mama śiṣyā bhūtvā satyatvaṃ jñāsyatha l tataḥ satytayā yuṣmākaṃ mokṣo bhaviṣyati l

८-३३ तदा ते प्रत्यवादिषुः। वयमिब्राहीमो वंशः कदापि कस्यापि दासा न जातास्तर्हि युष्माकं मुक्तिर्भविष्यतीति वाक्यं कथं ब्रवीषि

8-33 tadā te praty-avādiṣuḥ l vayam ibrāhīmo vaṃśaḥ kadāpi kasyāpi dāsā na jātās_tarhi yuṣmākaṃ muktir_bhaviṣyatīti vākyaṃ kathaṃ bravīṣi?

८-३४ तदा यीशुः प्रत्यवदद्। युष्मानहं यथार्थतरं वदामि। यः पापं करोति स पापस्य दासः।

8-34 tadā yīśuḥ praty-avadad l yuṣmān_ahaṃ yathārthataraṃ vadāmi l yaḥ pāpaṃ karoti sa pāpasya dāsaḥ l

८-३५ दासश्च निरन्तरं निवेशने न तिष्ठति किंतु पुत्रो निरन्तरं तिष्ठति।

8-35 dāsaś_ca nirantaraṃ ni-veśane na tiṣṭhati kiṃ_tu putro nirantaraṃ tiṣṭhati l

८-३६ अतः पुत्रो यदि युष्मान्मोचयति तर्हि नितान्तमेव मुक्ता भविष्यथ।

8-36 ataḥ putro yadi yuṣmān mocayati tarhi nitāntam_eva muktā bhaviṣyatha l

८-३७ यूयमिब्राहीमो वंश इत्यहं जानामि किंतु मम कथा युष्माकमन्तःकरणेषु स्थानं न प्राप्नुवन्ति तस्माद्धेतोर्मां हन्तुमीहध्वे।

8-37 yūyam ibrāhīmo vaṃśa ity_ahaṃ jānāmi kiṃ_tu mama kathā yuṣmākam antaḥ-karaṇeṣu sthānaṃ na prāpnuvanti tasmād_dhetor_māṃ hantum īhadhve ।

८-३८ अहं स्वपितुः समीपे यदपश्यं तदेव कथयामि। तथा यूयमपि स्वपितुः समीपे यदपश्यत तदेव कुरुध्वे।

8-38 ahaṃ sva-pituḥ sam-īpe yad_apaśyaṃ tad_eva kathayāmi । tathā yūyam_api sva-pituḥ sam-īpe yad_apaśyata tad_eva kurudhve ।

८-३९ तदा ते प्रत्यवोचनिब्राहीमस्माकं पिता ततो यीशुरकथयद्यदि यूयमिब्राहीमः सन्ताना अभविष्यत तर्हि इब्राहीम आचरणवदाचरिष्यत।

8-39 tadā te praty-avocan ibrāhīm asmākaṃ pitā tato yīśur_akathayad yadi yūyam ibrāhīmaḥ santānā abhaviṣyata tarhi ibrāhīma ācaraṇavad ācariṣyata ।

८-४० ईश्वरस्य मुखात्सत्यं वाक्यं श्रुत्वा युष्मान्ज्ञापयामि योऽहं तं मां हन्तुं चेष्टध्वे। इब्राहीमेतादृशं कर्म न चकार।

8-40 īśvarasya mukhāt satyaṃ vākyaṃ śrutvā yuṣmān jñāpayāmi yo'haṃ taṃ māṃ hantuṃ ceṣṭadhve । ibrāhīm etādṛśaṃ karma na cakāra ।

८-४१ यूयं स्वस्वपितुः कर्माणि कुरुथ। तदा तैरुक्तं न वयं जारजाता अस्माकमेक एव पितास्ति स एवेश्वरः।

8-41 yūyaṃ sva-sva-pituḥ karmāṇi kurutha । tadā tair_uktaṃ na vayaṃ jāra-jātā asmākam eka eva pitāsti sa eveśvaraḥ ।

८-४२ ततो यीशुना कथितमीश्वरो यदि युष्माकं तातोभविष्यत्तर्हि यूयं मयि प्रेमाकरिष्यत यतोऽहमीश्वरान्निर्गत्यागतोऽस्मि स्वतो नागतोऽहम्स मां प्राहिणोत्।

8-42 tato yīśunā kathitam īśvaro yadi yuṣmākaṃ tātobhaviṣyat tarhi yūyaṃ mayi premākariṣyata yato'ham īśvarān_nir-gatyāgato'smi svato nāgato'ham sa māṃ prāhiṇot ।

८-४३ यूयं मम वाक्यमिदं न बुध्यध्वे कुतः यतो यूयं ममोपदेशं सोढुं न शक्नुथ।

8-43 yūyaṃ mama vākyam_idaṃ na budhyadhve kutaḥ? yato yūyaṃ mamopa-deśaṃ soḍhuṃ na śaknutha ।

८-४४ यूयं शैतान्पितुः सन्ताना एतस्माद्युष्माकं पितुरभिलाषं पूरयथ। स आ प्रथमात्नरघाती तदन्तः सत्यत्वस्य लेशोऽपि नास्ति कारणादतः स सत्यतायां नातिष्ठत्। स यदा मृषा कथयति तदा निजस्वभावानुसारेणैव कथयति यतो स मृषाभाषी मृषोत्पादकश्च।

8-44 yūyaṃ śaitān-pituḥ santānā etasmād yuṣmākaṃ pitur_abhi-lāṣaṃ pūrayatha । sa ā prathamāt nara-ghātī tad-antaḥ satyatvasya leśo'pi nāsti kāraṇād_ataḥ sa satyatāyāṃ nātiṣṭhat । sa yadā mṛṣā kathayati tadā nija-svabhāvānusāreṇaiva kathayati yato sa mṛṣā-bhāṣī mṛṣotpādakaś_ca ।

८-४५ अहं तथ्यवाक्यं वदामि कारणादस्माद्यूयं मां न प्रतीथ।

8-45 ahaṃ tathya-vākyaṃ vadāmi kāraṇād_asmād yūyaṃ māṃ na pratītha ।

८-४६ मयि पापमस्तीति प्रमाणं युष्माकं को दातुं शक्नोति यदहं तथ्यवाक्यं वदामि तर्हि कुतो मां न प्रतीथ

8-46 mayi pāpam_astīti pra-māṇaṃ yuṣmākaṃ ko dātuṃ śaknoti? yad_ahaṃ tathya-vākyaṃ vadāmi tarhi kuto māṃ na pratītha?

८-४७ यः कश्चन ईश्वरीयो लोकः स ईश्वरीयकथायां मनो निधत्ते यूयमीश्वरीयलोका न भवथ तन्निदानात्तत्र न मनांसि निदध्वे।

8-47 yaḥ kaś_ca_na īśvarīyo lokaḥ sa īśvarīya-kathāyāṃ mano ni-dhatte yūyam īśvarīya-lokā na bhavatha tan-nidānāt tatra na manāṃsi ni-dadhve ।

८-४८ तदा यिहूदीयाः प्रत्यवादिषुः। त्वमेकः शोमिरोणीयो भूतग्रस्तश्च वयं किमिदं भद्रं नावादिष्म

8-48 tadā yihūdīyāḥ praty_avādiṣuḥ । tvamekaḥ śomiroṇīyo bhūta-grastaś_ca vayaṃ kim_idaṃ bhadraṃ nāvādiṣma?

८-४९ ततो यीशुः प्रत्यवादीन्नाहं भूतग्रस्तः किंतु निजतातं सम्मन्ये तस्माद्यूयं मामपमन्यध्वे।

8-49 tato yīśuḥ praty-avādīt nāhaṃ bhūta-grastaḥ kiṃ_tu nija-tātaṃ sam-manye tasmād yūyaṃ mām apa-manyadhve ।

८-५० अहं स्वसुखातिं न चेष्टे किंतु चेष्टिता विचारयिता चापर एक आस्ते।

8-50 ahaṃ sva-sukhātiṃ na ceṣṭe kiṃ_tu ceṣṭitā vi-cārayitā cāpara eka āste ।
८-५१ अहं युष्मभ्यमतीव यथार्थं कथयामि। यो नरो मदीयां वाचं मन्यते स कदाचन निधनं न द्रक्ष्यति।
8-51 ahaṃ yuṣmabhyam atīva yathārthaṃ kathayāmi । yo naro madīyāṃ vācaṃ manyate sa kadā_ca_na ni-dhanaṃ na drakṣyati ।
८-५२ यिहूदीयास्तमवदन्। त्वं भूतग्रस्त इतीदानीमवैष्म। इब्राहीम्भविष्यद्वादिनश्च सर्वे मृताः किंतु त्वं भाषसे यो नरो मम भारतीं गृह्णाति स जातु निधनाखादं न लप्स्यते।
8-52 yihūdīyās_tam_avadan । tvaṃ bhūta-grasta itīdānīm avaiṣma । ibrāhīm bhaviṣyad-vādinaś_ca sarve mṛtāḥ kiṃ_tu tvaṃ bhāṣase yo naro mama bhāratīṃ gṛhṇāti sa jātu nidhanākhādaṃ na lapsyate ।
८-५३ तर्हि त्वं किमस्माकं पूर्वपुरुषादिब्राहीमोऽपि महान् अस्मात्सोऽपि मृतः भविष्यद्वादिनोऽपि मृताः। स्वं स्वं कं पुमांसं मनुषे
8-53 tarhi tvaṃ kim asmākaṃ pūrva-puruṣād ibrāhīmo'pi mahān? asmāt so'pi mṛtaḥ bhaviṣyad-vādino'pi mṛtāḥ । svaṃ svaṃ kaṃ pumāṃsaṃ manuṣe?
८-५४ यीशुः प्रत्यवोचद्यद्यहं स्वं स्वयं सम्मन्ये तर्हि मम तत्सम्मननं किमपि न किंतु मम तातो यं यूयं स्वीयमीश्वरं भाषध्वे स एव मां सम्मनुते।
8-54 yīśuḥ praty-avocad yady_ahaṃ svaṃ svayaṃ sam-manye tarhi mama tat sam-mananaṃ kim_api na kiṃ_tu mama tāto yaṃ yūyaṃ svīyam īśvaraṃ bhāṣadhve sa eva māṃ sam-manute ।
८-५५ यूयं तं नावगच्छथ किंत्वहं तमवगच्छामीति वाक्यं यदि वदामि तर्हि यूयमिव मृषाभाषी भवामि। किंत्वहं तमवगच्छामि तदाज्ञामपि गृह्णामि।
8-55 yūyaṃ taṃ nāvagacchatha kiṃ_tv_ahaṃ tam_ava-gacchāmīti vākyaṃ yadi vadāmi tarhi yūyam_iva mṛṣā-bhāṣī bhavāmi । kiṃ_tv_ahaṃ tam_avagacchāmi tad-ā-jñām_api gṛhṇāmi ।
८-५६ युष्माकं पूर्वपुरुष इब्राहीम्मम समयं द्रष्टुमतीवावाञ्छत्तन्निरीक्ष्यानन्दच्च।
8-56 yuṣmākaṃ pūrva-puruṣa ibrāhīm mama sam-ayaṃ draṣṭum atīvāvāñchat tan-nirīkṣyānandac_ca ।
८-५७ तदा यिहूदीया अपृच्छन्तव वयः पञ्चाशद्वत्सरा न। त्वं किमिब्राहीममद्राक्षीः
8-57 tadā yihūdīyā apṛcchan tava vayaḥ pañcāśad-vatsarā na । tvaṃ kim ibrāhīmam adrākṣīḥ?
८-५८ यीशुः प्रत्यवादीद्युष्मानहं यथार्थतरं वदामि इब्राहीमो जन्मनः पूर्वकालमारभ्याहं विद्ये।
8-58 yīśuḥ praty-avādīd yuṣmān_ahaṃ yathārthataraṃ vadāmi ibrāhīmo janmanaḥ pūrva-kālam_ārabhyāhaṃ vidye ।
८-५९ तदा ते पाषाणानुत्तोल्य तमाहन्तुमुदयच्छन्किंतु यीशुर्गुप्तो मन्दिराद्बगिर्गत्य तेषां मध्येन प्रस्थितवान्।
8-59 tadā te pāṣāṇān ut-tolya tam_ā-hantum ud-ayacchan kiṃ_tu yīśur_gupto mandirād bagir_gatya teṣāṃ madhyena pra-sthitavān ।
९-१ ततः परं यीशुर्गच्छन्मार्गमध्ये जन्मान्धं नरमपश्यत्।
9-1 tataḥ paraṃ yīśur_gacchan mārga-madhye janmāndhaṃ naram apaśyat ।
९-२ ततः शिष्यास्तमपृच्छन्। हे गुरो नरोऽयम्स्वपापेन वा स्वपित्रोः पापेनान्धोऽजायत
9-2 tataḥ śiṣyās_tam apṛcchan । he guro naroḷyam sva-pāpena vā sva-pitroḥ pāpenāndho'jāyata?
९-३ ततः स प्रत्युदितवान्। एतस्य वास्य पित्रोः पापादेतादृशोभूदिति न हि किंत्वनेन यथेश्वरस्य कर्म प्रकाश्यते तद्धेतोरेव।
9-3 tataḥ sa praty-uditavān । etasya vāsya pitroḥ pāpād etādṛśobhūd iti na hi kiṃ_tv_anena yatheśvarasya karma pra-kāśyate tad-dhetor_eva ।
९-४ दिने तिष्ठति मत्प्रेरयितुः कर्म मया कर्तव्यं यदा किमपि कर्म न क्रियते तादृशी निशागच्छति।
9-4 dine tiṣṭhati mat-prerayituḥ karma mayā kartavyaṃ yadā kim_api karma na kriyate tādṛśī niśā-gacchati ।
९-५ अहं यावत्कालं जगति तिष्ठामि तावत्कालं जगतो ज्योतिःस्वरूपोऽस्मि।

9-5 ahaṃ yāvat-kālaṃ jagati tiṣṭhāmi tāvat-kālaṃ jagato jyotiḥ-svarūpo'smi |

९-६ इत्युक्त्वा भूमौ निष्ठीवं निक्षिप्य तेन पङ्कं कृतवान्।

9-6 ity_uktvā bhūmau ni-ṣṭhīvaṃ ni-kṣipya tena paṅkaṃ kṛtavān |

९-७ पश्चात्तत्पङ्केन तस्यान्धस्य नेतेर्प्रलिप्य तमित्यादिशत्। गत्वा शिलोहे ऽर्थात्प्रेरितनाम्नि सरसि स्नाहि। ततो ऽन्धो गत्वा तत्रास्नात्ततः प्रसन्नचक्षुर्भूत्वा व्याघुट्यागात्।

9-7 paścāt tat-paṅkena tasyāndhasya neter pra-lipya tam_ity_ādiśat | gatvā śilohe 'rthāt prerita-nāmni sarasi snāhi | tato 'ndho gatvā tatrāsnāt tataḥ prasanna-cakṣur_bhūtvā vyāghuṭyāgāt |

९-८ अपरं च समीपवासिनो लोका ये च तं पूर्वमन्धमपश्यन्। ते वक्तुमारभन्त। योऽन्धलोको वर्त्मन्युपविश्याभिक्षत स एवायं जनः किं न भवति

9-8 aparaṃ ca samīpa-vāsino lokā ye ca taṃ pūrvam_andham apaśyan | te vaktum ārabhanta | yo'ndha-loko vartmany-upa-viśyābhikṣata sa evāyaṃ janaḥ kiṃ na bhavati?

९-९ केचिदवदन्स एव केचिदवोचन्तादृशो भवति किंतु स स्वयमब्रवीत्। स एवाहं भवामि।

9-9 ke_cid_avadan sa eva ke_cid_avocan tādṛśo bhavati kiṃ_tu sa svayam_abravīt | sa evāhaṃ bhavāmi |

९-१० अत एव ते ऽपृच्छन्त्वं कथं दृष्टिं प्राप्तवान्

9-10 ata eva te 'pṛcchan tvaṃ kathaṃ dṛṣṭiṃ prāptavān?

९-११ ततः सोऽवदद्यीशनामक एको कनो मम नयने पङ्जेन प्रलिप्य इत्याज्ञापयत्शिलोहकासारं गत्वा तत्र स्नाहि। ततस्तत्र गत्वा मयि स्नाते दृष्टिमहं लब्धवान्।

9-11 tataḥ so'vadad yīśa-nāmaka eko kano mama nayane paṅjena pra-lipya ity_ā-jñāpayat śilohakāsāraṃ gatvā tatra snāhi | tatas_tatra gatvā mayi snāte dṛṣṭim_ahaṃ labdhavān |

९-१२ तदा ते ऽवदन्स पुमान्कुत्र तेनोक्तं नाहं जानामि।

9-12 tadā te 'vadan sa pumān kutra? tenoktaṃ nāhaṃ jānāmi |

९-१३ अपरं तस्मिन्पूर्वान्धे जने फिरूशिनां निकटमानीते सति फिरूशिनोऽपि तमपृच्छन्कथं दृष्टिं प्राप्तोऽसि

9-13 aparaṃ tasmin pūrvāndhe jane phirūśināṃ ni-kaṭam ā-nīte sati phirūśino'pi tam_apṛcchan kathaṃ dṛṣṭiṃ prāpto'si?

९-१४ ततः स कथितवान्स पङ्केन मम नेत्रे ऽलिम्पत्पश्चात्स्नात्वा दृष्टिमलभे।

9-14 tataḥ sa kathitavān sa paṅkena mama netre 'limpat paścāt snātvā dṛṣṭim_alabhe |

९-१५ किंतु यीशुर्विश्रामवासरे कर्दमं कृत्वा तस्य नयने प्रसन्नेऽकरोदितिकारणात्कतिपयफिरूशिनोऽवदन्।

9-15 kiṃ_tu yīśur_viśrāma-vāsare kardamaṃ kṛtvā tasya nayane prasanne'karod iti-kāraṇāt katipaya-phirūśino'vadan |

९-१६ स पुमानीश्वरान्न। यतः स विश्रामवारं न मन्यते। ततोऽन्ये केचित्प्रत्यवदन्पापी पुमान्किमेतादृशमाश्चर्यं कर्म कर्तुं शक्नोति

9-16 sa pumān īśvarān_na | yataḥ sa viśrāma-vāraṃ na manyate | tato'nye ke_cit praty-avadan pāpī pumān kim etādṛśam āścaryaṃ karma kartuṃ śaknoti?

९-१७ इत्थं तेषां परस्परं भिन्नवाक्यत्वमभवत्। पश्चात्ते पुनरपि तं पूर्वान्धं मानुषमप्राक्षुः। यो जनस्तव चक्षुषी प्रसन्ने कृतवान्तस्मिन्त्वं वदसि स उक्तवान्स भविष्यद्वादी।

9-17 itthaṃ teṣāṃ paras-paraṃ bhinna-vākyatvam abhavat | paścāt te punar_api taṃ pūrvāndhaṃ mānuṣam aprākṣuḥ | yo janas_tava cakṣuṣī pra-sanne kṛtavān tasmin tvaṃ vadasi? sa uktavān sa bhaviṣyad-vādī |

९-१८ स दृ॑ष्टिमाप्तवानिति यिहूदीयास्तस्य दृष्टिं प्राप्तस्य जनस्य पित्रोर्मुखादश्रुत्वा न प्रत्ययन्।

9-18 sa dṝṣṭim āptavān iti yihūdīyās_tasya dṛṣṭiṃ prāptasya janasya pitror_mukhād aśrutvā na praty-ayan |

९-१९ अत एव ते तावपृच्छन्युवयोर्यं पुत्रं जन्मान्धं वदथः स किमयम् तर्हीदानीं कथं द्रष्टुं शक्नोति

9-19 ata eva te tāv_apṛcchan yuvayor_yaṃ putraṃ janmāndhaṃ vadathaḥ sa kim_ayam? tarhīdānīṃ kathaṃ draṣṭuṃ śaknoti?

९-२० ततस्तस्य पितरौ प्रत्यवोचताम्अयमावयोः पुत्र आ जनेरन्धश्च तदप्यावां जानीवः।

9-20 tatas_tasya pitarau praty-avocatām ayam āvayoḥ putra ā janer_andhaś_ca tad_apyāvāṃ jānīvaḥ ǀ

९-२१ किंत्वधुना कथं दृष्टिं प्राप्तवान्तदावां न जानीवः। कोऽस्य चक्षुषी प्रसन्ने कृतवान्तदपि न जानीव एष वयःप्राप्त एनं पृच्छत स्वकथां स्वयं वक्ष्यति।

9-21 kiṃ_tv_adhunā kathaṃ dṛṣṭiṃ prāptavān tadāvāṃ na jānīvaḥ ǀ ko'sya cakṣuṣī pra-sanne kṛtavān tad_api na jānīva eṣa vayaḥ-prāpta enaṃ pṛcchata sva-kathāṃ svayaṃ vakṣyati ǀ

९-२२ यिहूदीयानां भयात्तस्य पितरौ वाक्यमिदमवदतां यतः कोऽपि मनुष्यो यदि यीशुमभिषिक्तं वदति तर्हि स भजनगृहाद्दूरीकारिष्यते।

9-22 yihūdīyānāṃ bhayāt tasya pitarau vākyam_idam avadatāṃ yataḥ ko'pi manuṣyo yadi yīśum abhi-ṣiktaṃ vadati tarhi sa bhajana-gṛhād dūrī-kāriṣyate ǀ

९-२३ यिहूदीया इति मन्त्रणामकुर्वन्। अतस्तस्य पितरौ व्याहरतामेष वयःप्राप्त एनं पृच्छत।

9-23 yihūdīyā iti mantraṇām akurvan ǀ atas_tasya pitarau vyāharatām eṣa vayaḥ-prāpta enaṃ pṛcchata ǀ

९-२४ तदा ते पुनश्च तं पूर्वान्धमाहूय व्याहरनीश्वरस्य गुणान्वद। एष मनुष्यः पापीति वयं जानीमः।

9-24 tadā te punaś_ca taṃ pūrvāndham ā-hūya vyāharan īśvarasya guṇān vada ǀ eṣa manuṣyaḥ pāpīti vayaṃ jānīmaḥ ǀ

९-२५ तदा स उक्तवान्स पापी न वेति नाहं जाने। पूर्वमन्ध आसमहमधुना पश्यामीति मात्रं जानामि।

9-25 tadā sa uktavān sa pāpī na veti nāhaṃ jāne ǀ pūrvam_andha āsam_aham adhunā paśyāmīti mātraṃ jānāmi ǀ

९-२६ ते पुनरपृच्छन्स त्वां प्रति किमकरोत्

9-26 te punar_apṛcchan sa tvāṃ prati kim_akarot?

९-२७ कथं नेत्रे प्रसन्ने ऽकतोत् ततः सोऽवादीदेककृत्वोऽकथयं यूयं न शृणुथ तर्हि कुतः पुनः श्रोतुमिच्छथ यूयमपि किं तस्य शिष्या भवितुमिच्छथ

9-27 kathaṃ netre pra-sanne 'katot? tataḥ so'vādīd ekakṛtvo'kathayaṃ yūyaṃ na śṛṇutha tarhi kutaḥ punaḥ śrotum icchatha? yūyam_api kiṃ tasya śiṣyā bhavitum icchatha?

९-२८ तदा ते तं तिरस्कृत्य व्याहरन्त्वं तस्य शिष्यो वयं मूसाः शिष्याः।

9-28 tadā te taṃ tiras-kṛtya vyāharan tvaṃ tasya śiṣyo vayaṃ mūsāḥ śiṣyāḥ ǀ

९-२९ मूसावक्त्रेणेश्वरो जगाद तह्जानीमः किंत्वेष कुत्रत्यलोक इति न जानीमः।

9-29 mūsāvaktreṇeśvaro jagāda tah-jānīmaḥ kiṃ_tv_eṣa kutratya-loka iti na jānīmaḥ ǀ

९-३० सोऽवददेष मम लोक्चने प्रसन्ने ऽकरोत्तथापि कुत्रत्यलोक इति यूयं न जानीथ। एतदाश्चर्यं भवति।

9-30 so'vadad eṣa mama lokcane pra-sanne 'karot tathāpi kutratya-loka iti yūyaṃ na jānītha ǀ etad āścaryaṃ bhavati ǀ

९-३१ ईश्वरः पापिनां कथां न शृणोति। किंतु यो जनस्तस्मिन्भक्तिं कृत्वा तदिष्टक्तियां करोति तस्यैव कथां शृणोति। एतद्वयं जानीमः।

9-31 īśvaraḥ pāpināṃ kathāṃ na śṛṇoti ǀ kiṃtu yo janas_tasmin bhaktiṃ kṛtvā tad-iṣṭa-ktiyāṃ karoti tasyaiva kathāṃ śṛṇoti ǀ etad vayaṃ jānīmaḥ ǀ

९-३२ कोऽपि  मनुष्यो जन्मान्धाय चक्षुषी अददात्। जगदारम्भादेतादृशीं कथां कोऽपि कदापि नाशृणोत्।

9-32 ko'pi  manuṣyo janmāndhāya cakṣuṣī adadāt ǀ jagad-ārambhād etādṛśīṃ kathāṃ ko'pi kadāpi nāśṛṇot ǀ

९-३३ अस्मादेष मनुष्यो यदीश्वरान्नाजायत तर्हि किंचिदपीदृशं कर्म कर्तुं नाशक्नोत्।

9-33 asmād eṣa manuṣyo yadīśvarānnājāyata tarhi kiṃcid_apīdṛśaṃ karma kartuṃ nāśaknot ǀ

९-३४ ते व्याहरन्त्वं पापादजायथाः किमस्मान्त्वं शिक्षयसि पश्चात्ते तं बहिरकुर्वन्

9-34 te vyāharan tvaṃ pāpād ajāyathāḥ kim_asmān tvaṃ śikṣayasi? paścāt_te taṃ bahir_akurvan?

९-३५ तदनन्तरं यिहूदीयैः स बहिरक्रियत यीशुरितिवार्त्तां श्रुत्वा तं साक्षात्प्राप्य पृष्टवानीश्वरस्य पुत्रे त्वं विश्वसिषि

9-35 tad_anantaraṃ yihūdīyaiḥ sa bahir_akriyata yīśur_iti-vārttāṃ śrutvā taṃ sākṣāt prāpya pṛṣṭavān īśvarasya putre tvaṃ vi-śvasiṣi?

९-३६ तदा स प्रत्यवोचत्। हे प्रभो स को यत्तस्मिन्नहं विश्वसिमि

9-36 tadā sa praty-avocat | he pra-bho sa ko yat tasmin_nahaṃ vi-śvasimi?

९-३७ ततो यीशुः कथितवान्। त्वं तं दृष्टवान्त्वया साकं यः कथां कथयति स एव सः।

9-37 tato yīśuḥ kathitavān | tvaṃ taṃ dṛṣṭavān tvayā sākaṃ yaḥ kathāṃ kathayati sa eva saḥ |

९-३८ तदा हे प्रभो विश्वसिमीत्युक्त्वा स तं प्राणमत्।

9-38 tadā he pra-bho vi-śvasimIty_uktvā sa taṃ prāṇamat |

९-३९ पश्चाद्यीशुः कथितवान्नयनहीना नयनानि प्राप्नुवन्ति नयनवन्तश्चान्धा भवन्तीयुभिप्रायेण जगदहमागच्छम्।

9-39 paścād yīśuḥ kathitavān nayana-hīnā nayanāni prāpnuvanti nayanavantaś_cāndhā bhavantīyu_abhi-prāyeṇa jagad_aham ā-gaccham |

९-४० एतत्श्रुत्वा निकटस्थाः कतिपयाः फिरूशिनो व्याहरन्। वयमपि किमन्धाः

9-40 etat śrutvā nikaṭa-sthāḥ katipayāḥ phirūśino vyāharan | vayam api kim_andhāḥ?

९-४१ तदा यीशुरवादीद्यद्यन्धा अभवत तर्हि पापानि नातिष्ठन्किंतु पश्यामीति वाक्यवदनाद्युष्माकं पापानि तिष्ठन्ति।

9-41 tadā yīśur_avādīd yady_andhā abhavata tarhi pāpāni nātiṣṭhan kiṃtu paśyāmīti vākya-vadanād yuṣmākaṃ pāpāni tiṣṭhanti |

१०-१ अहं युष्मानतियथार्थं वदामि यो जनो द्वारेण न प्रविश्य केनाप्यन्येन मेषगृहं प्रविशति स एव स्तेनो दस्युश्च।

10-1 ahaṃ yuṣmān_ati-yathārthaṃ vadāmi yo jano dvāreṇa na praviśya kenāpy_anyena meṣa-gṛhaṃ pra-viśati sa eva steno dasyuś_ca |

१०-२ यो द्वारेण प्रविशति स एव मेषपालकः।

10-2 yo dvāreṇa pra-viśati sa eva meṣa-pālakaḥ |

१०-३ दौवारिकस्तस्मै द्वारं मोचयति मेषगणश्च तस्य वाक्यं शृणोति स निजान्मेषान्स्वस्वनाम्नाहूय बहिः कृत्वा नयति।

10-3 dauvārikas_tasmai dvāraṃ mocayati meṣa-gaṇaś_ca tasya vākyaṃ śṛṇoti sa ni-jān meṣān sva-sva-nāmnāhūya bahiḥ kṛtvā nayati |

१०-४ तथा निजान्मेषान्बहिः कृत्वा स्वयं तेषामग्रे गच्छति। ततो मेषास्तस्य शब्दं बुध्यन्ते तस्मात्तस्य पश्चाद्व्रजन्ति।

10-4 tathā ni-jān meṣān bahiḥ kṛtvā svayaṃ teṣām agre gacchati | tato meṣās_tasya śabdaṃ budhyante tasmāt tasya paścād vrajanti |

१०-५ किंतु परस्य शब्दं न बुध्यन्ते तस्मात्तस्य पश्चान्न ब्रजिष्यन्ति वरं त्सय समीपात्पलायिष्यन्ते।

10-5 kiṃ_tu parasya śabdaṃ na budhyante tasmāt tasya paścān_na brajiṣyanti varaṃ tsaya sam-īpāt palāyiṣyante |

१०-६ यीशुस्तेभ्य इमां दृष्टान्तकथामकथयत्किंतु तेन कथितकथायास्तात्पर्यं ते नाबुध्यन्त।

10-6 yīśus_tebhya imāṃ dṛṣṭānta-kathām akathayat kiṃ_tu tena kathita-kathāyās_tātparyaṃ te nābudhyanta |

१०-७ अतो यीशुः पुनरकथयत्। युष्मानहं यथार्थतरं व्याहरामि। मेषगृहस्य द्वारमहमेव।

10-7 ato yīśuḥ punar_akathayat | yuṣmān_ahaṃ yathārthataraṃ vy-ā-harāmi | meṣa-gṛhasya dvāram aham_eva |

१०-८ मया न प्रविश्य य आगच्छन्ते स्तेना दस्यवश्च किंतु मेसास्तेषां कथा नाशृण्वन्।

10-8 mayā na pra-viśya ya āgacchan te stenā dasyavaś_ca kiṃ_tu mesās_teṣāṃ kathā nāśṛṇvan |

१०-९ अहमेव द्वारस्वरूपः। मया यः कश्चित्प्रविशति स रक्षां प्राप्स्यति तथा बहिरन्तश्च गमनागमने कृत्वा चरणस्थानं प्राप्स्यति।

10-9 aham_eva dvāra-svarūpaḥ | mayā yaḥ kaś_cit pra-viśati sa rakṣāṃ prāpsyati tathā bahir-antaś_ca gamanāgamane kṛtvā caraṇa-sthānaṃ prāpsyati |

१०-१० यो जनस्तेनः स केवलं स्तैन्यबधविनाशान्कर्तुमेव समायाति किंत्वहमायुर्दातुमर्थात्बाहुल्येन तदेव दातुमागच्छम्।

10-10 yo jana-stenaḥ sa kevalaṃ stainya-badha-vināśān kartum_eva sam-ā-yāti kiṃ_tv_aham āyur_dātum arthāt bāhulyena tad_eva dātum āgaccham ।

१०-११ अहमेव सत्यमेषपालको यस्तु सत्यो मेषपालकः स मेषार्थं प्राणत्यागं करोति।

10-11 aham_eva satya-meṣa-pālako yas_tu satyo meṣa-pālakaḥ sa meṣārthaṃ prāṇa-tyāgaṃ karoti ।

१०-१२ किंतु यो जनो मेषपालको न। अर्थाद्यस्य मेषा निजा न भवन्ति। य एतादृशो वैतनिकः स वृकमागच्छन्तं दृष्ट्वा मेषव्रजं विहाय पलायते। तस्माद्वृकस्तं व्रजं धृत्वा विकिरति।

10-12 kiṃ_tu yo jano meṣa-pālako na । arthād yasya meṣā ni-jā na bhavanti । ya etādṛśo vaitanikaḥ sa vṛkam āgacchantaṃ dṛṣṭvā meṣa-vrajaṃ vi-hāya palāyate । tasmād vṛkas_taṃ vrajaṃ dhṛtvā vi-kirati ।

१०-१३ वैतनिकः पलायते यतः स वेतनार्थी मेषार्थं न चिन्तयति।

10-13 vaitanikaḥ palāyate yataḥ sa vetanārthī meṣārthaṃ na cintayati ।

१०-१४ अहमेव सत्यो मेषपालकः। पिता मां यथा जानाति अहं च यथा पितरं जानामि।

10-14 aham_eva satyo meṣa-pālakaḥ । pitā māṃ yathā jānāti ahaṃ ca yathā pitaraṃ jānāmi ।

१०-१५ तथा निजान्मेषानपि जानामि मेषाश्च मां जानान्ति। अहं मेषार्थं प्राणत्यागं करोमि।

10-15 tathā ni-jān meṣān_api jānāmi meṣāś_ca māṃ jānānti । ahaṃ meṣārthaṃ prāṇa-tyāgaṃ karomi ।

१०-१६ अपरं च एतद्गृहीयम्मेषेभ्यो भिन्ना अपि मेषा मम सन्ति ते सकला आनयितव्याः। ते मम शब्दं श्रोष्यन्ति तत एको व्रज एको रक्षको भविष्यति।

10-16 aparaṃ ca etad-gṛhīyam-meṣebhyo bhinnā api meṣā mama santi te sa-kalā ā-nayitavyāḥ । te mama śabdaṃ śroṣyanti tata eko vraja eko rakṣako bhaviṣyati ।

१०-१७ प्राणानहं त्यक्तवा पुनः प्राणान्ग्रहीष्यामि। तस्मात्पिता मयि स्नेहं करोति।

10-17 prāṇān_ahaṃ tyaktvā punaḥ prāṇān grahīṣyāmi । tasmāt pitā mayi snehaṃ karoti ।

१०-१८ कश्चिज्जनो मम प्राणान्हर्तुं न शक्नोति किंतु स्वयं तान्समर्पयामि तान्समर्पयितुं पुनर्ग्रहीत्यं च मम शक्तिरास्ते भारमिमं स्वपितुः सकाशात्प्राप्तो ऽहम्।

10-18 kaś_cij_jano mama prāṇān hartuṃ na śaknoti kiṃ_tu svayaṃ tān sam-arpayāmi tān sam-arpayituṃ punar-grahītyṃ ca mama śaktir_āste bhāram_imaṃ sva-pituḥ sa-kāśāt prāpto 'ham ।

१०-१९ अस्मादुपदेशात्पुनश्च यिहूदीयानां मध्ये भिन्नवाक्यता जाता।

10-19 asmād_upadeśāt punaś_ca yihūdīyānāṃ madhye bhinna-vākyatā jātā ।

१०-२० ततो बहवो व्याहरनेष भूतग्रस्त उन्मत्तश्च। कुत एतस्य कथां शृणुथ

10-20 tato bahavo vy-ā-haran eṣa bhūta-grasta un-mattaśca । kuta etasya kathāṃ śṛṇutha?

१०-२१ केचिदवदनेतस्य कथा भूतग्रस्तस्य कथावन्न भवन्ति। भूतः किमन्धाय चक्षुषी दातुं शक्नोति

10-21 ke_cid avadan etasya kathā bhūta-grastasya kathāvan_na bhavanti । bhūtaḥ kim andhāya cakṣuṣī dātuṃ śaknoti?

१०-२२ शीतकाले यिरूशालमि मन्दिरोत्सगपर्वण्युपस्थिते यीशुः सुलेमानो निःसरेण गमनागमने करोति।

10-22 śīta-kāle yirūśālami mandirotsaga-parvaṇy_upa-sthite yīśuḥ su-lemāno niḥ-sareṇa gamanāgamane karoti ।

१०-२३ एतस्मिन्समये यिहूदीयास्तं वेष्टयित्वा व्याहरन्

10-23 etasmin sam-aye yihūdīyās_taṃ veṣṭayitvā vy-ā-haran

१०-२४ कति कालानस्माकं विचिकित्सां स्थापयिष्यसि यद्यभिषिक्तो भवसि तर्हि तत्स्पष्टं वद।

10-24 kati kālān asmākaṃ vi-cikitsāṃ sthāpayiṣyasi? yady_abhi-ṣikto bhavasi tarhi tat spaṣṭaṃ vada ।

१०-२५ तदा यीशुः प्रत्यवददहमचकथं किंतु यूयं न प्रतीथ। निजपितुर्नाम्ना यां यां क्रियां करोमि सा क्रियैव मम साक्षिस्वरूपा।

10-25 tadā yīśuḥ praty_avadad aham acakathaṃ kiṃ_tu yūyaṃ na pratītha | nija-pitur_nāmnā yāṃ yāṃ kriyāṃ karomi sā kriyaiva mama sākṣi-svarūpā |

१०-२६ किंत्वहं पूर्वमकथयं यूयं मम मेषा न भवथ। कारणादस्मान्न विश्वसिथ।

10-26 kiṃ_tv_ahaṃ pūrvam_akathayaṃ yūyaṃ mama meṣā na bhavatha | kāraṇād_asmān na vi-śvasitha |

१०-२७ मम मेषा मम शब्दं शृण्वन्ति तानहं जानामि ते च मम पश्चाद्गच्छन्ति।

10-27 mama meṣā mama śabdaṃ śṛṇvanti tān_ahaṃ jānāmi te ca mama paścād gacchanti |

१०-२८ अहं तेभ्यो ऽनन्तायु ददामि। ते कदापि न्नंक्ष्यन्ति कोऽपि मम करात्तान्हर्तुं न शक्ष्यति।

10-28 ahaṃ tebhyo 'nantāyu dadāmi | te kadāpi n naṃkṣyanti ko'pi mama karāt tān hartuṃ na śakṣyati |

१०-२९ यो मम पिता तान्मह्यं दत्तवान्स सर्वस्मात्महान्। कोऽपि मम पितुः करात्तान्हर्तुं न शक्ष्यति।

10-29 yo mama pitā tān mahyaṃ dattavān sa sarvasmāt mahān | ko'pi mama pituḥ karāt tān hartuṃ na śakṣyati |

१०-३० अहं पिता च द्वयोरेकत्वम्।

10-30 ahaṃ pitā ca dvayor_ekatvam |

१०-३१ ततो यिहूदीयाः पुनरपि तं हन्तुं पाषाणानुदतोलयन्।

10-31 tato yihūdīyāḥ punar_api taṃ hantuṃ pāṣāṇān ud-atolayan |

१०-३२ यीशुः कथितवान्। पितुः सकाशाद्बहून्युत्तमकर्माणि युष्माकं समक्षं प्रकाशयं तेषां कस्य कर्मणः कारणान्मां पाषाणैराहन्तुमुद्यताः स्थ

10-32 yīśuḥ kathitavān | pituḥ sa-kāśād bahūny_uttama-karmāṇi yuṣmākaṃ sam-akṣaṃ prakāśayaṃ teṣāṃ kasya karmaṇaḥ kāraṇān māṃ pāṣāṇair_ā-hantum ud-yatāḥ stha?

१०-३३ यिहूदीयाः प्रत्यवदन्प्रशस्तकर्महेतोर्न किंतु त्वं मानुषः स्वमीश्वरम्

10-33 yihūdīyāḥ praty_avadan pra-śasta-karma-hetor_na kiṃ_tu tvaṃ mānuṣaḥ svam_īśvaram

१०-३४ तदा यीशुः प्रत्युक्तवान्मया कथितं यूयमीश्वरा एतद्वचनं युष्माकं शास्त्रे लिखितं नास्ति किम्

10-34 tadā yīśuḥ praty-uktavān mayā kathitaṃ yūyam īśvarā etad-vacanaṃ yuṣmākaṃ śāstre likhitaṃ nāsti kim?

१०-३५ तस्माद्येषामुद्देशे ईश्वरस्य कथा कथिता ते यदीश्वरगणा उच्यन्ते धर्मग्रन्थस्याप्यन्यथा भवितुं न शक्यं।

10-35 tasmād yeṣām ud-deśe īśvarasya kathā kathitā te yadīśvara-gaṇā ucyante dharma-granthasyāpy_anyathā bhavituṃ na śakyaṃ |

१०-३६ तर्ह्यहमीश्वरस्य पुत्र इति वाक्यस्य कथनात्यूयं पित्राभिषिक्तं जगति प्रेरितं च पुमांसं कथमीश्वरनिन्दकं वदथ

10-36 tarhy_aham īśvarasya putra iti vākyasya kathanāt yūyaṃ pitrābhi-ṣiktaṃ jagati preritaṃ ca pumāṃsaṃ katham īśvara-nindakaṃ vadatha?

१०-३७ यद्यहं पितुः कर्म न करोमि तर्हि मां न प्रतीतः।

10-37 yady_ahaṃ pituḥ karma na karomi tarhi māṃ na pratītaḥ |

१०-३८ किंतु यदि करोमि तर्हि मयि युष्माभिः प्रत्यये न कृतोऽपि कार्ये प्रत्ययः क्रियतां ततो मयि पितास्तीति पितर्यहमस्मीति च ज्ञात्वा विश्वसिष्यथ।

10-38 kiṃ_tu yadi karomi tarhi mayi yuṣmābhiḥ praty-aye na kṛto'pi kārye praty-ayaḥ kriyatāṃ tato mayi pitāstīti pitary_aham asmīti ca jñātvā vi-śvasiṣyatha |

१०-३९ तदा ते पुनरपि तं धर्तुमचेष्टन्त किंतु स तेषां करेभ्यो निस्तीर्य

10-39 tadā te punar_api taṃ dhartum aceṣṭanta kiṃ_tu sa teṣāṃ karebhyo nis-tīrya

१०-४० पुनर्यर्दन्नद्यास्तटे यत्र पूर्वं योहनमज्जयत्तत्रागत्य न्यवसत्।

10-40 punar_yardan-nadyās-taṭe yatra pūrvaṃ yohan amajjayat tatrāgatya ny-avasat |

१०-४१ ततो बहवो लोकास्तत्समीपमागत्य व्याहरन्योहन्किमप्याश्चर्यं कर्म नाकरोत्किंत्वस्मिन्मनुष्ये या याः कथा अकथयत्ताः सर्वाः सत्याः।

10-41 tato bahavo lokās_tat-samīpam ā-gatya vy-āharan yohan kim_apy_āścaryaṃ karma nākarot kiṃ_tv_asmin manuṣye yā yāḥ kathā akathayat tāḥ sarvāḥ satyāḥ |

१०-४२ तत्र च बहवो लोकास्तस्मिन्व्यश्वसन्।

10-42 tatra ca bahavo lokās_tasmin vy-aśvasan |

११-१ अनन्तरं मरियम्तस्या भगिनी मर्था च यस्मिन्बैथनीयाग्रामे वसतस्तस्मिन्ग्रामे इलियासर्नामा पीडित एक आसीत।

11-1 an-antaraṃ mariyam tasyā bhaginī marthā ca yasmin baithanīyā-grāme vasatas_tasmin grāme iliyāsar-nāmā pīḍita eka āsīta |

११-२ या मरियम्प्रभुं सुगन्धितेलैन मर्दयित्वा स्वकेशैस्तस्य चरणौ सममार्जत्तस्या भ्राता स इलियासर्रोगी।

11-2 yā mariyam pra-bhuṃ su-gandhi-telaina mardayitvā sva-keśais_tasya caraṇau sam-amārjat tasyā bhrātā sa iliyāsar rogī |

११-३ अपरं च हे प्रभो भवान्यस्मिन्प्रीयते स एव पीडीतोऽस्तीति कथां कथयित्वा तस्य भगिन्यौ प्रेषितवत्यौ।

11-3 a-paraṃ ca he pra-bho bhavān yasmin prīyate sa eva pīḍiito'stīti kathāṃ kathayitvā tasya bhaginyau preṣitavatyau |

११-४ तदा यीशुरिमां वार्त्तां श्रुत्वाकथयत पीडेयं मरणार्थं न किंत्वीश्वरस्य महिमार्थमीश्वरपुत्र्तस्य महिमप्रकाशार्थं च जाता।

11-4 tadā yīśur_imāṃ vārttāṃ śrutvākathayata pīḍeyaṃ maraṇārthaṃ na kiṃ_tv_īśvarasya mahimārtham īśvara-putrtasya mahima-prakāśārthaṃ ca jātā |

११-५ यीशुर्य्द्यद्यपि मर्थायां तद्भगिन्यामिलियासरि चाप्रीयत।

11-5 yīśur_yd_yady_api marthāyāṃ tad-bhaginyām iliyāsari cāprīyata |

११-६ तथापि इलियासरः पीडायाः कथां श्रुत्वा यत्र आसीत्तत्रैव दिनद्वयमतिष्ठत्।

11-6 tathāpi iliyāsaraḥ pīḍāyāḥ kathāṃ śrutvā yatra āsīt tatraiva dina-dvayam_atiṣṭhat |

११-७ ततः परं स शिष्यानकथयद्वयं पुनर्यिहूदीयप्रदेशं यामः।

11-7 tataḥ paraṃ sa śiṣyān_akathayad vayaṃ punar_yihūdīya-pradeśaṃ yāmaḥ |

११-८ ततस्ते प्रत्यवदन्। हे गुरो स्वल्पदिनानि गतानि यिहूदीयास्त्वां पाषाणैर्हन्तुमुद्यतास्तथापि किं पुनस्तत्र यास्यसि

11-8 tatas_te praty_avadan | he guro svalpa-dināni gatāni yihūdīyās_tvāṃ pāṣāṇair_hantum ud-yatās_tathāpi kiṃ punas_tatra yāsyasi?

११-९ यीशुः प्रत्यवदत्। एकस्मिन्दिने किं द्वादशघटिका न भवन्ति कोऽपि दिवा गच्छन्न स्खलति यतः स एतज्जगतो दीप्तिं प्राप्नोति।

11-9 yīśuḥ praty-avadat | ekasmin dine kiṃ dvādaśa-ghaṭikā na bhavanti? ko'pi divā gacchan na skhalati yataḥ sa etaj-jagato dīptiṃ prāpnoti |

११-१० किम्तुरात्रौ गच्छन्स्खलति यतो हेतोस्तत्र दीप्तिर्नास्ति।

11-10 kim_turātrau gacchan skhalati yato hetos_tatra dīptir_nāsti |

११-११ इमां कथां कथयित्वा स तानवदद्। अस्माकं बन्धुः इलियासर्निद्रितोऽभूदिदानीं तं निद्रातो जागरयितुं गच्छामि।

11-11 imāṃ kathāṃ kathayitvā sa tān_avadad | asmākaṃ bandhuḥ iliyāsar nidrito'bhūd idānīṃ taṃ nidrāto jāgarayituṃ gacchāmi |

११-१२ यीशुर्मृतौ कथामिमां कथितवान्किंतु शिश्रामार्थं निद्रायां कथितवानिति ज्ञात्वा अकथयन्।

11-12 yīśur_mṛtau kathām_imāṃ kathitavān kiṃ_tu śi-śrāmārthaṃ ni-drāyāṃ kathitavān iti jñātvā akathayan |

११-१३ हे गुरो स यदि निद्राति तर्हि भद्रमेव।

11-13 he guro sa yadi ni-drāti tarhi bhadram_eva |

११-१४ तदा यीशुः स्पष्टं तान्व्याहरत्। इलियासरम्रियत।

11-14 tadā yīśuḥ spaṣṭaṃ tān vy-āharat | iliyāsar amriyata |

११-१५ किंतु यूयं यथा प्रीथ तदर्थमहं तत्र न स्थितवानित्यस्माद्युष्मन्निमित्तमाह्लादितो ऽहम्। तथापि तस्य समीपे याम।

11-15 kiṃ_tu yūyaṃ yathā prītha tad-artham_ahaṃ tatra na sthitavān ity_asmād yuṣman-nimittam ā-hvādito 'ham | tathāpi tasya sam-īpe yāma |

११-१६ तदा थोमा यं दिदुमं वदन्ति स सङ्गिनः शिष्यानवददद्वयमपि गत्वा तेन सार्धं म्रियामहे।

11-16 tadā thomā yaṃ didumaṃ vadanti sa saṅginaḥ śiṣyān avadad vayam_api gatvā tena sārdhaṃ mriyāmahe |

११-१७ यीशुस्तत्रोपस्थाय इलियासरः श्मशाने स्थापनात्चत्वारि दिनानि गतानीति वार्त्तां श्रुतवान्।

11-17 yīśus_tatropasthāya iliyāsaraḥ śmaśāne sthāpanāt catvāri dināni gatānīti vārttāṃ śrutavān |

११-१८ बैथनीया यिरूशालमः समीपस्था क्रोशैकमात्रान्तरिरा।

11-18 baithanīyā yirūśālamaḥ samīpa-sthā krośaika-mātrān_tarirā |

११-१९ तस्माद्बहवो यिहूदीया मर्थां मरिय्यमं च भ्रातृशोकापन्नां सान्त्वयितुं तयोः समीपमागच्छन्।

11-19 tasmād bahavo yihūdīyā marthāṃ mariyyamaṃ ca bhrātṛ-śokāpannāṃ sāntvayituṃ tayoḥ sam-īpam āgacchan |

११-२० मर्था यीशोरागमनवार्त्तां श्रुत्वाव तं साक्षादकरोत्।

11-20 marthā yīśor_āgamana-vārttāṃ śrutvāiva taṃ sākṣād akarot |

११-२१ मर्था यीशोरागमनवार्त्तां श्रुत्वैव तं साक्षादकरोत्किंतु मरियम्गेह उपविश्य स्थिता। तदा मर्था यीशुमवदत्। हे प्रभो यदि भवानत्रास्थास्यत्तर्हि मम भ्राता नामरिष्यत्।

11-21 marthā yīśor_āgamana-vārttāṃ śrutvaiva taṃ sākṣād akarot kiṃtu mariyam geha upa-viśya sthitā | tadā marthā yīśum_avadat | he pra-bho yadi bhavān atrāsthāsyat tarhi mama bhrātā nāmariṣyat |

११-२२ किंत्विदानीमपि यदीश्वरे प्रार्थयिष्यते ईश्वरस्तद्दास्यतीति जानेऽहम्।

11-22 kiṃ_tv_idānīm_api yad īśvare prārthayiṣyate īśvaras_tad dāsyatīti jāne'ham |

११-२३ यीशुरवादीत्तव भ्राता समुत्थास्यति।

11-23 yīśur_avādīt tava bhrātā sam-ut-thāsyati |

११-२४ मर्था व्याहरत्। शेषदिवसे स उत्थानसमये प्रोत्थास्यतीति जानेऽहम्।

11-24 marthā vy-āharat | śeṣa-divase sa ut-thāna-samaye protthāsyatīti jāne'ham |

११-२५ तदा यीशुः कथितवानहमेव उत्थापयिता जीवयिता च यः कश्चन मयि विश्वसिति स मृत्वापि जीविष्यति।

11-25 tadā yīśuḥ kathitavān aham_eva ut-thāpayitā jīvayitā ca yaḥ kaś_ca_na mayi vi-śvasiti sa mṛtvāpi jīviṣyati |

११-२६ यः कश्चन च जीवन्मयि विश्वसिति स कदापि न मरिष्यति। अस्यां कथायां किं विश्वसिषि

11-26 yaḥ kaś_ca_na ca jīvan mayi vi-śvasiti sa kadāpi na mariṣyati | asyāṃ kathāyāṃ kiṃ vi-śvasiṣi?

११-२७ सावदत्। प्रभो यस्यावतरणापेक्षास्ति भवान्स एवाभिषिक्त ईश्वरपुत्र इति विश्वसिमि।

11-27 sāvadat | pra-bho yasyāvataraṇāpekṣāsti bhavān sa evābhi-ṣikta īśvara-putra iti vi-śvasimi |

११-२८ इति कथां कथयित्वा सा गत्वा स्वां भगिनीं मरियमं गुप्तमाहूय व्याहरत्गुरुरपतिष्ठति त्वामाह्वयति च।

11-28 iti kathāṃ kathayitvā sā gatvā svāṃ bhaginīṃ mariyamaṃ guptam_ā-hūya vy-āharat gurur_apa-tiṣṭhati tvām_ā-hvayati ca |

११-२९ कथामिमां श्रुत्वा सा तूर्णमुत्थाय तस्य समीपमगच्छत्।

11-29 kathām_imāṃ śrutvā sā tūrṇam ut-thāya tasya sam-īpam agacchat |

११-३० यीशुर्ग्राममध्यं न प्रविश्य यत्र मर्था तं साक्षादकरोत्तत्र स्थितवान्।

11-30 yīśur_grāma-madhyaṃ na pra-viśya yatra marthā taṃ sākṣād akarot tatra sthitavān |

११-३१ ये यिहूदीया मरियमा साकं गृहे तिष्ठन्तस्तामसान्त्वयन्त्र्तां क्षिप्रमुत्थाय गच्छन्तीं विलोक्य व्याहरन्। सा श्मशाने रोदितुं याति। इत्युक्त्वा ते तस्याः पश्चादगच्छन्।

11-31 ye yihūdīyā mariyamā sākaṃ gṛhe tiṣṭhantas_tām asāntvayan tr tāṃ kṣipram ut-thāya gacchantīṃ vi-lokya vy-āharan | sā śmaśāne rodituṃ yāti | ityuktvā te tasyāḥ paścād agacchan |

११-३२ यत्र यीशुरतिष्ठत्तत्र मरियमुपस्थाय तं दृष्ट्वा तस्य चरणयोः पतित्वा व्याहरत्। हे प्रभो यदि भवानत्रास्थास्यत्तर्हि
मम भ्राता नामरिष्यत्।

11-32 yatra yīśur_atiṣṭhat tatra mariyam upa-sthāya taṃ dṛṣṭvā tasya caraṇayoḥ patitvā vy-āharat | he pra-bho yadi bhavān atrāsthāsyat tarhi mama bhrātā nāmariṣyat |

११-३३ यीशुस्तां तस्याः सङ्गिनो यिहूदीयांश्च रुदतो विलोक्य शिकार्तः सन्दीर्घं निश्वस्य कथितवान्तं कुत्रास्थापयत

11-33 yīśus_tām tasyāḥ saṅgino yihūdīyāṃś_ca rudato vi-lokya śikārtaḥ san dīrghaṃ ni-śvasya kathitavān taṃ kutrāsthāpayata?

११-३४ ते व्याहरन्। हे प्रभो भवानागत्य पश्यतु।

11-34 te vy-āharan | he pra-bho bhavān ā-gatya paśyatu |

११-३५ यीशुना क्रन्दितम्।

11-35 yīśunā kranditam |

११-३६ अत एव यिहूदीया अवदन्। पश्यतायं तस्मिन्कीदृश्गप्रीयत।

11-36 ata eva yihūdīyā avadan | paśyatāyaṃ tasmin kīdṛśg aprīyata |

११-३७ तेषां केचिदवदन्योऽन्धाय चक्षुषी दत्तवान्स किमस्य मृत्युं निवारयितुं नाशक्नोत्

11-37 teṣāṃ ke_cid avadan yo'ndhāya cakṣuṣī dattavān sa kim asya mṛtyuṃ ni-vārayituṃ nāśaknot?

११-३८ ततो यीशुः पुनरन्तर्दीर्घं निश्वस्य श्मशानान्तिकमगच्छत्।

11-38 tato yīśuḥ punar_antar-dīrghaṃ ni-śvasya śmaśānāntikam agacchat |

११-३९ तत्श्मशानमेकं गह्वरं तन्मुखे पाषाण एक आसीत्। तदा यीशुरवददेनं पाषाणमपसारयत। ततः प्रमीतस्य
भगिनी मर्थावदत्। प्रभो अधुना तत्र दुर्गन्धो जातः। यतोऽद्य चत्वारि दिनानि श्मशाने स तिष्ठति।

11-39 tat śmaśānam ekaṃ gahvaraṃ tan-mukhe pāṣāṇa eka āsīt | tadā yīśur_avadad enaṃ pāṣāṇam apa-sārayata | tataḥ pra-mītasya bhaginī marthāvadat | pra-bho adhunā tatra durgandho jātaḥ | yato'dya catvāri dināni śmaśāne sa tiṣṭhati |

११-४० तदा यीशुरवादीत्। यदि विश्वसिषि तर्हीश्वरस्य महिमप्रकाशं द्रक्ष्यसि कथामिमां किं तुभ्यं नाकथयम्

11-40 tadā yīśur_avādīt | yadi vi-śvasiṣi tarhīśvarasya mahima-prakāśaṃ drakṣyasi kathām_imāṃ kiṃ tubhyaṃ nākathayam?

११-४१ तदा मृतस्य श्मशानात्पाषाणे ऽपसारिते यीशुरूर्ध्वं पश्यनकथयत्। हे पितर्मम निवेदनमशृणोः कारणादस्मात्त्वां
धन्यं वदामि।

11-41 tadā mṛtasya śmaśānāt pāṣāṇe 'pasārite yīśur_ūrdhvaṃ paśyan akathayat | he pitar_mama ni-vedanam aśṛṇoḥ kāraṇād_asmāt tvāṃ dhanyaṃ vadāmi |

११-४२ त्वं सततं शृणोषि तदप्यहं जानामि। किंतु त्वं मां यत्प्रैरयस्तद्यथास्मिन्स्थाने स्थिता लोका विश्वसन्ति तदर्थमिदं
वाक्यं वदामि।

11-42 tvaṃ sa-tataṃ śṛṇoṣi tad_apy_ahaṃ jānāmi | kiṃ_tu tvaṃ māṃ yat prairayas_tad yathāsmin sthāne sthitā lokā vi-śvasanti tad-artham idaṃ vākyaṃ vadāmi |

११-४३ इमां कथां कथयित्वा स प्रोच्चैराह्वयत्। हे इलियासर्बहिरागच्छ।

11-43 imāṃ kathāṃ kathayitvā sa proccair_ā-hvayat | he iliyāsar bahir_ā-gaccha |

११-४४ ततः स प्रमीतः श्मशानवस्त्रैर्बद्धस्तपादो गात्रमार्जन्वाससा बद्धमुखश्च बहिरागच्छत्।

11-44 tataḥ sa pra-mītaḥ śmaśāna-vastrair_baddhas_tapādo gātra-mārjan-vāsasā baddha-mukhaś_ca bahir_ā-gacchat |

११-४५ यीशुरुदितवान्बन्धनानि मोचयित्वा त्यजतैनम्। मरियमः समीपमागता ये यिहूदीयलोकास्तदा
यीशोरेतत्कर्मापश्यन्।

11-45 yīśur_uditavān bandhanāni mocayitvā tyajatainam | mariyamaḥ sam-īpam ā-gatā ye yihūdīya-lokās_tadā yīśor_etat karmāpaśyan |

११-४६ तेषां बहवो व्यश्वसन्। किंतु केचिदन्ये फिरूशिनां समीपं गत्वा यीशोरेतस्य कर्मणो वार्त्तामवदन्।

11-46 teṣāṃ bahavo vy-aśvasan | kiṃ_tu ke_cid_anye phirūśināṃ sam-īpaṃ gatvā yīśor_etasya karmaṇo vārttām avadan |

११-४७ ततः परं प्रधानयाजकाः फिरूशिनश्च सभां कृत्वा व्याहरन्वयं किं कुर्मः एष मानवो बहून्याश्चर्यकर्माणि करोति।

11-47 tataḥ paraṃ pradhāna-yājakāḥ phirūśinaś_ca sabhāṃ kṛtvā vy-āharan vayaṃ kiṃ kurmaḥ? eṣa mānavo bahUny_āścarya-karmāṇi karoti |

११-४८ यदीदृशं कर्म कर्तुं न वारयामस्तर्हि सर्वे लोकास्तस्मिन्विश्वसिष्यन्ति रोमिलोकाश्चागत्यास्माकमनया राजधान्या सार्धं राज्यमाछेत्स्यन्ति।

11-48 yadīdṛśaṃ karma kartuṃ na vārayāmas_tarhi sarve lokās_tasmin vi-śvasiṣyanti romi-lokāś_cā-gatyāsmākam anayā rāja-ghānyā sārdhaṃ rājyam āchetsyanti |

११-४९ तदा तेषां कियफानामा यस्तस्मिन्वत्सरे महायाजकपदे न्ययुज्यत स प्रत्यवदद्यूयं किमपि न जानीथ।

11-49 tadā teṣāṃ kiyaphā-nāmā yas_tasmin vatsare mahā-yājaka-pade ny-ayujyata sa praty_avadad yūyaṃ kim_api na jānītha |

११-५० समग्रदेशस्य विनाशतोऽपि सर्वलोकार्थमेकस्य जनस्य मरणमस्माकं मश्गलहेतुकमेल्तस्य विवेचनामपि न कुरुथ।

11-50 samagra-deśasya vi-nāśato'pi sarva-lokārtham ekasya janasya maraṇam asmākaṃ maśgala-hetukam eltasya vivecanām_api na kurutha |

११-५१ एतां कथां स निजबुद्ध्या व्याहरदिति न।

11-51 etāṃ kathāṃ sa nija-buddhyā vyāharad iti na |

११-५२ किंतु यीशुस्तद्देशीयानां कारणात्प्राणान्त्यक्ष्यति। दिशि दिशि विकीर्णानीश्वरस्य सन्तानान्संगृह्यैकजातिं करिष्यति च। तस्मिन्वत्सरे कियफा महायाजकत्वपदे नियुक्तः सनिदं भविष्यद्वाक्यं कथितवान्।

11-52 kiṃ_tu yīśus_tad-deśīyānāṃ kāraṇāt prāṇān tyakṣyati | diśi diśi vi-kīrṇān īśvarasya san-tānān saṃ-gṛhyaika-jātiṃ kariṣyati ca | tasmin vatsare kiyaphā mahā-yājakatva-pade ni-yuktaḥ san idaṃ bhaviṣyad-vākyaṃ kathitavān |

११-५३ तद्दिनमारभ्य ते कथं तं हन्तुं शक्नुवन्तीति मन्त्रणां कर्तुं प्रारेभिरे।

11-53 tad-dinam_ā-rabhya te kathaṃ taṃ hantuṃ śaknuvantīti mantraṇāṃ kartuṃ prārebhire |

११-५४ अत एव यिहूदीयानां मध्ये यीशुः सप्रकाशं गमनागमने अकृत्वा तस्माद्गत्वा प्रान्तरस्य समीपस्थायिप्रदेशस्येफ्रायिम्नाम्नि नगरे शिष्यैः साकं कालं यापयितुं प्रारेभे।

11-54 ata eva yihūdīyānāṃ madhye yīśuḥ sa-prakāśaṃ gamanāgamane akṛtvā tasmād gatvā prāntarasya samīpa-sthāyi-pradeśasyephrāyim-nāmni nagare śiṣyaiḥ sākaṃ kālaṃ yāpayituṃ prārebhe |

११-५५ अनन्तरं यिहूदीयानां निस्तारोत्सवे निकटवर्तिनि सति तदुत्सवात्पूर्वं स्वान्शुचीन्कर्तुं बहवो जना ग्रामेभ्यो यिरूशालम्नगरमागच्छन्।

11-55 anantaraṃ yihūdīyānāṃ nistārotsave nikaṭa-vartini sati tad-utsavāt pūrvaṃ svān śucīn kartuṃ bahavo janā grāmebhyo yirūśālam-nagaram āgacchan |

११-५६ यीशोरन्वेषणं कृत्वा मन्दिरे दण्डायमानाः सन्तः परस्परं व्याहरन्। युष्माकं कीदृशो बोधो जायते स किमुत्सवेऽस्मिनत्रागमिष्यति

11-56 yīśor_anveṣaṇaṃ kṛtvā mandire daṇḍāyamānāḥ santaḥ paras-paraṃ vy-āharan | yuṣmākaṃ kīdṛśo bodho jāyate? sa kim ut-save'smin atrāgamiṣyati?

११-५७ स च कुत्रास्ति यद्येतत्कश्चिद्वेत्ति तर्हि दर्शयतु प्रधानयाजकाः फिरूशिनश्च तं धर्तुं पूर्वमिमामाज्ञां प्राचारयन्।

11-57 sa ca kutrāsti yady_etat kaś_cid vetti tarhi darśayatu pra-dhāna-yājakāḥ phirūśinaś_ca taṃ dhartuṃ pūrvam imām ā-jñāṃ prācārayan |

१२-१ निस्तरोत्सवात्पूर्वं दिनषट्के स्थिते यीशुर्यं प्रमीतमिलियासरं श्मशानादुदस्थापयत्तस्य निवासस्थानं बैथनियाग्राममागच्छत्।

12-1 nistarotsavāt pūrvaṃ dina-ṣaṭke sthite yīśur_yaṃ pra-mītam iliyāsaraṃ śmaśānād ud-asthāpayat tasya ni-vāsa-sthānaṃ baithaniyā-grāmam āgacchat |

१२-२ तत्र तदर्थं रजन्यां भोज्ये कृते मर्था पर्यवेषयदिलियासर्च तस्य सङ्गिभिः सार्धं भोजनासन उपाविशत्।

12-2 tatra tad-arthaṃ rajanyāṃ bhojye kṛte marthā parya-veṣayad iliyāsar ca tasya saṅgibhiḥ sārdhaṃ bhojanāsana upāviśat |

१२-३ तदा मरियमर्धसेटकं बहुमूल्यं जटामांसीयं तैलमानीय यीशोश्चरणयोर्मर्दयित्वा निजकेशैर्मार्ष्टुमारभत। तदा तैलस्य परिमलेन गृहमामोदितमभवत्।

12-3 tadā mariyam ardha-seṭakaṃ bahu-mūlyaṃ jaṭā-māṃsīyaṃ tailam ā-nīya yīśoś_caraṇayor_mardayitvā nija-keśair_mārṣṭum ārabhata | tadā tailasya pari-malena gṛham ā-moditam abhavat |

१२-४ यः शिमोनः पुत्र ईष्करियोतीयो यिहूदानामा यीशुं परकरेषु समर्पयिष्यति स शिष्यस्तदा कथितवान्।

12-4 yaḥ śimonaḥ putra īṣkariyotīyo yihūdā-nāmā yīśuṃ para-kareṣu sam-arpayiṣyati sa śiṣyas_tadā kathitavān |

१२-५ एतत्तैलं त्रिभिः शतैर्मुद्रापादैर्विक्रीतं सद्दरिद्रेभ्यः कुतो नादीयत

12-5 etat-tailaṃ tribhiḥ śatair_mudrā-pādair_vi-krītaṃ sad daridrebhyaḥ kuto nādīyata?

१२-६ स दरिद्रलोकार्थमचिन्तयदिति न। किंतु स चौर एवं तन्निकटे मुद्रासम्पुटकस्थित्या तन्मध्ये यदतिष्ठत्तदपाहरत्तस्मात्कारणादिमां कथामकथयत्।

12-6 sa daridra-lokārtham acintayad iti na | kiṃ_tu sa caura evaṃ tan-nikaṭe mudrā-sampuṭaka-sthityā tan-madhye yad_atiṣṭhat tad_apāharat tasmāt kāraṇād imāṃ kathām_akathayat |

१२-७ तदा यीशुरकथयदेनां मा वारय सा मम श्मशानस्थापनदिनार्थं तदरक्षयत्।

12-7 tadā yīśur_akathayad enāṃ mā vāraya sā mama śmaśāna-sthāpana-dinārthaṃ tad-arakṣayat |

१२-८ दरिद्रा युष्माकं सन्निधौ सर्वदा तिष्ठन्ति किंत्वहं सर्वदा युष्माकं सन्निधौ न तिष्ठामि।

12-8 daridrā yuṣmākaṃ san-nidhau sarvadā tiṣṭhanti kiṃ_tv_ahaṃ sarvadā yuṣmākaṃ san-nidhau na tiṣṭhāmi |

१२-९ ततः परं यीशुस्तत्रास्तीति वार्त्तां श्रुत्वा बहवो यिहूदीयास्तं श्मशानादुत्थापितमिलियासरंच द्रष्टुं तत्स्थानमागच्छन्।

12-9 tataḥ paraṃ yīśus_tatrāstīti vārttāṃ śrutvā bahavo yihūdīyās_taṃ śmaśānād_ut-thāpitam iliyāsaraṃ_ca draṣṭuṃ tat-sthānam āgacchan |

१२-१० तदा प्रधानयाजकास्तमिलियासरमपि संहर्तुममन्त्रयन्।

12-10 tadā pradhāna-yājakās_tam iliyāsaram_api saṃ-hartum amantrayan |

१२-११ यतस्तेन बहवो यिहूदीया गत्वा यीशौ व्यश्वसन्।

12-11 yatas_tena bahavo yihūdīyā gatvā yīśau vy-aśvasan |

१२-१२ अनन्तरं यीशुर्यीरूशालम्नगरमागच्छतीति वार्त्तां श्रुत्वा

12-12 anantaraṃ yīśur_yīrūśālam-nagaram āgacchatīti vārttāṃ śrutvā

१२-१३ परेऽहनि उत्सवागता बहवो लोकाः खर्जूरपत्राद्यानीय तं साक्षात्कर्तुं बहिरागत्य जय जयेति वाचं प्रोच्चैर्वक्तुमारभन्त। इस्रायेलो यो राजा परमेश्वरस्य नाम्ना गच्छति स धन्यः।

12-13 pare'hani utsavāgatā bahavo lokāḥ kharjūra-patrādyānīya taṃ sākṣāt kartuṃ bahir-ā-gatya jaya jayeti vācaṃ proccair_vaktum ārabhanta | isrāyelo yo rājā parameśvarasya nāmnā gacchati sa dhanyaḥ |

१२-१४ तदा हे सियोनः कन्ये मा भैषीः पश्यायं तव राजा गर्दभशावकमारुह्यागच्छति

12-14 tadā he siyonaḥ kanye mā bhaiṣīḥ paśyāyaṃ tava rājā gardabha-śāvakam ā-ruhyāgacchati

१२-१५ इति शास्त्रीयवचनानुसारेण यीशुरेकं युवगर्दभं प्राप्य तदुपर्यारोहत्।

12-15 iti śāstrīya-vacanānusāreṇa yīśur_ekaṃ yuva-gardabhaṃ prāpya tad-upary_ārohat |

१२-१६ अस्याः घटनायास्तात्पर्यं शिष्याः प्रथमं नाबुध्यन्त। किंतु यीशौ महिमानं प्राप्ते सति वाक्यमिदं तस्मिनकथ्यत लोकाश्च तम्प्रतीत्थमकुर्वनिति ते स्मृतवन्तः।

12-16 asyāḥ ghaṭanāyās_tātparyaṃ śiṣyāḥ prathamaṃ nābudhyanta | kiṃ_tu yīśau mahimānaṃ prāpte sati vākyam_idaṃ tasmin akathyata lokāś_ca tam_pratīttham akurvan iti te smṛtavantaḥ |

१२-१७ स इलियासरं श्मशानादागन्तुमाहूतवान्श्मशानाच्च उदस्थापयद्ये ये लोकास्तत्कर्म साक्षादपश्यन्ते प्रमाणं दातुमारभन्त।

12-17 sa iliyāsaraṃ śmaśānād āgantum ā-hūtavān śmaśānāc_ca ud-asthāpayad ye ye lokās_tat_karma sākṣād apaśyan te pra-māṇaṃ dātum ārabhanta ǀ

१२-१८ स एतादृशमद्भुतं कर्माकरोत्तस्य जनश्रुतेर्लोकास्तं साक्षात्कर्तुमागच्छन्।

12-18 sa etādṛśam adbhutaṃ karmākarot tasya jana-śruter_lokās_taṃ sākṣāt kartum āgacchan ǀ

१२-१९ ततः फिरूशिनः परस्परं वक्तुमारभन्त युष्माकं सर्वाश्चेष्टा वृथा जाताः। इति किं यूयं न बुध्यध्वे पश्यत सर्वे लोकास्तस्य पश्चाद्वर्तिनो ऽभवन्।

12-19 tataḥ phirūśinaḥ paras-paraṃ vaktum ārabhanta yuṣmākaṃ sarvāś_ceṣṭā vṛthā jātāḥ ǀ iti kiṃ yūyaṃ na budhyadhve? paśyata sarve lokās_tasya paścād-vartino 'bhavan ǀ

१२-२० भजनं कर्तुमुत्सवागतानां लोकानां कतिपया जना अन्यदेशीया आसन्।

12-20 bhajanaṃ kartum utsavāgatānāṃ lokānāṃ katipayā janā anyadeśīyā āsan ǀ

१२-२१ ते गालीलीयबैत्सैदानिवासिनः फिलिपस्य समीपमागत्य व्याहरन्। हे महेच्छ वयं यीशुं द्रष्टुमिच्छामः।

12-21 te gālīlīya-baitsaidāni-vāsinaḥ philipasya sam-īpam ā-gatya vyāharan ǀ he maheccha vayaṃ yīśuṃ draṣṭum icchāmaḥ ǀ

१२-२२ ततः फिलिपो गत्वा आन्द्रियमवदत्पश्चादान्द्रियफिलिपौ यीशवे वार्त्तामकथयताम्।

12-22 tataḥ philipo gatvā āndriyam avadat paścād āndriy-philipau yīśave vārttām akathayatām ǀ

१२-२३ तदा यीशुः प्रत्युदितवान्मानवसुतस्य महिमप्राप्तिसमय उपस्थितः।

12-23 tadā yīśuḥ pratyuditavān mānava-sutasya mahima-prāpti-samaya upa-sthitaḥ ǀ

१२-२४ अहं युष्मानतिथ्यार्थं वदामि। धान्यबीजं मृत्तिकायां पतित्वा यदि न मृयते तर्ह्येकाकि तिष्ठति किंतु यदि मृयते तर्हि बहुगुणं फलं फलति।

12-24 ahaṃ yuṣmān_ati-ythārthaṃ vadāmi ǀ dhānya-bījaṃ mṛttikāyāṃ patitvā yadi na mṛyate tarhy_ekāki tiṣṭhati kiṃ_tu yadi mṛyate tarhi bahu-guṇaṃ phalaṃ phalati ǀ

१२-२५ यो जनो निजप्राणान्प्रियान्जानाति स तान्हारयिष्यति किंतु यो जन इहलोके निजप्राणानप्रियान्जानाति सोऽनन्तायुः प्राप्तुं तान्रक्षिष्यति।

12-25 yo jano nija-prāṇān priyān jānāti sa tān hārayiṣyati kiṃ_tu yo jana iha-loke nija-prāṇān a-priyān jānāti so'nantāyuḥ prāptuṃ tān rakṣiṣyati ǀ

१२-२६ कश्चिद्यदि मम सेवको भवितुं वाञ्छति तर्हि स मम पश्चाद्गामी भवतु। तस्मादहं यत्र तिष्ठामि मम सेवलोऽपि तत्र स्थास्यति। यो जनो मां सेवते मम पितापि तं सम्मंस्यते।

12-26 kaś_cid yadi mama sevako bhavituṃ vāñchati tarhi sa mama paścād-gāmī bhavatu ǀ tasmād ahaṃ yatra tiṣṭhāmi mama sevalo'pi tatra sthāsyati ǀ yo jano māṃ sevate mama pitāpi taṃ sam-maṃsyate ǀ

१२-२७ साम्प्रतं मम प्राणा व्याकुला भवन्ति। तस्माधे पितरेतस्मात्समयान्मां रक्ष इत्यहं किं प्रार्थयिष्ये किंत्वहमेतत्समयार्थमवतीर्णवान्।

12-27 sāmpratam mama prāṇā vy-ā-kulā bhavanti ǀ tasmād he pitar etasmāt sam-ayān māṃ rakṣa ityahaṃ kiṃ prārthayiṣye? kiṃ_tv_aham etat-samayārtham ava-tīrṇavān ǀ

१२-२८ हे पितः स्वनाम्नो महिमानं प्रक्षशय। तेनैव स्वनाम्नो महिमानमहं प्रकाशयं पुनरपि प्रकाशयिष्यामि। एषा गगणीया वाणी तस्मिन्समयेऽजायत।

12-28 he pitaḥ sva-nāmno mahimānaṃ pra-kṣśaya ǀ tenaiva sva-nāmno mahimānam ahaṃ pra-kāśayaṃ punar_api prakāśayiṣyāmi ǀ eṣā gagaṇīyā vāṇī tasmin sam-aye'jāyata ǀ

१२-२९ तच्छ्रुत्वा समीपस्थलोकानां केचिदवदन्मेघो ऽगर्जीत्। केचिदवदन्स्वर्गीयदूतो ऽनेन सह कथामचकथत्।

12-29 tac-chrutvā samīpa-stha-lokānāṃ ke-cid avadan megho 'garjīt ǀ ke_cid avadan svargīya-dūto 'nena saha kathām_acakathat ǀ

१२-३० तदा यीशुः प्रत्यवादीत्। मदर्थं शब्दोऽयं नाभूत्युष्मदर्थमेवाभूत्।

12-30 tadā yīśuḥ praty_avādīt ǀ mad-arthaṃ śabdo'yaṃ nābhūt yuṣmad-artham_evābhūt ǀ

१२-३१ अधुना जगतोऽस्य विचारः सम्पत्स्यते। अधुनास्य जगतः पती राज्यात्च्योष्यति।

12-31 adhunā jagato'sya vi-cāraḥ sam-patsyate ǀ adhunāsya jagataḥ patī rājyāt cyoṣyati ǀ

१२-३२ यद्यहं पृथिव्या ऊर्ध्वे प्रोत्थापितोऽस्मि तर्हि सर्वान्मानवान्स्वसमीपमाकर्षिष्यामि।

12-32 yady_ahaṃ pṛthivyā ūrdhve protthāpito'smi tarhi sarvān mānavān sva-samīpam ākarṣiṣyāmi ।

१२-३३ कथं तस्य मृतिर्भविष्यति। एतद्बोधयितुं स इमां कथामकथयत्।

12-33 kathaṃ tasya mṛtir_bhaviṣyati । etad bodhayituṃ sa imāṃ kathām akathayat ।

१२-३४ तदा लोका अकथयन्सोऽभिषिक्तः सर्वदा तिष्ठतीति व्यवस्थाग्रन्थे श्रुतमस्माभिः। तर्हि मनुष्यपुत्रः प्रोत्थापितो भविष्यतीति वाक्यं कथं वदसि

12-34 tadā lokā akathayan so'bhiṣiktaḥ sarvadā tiṣṭhatīti vyavasthā-granthe śrutam asmābhiḥ । tarhi manuṣya-putraḥ protthāpito bhaviṣyatīti vākyaṃ kathaṃ vadasi?

१२-३५ मनुष्यपुत्रोऽ यं कः तदा यीशुरकथयद्युष्माभिः सार्धमल्पदिनानि ज्योतिरास्ते। यथा युष्मानन्धकारो नाच्छादयति तदर्थं यावत्कालं युष्माभिः सार्धं ज्योतिस्तिष्ठति तावत्कालं गच्छत। यो जनोऽन्धकारे गच्छति स कुत्र यातीति न जानाति।

12-35 manuṣya-putro' yaṃ kaḥ tadā yīśur_akathayad yuṣmābhiḥ sārdham alpa-dināni jyotir_āste । yathā yuṣmān andha-kāro nācchādayati tad-arthaṃ yāvat-kālaṃ yuṣmābhiḥ sārdhaṃ jyotis_tiṣṭhati tāvat-kālaṃ gacchata । yo jano'ndha-kāre gacchati sa kutra yātīti na jānāti ।

१२-३६ अत एव यावत्कालं युष्माकं निकटे ज्योतिरास्ते तावत्कालं ज्योतीरूपसन्ताना भवितुं ज्योतिषि विश्वसित। इमां कथां कथयित्वा यीशुः प्रस्थाय तेभ्यः स्वं गुप्तवान्।

12-36 ata eva yāvat-kālaṃ yuṣmākaṃ nikaṭe jyotir_āste tāvat-kālaṃ jyotī-rūpa-santānā bhavituṃ jyotiṣi vi-śvasita । imāṃ kathāṃ kathayitvā yīśuḥ pra-sthāya tebhyaḥ svaṃ guptavān ।

१२-३७ यद्यपि यीशुस्तेषां समक्षमेतावदाश्चर्यकर्माणि कृतवान्तथापि ते तस्मिन्न व्यश्वसन्।

12-37 yady_api yīśus_teṣāṃ sam-akṣam etāvad_āścarya-karmāṇi kṛtavān tathāpi te tasmin na vy-aśvasan ।

१२-३८ अत एव। कः प्रत्येति सुसंवादं परेशास्मत्प्रचारितं प्रकाशते परेशस्य हस्तः कस्य च सन्निधौ यिशयियभविष्यद्वादिना यदेतद्वाक्यमुक्तं तत्सफलमभवत्।

12-38 ata eva । kaḥ pratyeti su-saṃ-vādaṃ pareśāsmat-pracāritaṃ? pra-kāśate pareśasya hastaḥ kasya ca san-ni-dhau? yiśayiya-bhaviṣyad-vādinā yad_etad vākyam_uktaṃ tat sa-phalam abhavat ।

१२-३९ ते प्रत्येतुं नाशक्नुवन्तस्मिन्यिशयियभविष्यद्वादी ओनरवादीद्।

12-39 te praty_etuṃ nāśaknuvan tasmin yiśayiya-bhaviṣyad-vādī ounar_avādīd ।

१२-४० यथा ते नयनैर्न पश्यन्ति बुद्धिभिश्च न बुध्यन्ते तैर्मनःसु परिवर्तितेषु च तानहं यथा स्वस्थान्न करोमि तथा स तेषां लोचनान्यन्धानि कृत्वा तेषामन्तःकरणानि गाढानि करिष्यति।

12-40 yathā te nayanair_na paśyanti buddhibhiś_ca na budhyante tair_manaḥsu pari-vartiteṣu ca tān_ahaṃ yathā sva-sthān na karomi tathā sa teṣāṃ locanāny_andhāni kṛtvā teṣām_antaḥ-karaṇāni gāḍhāni kariṣyati ।

१२-४१ यिशयियो यदा यीशोर्महिमानं विलोक्य तस्मिन्कथामकथयत्तदा भविष्यद्वाक्यमीदृशं प्राकाशयत्।

12-41 yiśayiyo yadā yīśor_mahimānaṃ vi-lokya tasmin kathām_akathayat tadā bhaviṣyad-vākyam īdṛśaṃ prākāśayat ।

१२-४२ तथाप्यधिपतीनां बहवस्तस्मिन्प्रत्यायन्। लिंतु फिरूशिनस्तान्भजनगृहाद्दूरीकुर्वन्तीति भयात्ते तं न स्वकृतवन्तः।

12-42 tathāpy_adhi-patīnāṃ bahavas_tasmin praty_āyan । liṃ_tu phirūśinas_tān bhajana-gṛhād dūrī-kurvantīti bhayāt te taṃ na svaīkṛtavantaḥ ।

१२-४३ यत ईश्वरस्य प्रशंसातो मानवानां प्रशंसायां ते ऽप्रीयन्त।

12-43 yata īśvarasya pra-śaṃsāto mānavānāṃ pra-śaṃsāyāṃ te 'prīyanta ।

१२-४४ तदा यीशुरुच्चैःकारमकथयद्यो जनो मयि विश्वसिति स केवले मयि विश्वसितीति न स मत्प्रेरको ऽपि विश्वसिति।

12-44 tadā yīśur_uccaiḥ-kāram akathayad yo jano mayi vi-śvasiti sa kevale mayi vi-śvasitīti na sa mat-prerako 'pi vi-śvasiti |

१२-४५ यो जनो मां पश्यति स मत्प्रेरकमपि पश्यति।

12-45 yo jano mām paśyati sa mat-prerakam_api paśyati |

१२-४६ यो जनो मां प्रत्येति स यथान्धकारे न तिष्ठति तदर्थमहं ज्योतिःस्वरूपो भूत्वा जगत्यस्मिनवतीर्णवान्।

12-46 yo jano mām praty_eti sa yathāndha-kāre na tiṣṭhati tad-artham ahaṃ jyotiḥ-svarūpo bhūtvā jagaty_asmin ava-tīrṇavān |

१२-४७ मम कथां श्रुत्वा यदि कश्चिन्न विश्वसिति तर्हि तमहं दोषिणं न करोमि यतो हेतोर्जगतो जनानां दोषान्निश्चितान्कर्तुं नागत्य तान्परित्रातुमागतोऽस्मि।

12-47 mama kathāṃ śrutvā yadi kaś_cin na vi-śvasiti tarhi tam_ahaṃ doṣiṇaṃ na karomi yato hetor_jagato janānāṃ doṣān niś-citān kartuṃ nāgatya tān pari-trātum ā-gato'smi |

१२-४८ यः कश्चिन्मां न श्रद्धाय मम कथां न गृह्णाति अन्यस्तं दोषिणं करिष्यति वस्तुतस्तु यां कथामहमचकथं सा कथा चरमेऽह्नि तं दोषिणं करिष्याति।

12-48 yaḥ kaś_cin māṃ na śraddhāya mama kathāṃ na gṛhṇāti anyas_taṃ doṣiṇaṃ kariṣyati vastutas_tu yāṃ kathām_aham acakathaṃ sā kathā carame'hni taṃ doṣiṇaṃ kariṣyāti |

१२-४९ यतो हेतोरहं स्वतः किमपि न कथयामि। किं किं मया कथयितव्यं किं समुपदेष्टव्यं च इति मत्प्रेरयिता पिता मामाज्ञापयत्।

12-49 yato hetor_ahaṃ svataḥ kim_api na kathayāmi | kiṃ kiṃ mayā kathayitavyaṃ kiṃ sam-upadeṣṭavyaṃ ca iti mat-prerayitā pitā mām_ājñāpayat |

१२-५० तस्य साज्ञा अनन्तायुरित्यहं जानामि। अत एवाहं यत्कथयामि तत्पिता यथाज्ञापयत्तथैव कथयाम्यहम्।

12-50 tasya sājñā anantāyur_ity_ahaṃ jānāmi | ata evāhaṃ yat kathayāmi tat pitā yathā-jñāpayat tathaiva kathayāmy_aham |

१३-१ निस्तारोत्सवस्य किंचित्कालात्पूर्वं पृथिव्याः पितुः समीपगमनस्य समयः सन्निकर्षो ऽभूदिति ज्ञात्वा यीशुराप्रथमाद्येषि जगत्प्रवासिष्वात्मीयलोकेषु प्रेम करोतु स्म तेषु शेषं यावत्प्रेम कृतवान्।

13-1 nis-tārotsavasya kiṃ_cit-kālāt pūrvaṃ pṛthivyāḥ pituḥ samīpa-gamanasya sam-ayaḥ san-nikarṣo 'bhūd iti jñātvā yīśur_ā-prathamād yeṣi jagat-pra-vāsiṣv_ātmīya-lokeṣu prema karotu sma teṣu śeṣaṃ yāvat prema kṛtavān |

१३-२ पिता तस्य हस्ते सर्वं समर्पितवान्स्वयमीश्वरस्य समीपादागच्छदीश्वरस्य समीपं यास्यति च।

13-2 pitā tasya haste sarvaṃ sam-arpitavān svayam īśvarasya sam-īpād ā-gacchad īśvarasya sam-īpaṃ yāsyati ca |

१३-३ सर्वाण्येतानि ज्ञात्वा रजन्यां भोजने सम्पूर्णे सति यदा शैतान्तं परहस्तेषु समर्पयितुं शिमोनः पुत्रस्य ईष्करियोतीयस्य यिहूदा अन्तःकरणे कुप्रवृत्तिं समार्पयत्

13-3 sarvāṇy_etāni jñātvā rajanyāṃ bhojane sam-pūrṇe sati yadā śaitān taṃ para-hasteṣu sam-arpayituṃ śimonaḥ putrasya iṣkariyotīyasya yihūdā antaḥ-karaṇe ku-pra-vṛttiṃ sam-ārpayat

१३-४ तदा यीशुर्भोजनासनादुत्थाय गात्रवस्त्रं मोचयित्वा गात्रमार्जनवस्त्रं गृहीत्वा तेन स्वकटिमबध्नात्।

13-4 tadā yīśur_bhojanāsanād ut-thāya gātra-vastraṃ mocayitvā gātra-mārjana-vastraṃ gṛhītvā tena sva-kaṭim abadhnāt |

१३-५ पश्चादेकपात्रे जलमभिषिच्य शिष्याणां पादान्प्रक्षाल्य तेन कटिबद्धगात्रमार्जनवाससा मार्ष्टुं प्रारभत।

13-5 paścād eka-pātre jalam abhi-ṣicya śiṣyāṇāṃ pādān pra-kṣālya tena kaṭi-baddha-gātra-mārjana-vāsasā mārṣṭuṃ prārabhata |

१३-६ ततः शिमोन्पितरस्य समीपमागते स उक्तवान्हे प्रभो भवान्किं मम पादौ प्रक्षालयिष्यति

13-6 tataḥ śimon-pitarasya sam-īpam_ā-gate sa uktavān he pra-bho bhavān kiṃ mama pādau pra-kṣālayiṣyati?

१३-७ यीशुरुदितवान्। अहं यत्करोमि तत्सम्प्रति न जानासि किंतु पश्चाज्ज्ञास्यसि।

13-7 yīśur_uditavān | ahaṃ yat karomi tat sam-prati na jānāsi kiṃ_tu paścāj jñāsyasi |

१३-८ ततः पितरः कथितवान्भवान्कदापि मम पादौ न प्रक्षालयिष्यति। यीशुरकथयद्। यदि त्वां न प्रक्षलये तर्हि मयि तव को ऽप्यंशो नास्ति।

13-8 tataḥ pitaraḥ kathitavān bhavān kadāpi mama pādau na pra-kṣālayiṣyati | yīśur_akathayad | yadi tvāṃ na pra-kṣalaye tarhi mayi tava ko 'py_aṃśo nāsti |

१३-९ तदा शिमोन्पितरः कथितवान्। हे प्रभो तर्हि केवलपादौ न। मम हस्तौ शिरश्च प्रक्षलयतु।

13-9 tadā śimon-pitaraḥ kathitavān | he pra-bho tarhi kevala-pādau na | mama hastau śiraś_ca pra-kṣalayatu |

१३-१० ततो यीशुरवदद्। यो जनो धौतस्तस्य सर्वाङ्गपरिष्कृतत्वात्पादौ विनान्याङ्गस्य प्रक्षालनापेक्षा नास्ति।

13-10 tato yīśur_avadad | yo jano dhautas_tasya sarvāṅga-pariṣkṛtatvāt pādau vinānyāṅgasya pra-kṣālanāpekṣā nāsti |

१३-११ यूयं परिष्कृता इति सत्यं किंतु न सर्वे यतो यो जनस्तं परकरेषु समर्पयिष्यति तं स ज्ञातव्वान्। अत एव यूयं सर्वे न परिष्कृता इमां कथां कथितवान्।

13-11 yūyaṃ pariṣkṛtā iti satyaṃ kiṃ_tu na sarve yato yo janas_taṃ para-kareṣu sam-arpayiṣyati taṃ sa jñātavvān | ata eva yūyaṃ sarve na pariṣ-kṛtā imāṃ kathāṃ kathitavān |

१३-१२ इत्थं यीशुस्तेषां पादान्प्रक्षाल्य वस्त्रं परिधायासने समुपविश्य कथितवानहं युष्मान्प्रति किं कर्माकार्षं जानीथ

13-12 itthaṃ yīśus_teṣāṃ pādān pra-kṣālya vastraṃ pari-dhāyāsane sam-upa-viśya kathitavān ahaṃ yuṣmān prati kiṃ karmākārṣaṃ jānītha?

१३-१३ यूयं मां गुरुं प्रभुं च वदथ तत्सत्यमेव वदथ यतोऽहम्स एव भवामि।

13-13 yūyaṃ māṃ guruṃ pra-bhuṃ ca vadatha tat satyam_eva vadatha yato'ham sa eva bhavāmi |

१३-१४ यद्यहं प्रभुर्गुरुश्च सन्युष्माकं पादान्प्रक्षालितवान्तर्हि युष्माकमपि परस्परं पादप्रक्षालनमुचितम्।

13-14 yady_ahaṃ pra-bhur_guruś_ca san yuṣmākaṃ pādān pra-kṣālitavān tarhi yuṣmākam_api paras-paraṃ pāda-prakṣālanam ucitam |

१३-१५ अहं युष्मान्प्रति यथा व्यवाहरं युष्मान्तथा व्यवहर्तुमेकं पन्थानं दर्शितवान्।

13-15 ahaṃ yuṣmān prati yathā vy-avāharaṃ yuṣmān tathā vy-ava-hartum ekaṃ panthānaṃ darśitavān |

१३-१६ अहं युष्मानतियथार्थं वदामि। प्रभोर्दासो न महान्प्रेरकाच्च प्रेरितो न महान्।

13-16 ahaṃ yuṣmān_ati-yathārthaṃ vadāmi | pra-bhor_dāso na mahān prerakāc_ca prerito na mahān |

१३-१७ इमां कथां विदित्वा यदि तदनुसारतः कर्माणि कुरुथ तर्हि यूयं धन्या भविष्यथ।

13-17 imāṃ kathāṃ viditvā yadi tad-anusārataḥ karmāṇi kurutha tarhi yūyaṃ dhanyā bhaviṣyatha |

१३-१८ सर्वेषु युष्मासु कथामिमां कथयामि इति न। ये मम मनोनीतास्तानहं जानामि। किंतु। मम भक्ष्याणि यो भुङ्क्ते यो भुङ्क्ते मत्प्राणप्रातिकूल्यतः। उत्थापयति पादस्य मूलं स एष मानवः। यदेतद्धर्मपुस्तकस्य वचनं तदनुसारेणावश्यं घटिष्यते।

13-18 sarveṣu yuṣmāsu kathām_imāṃ kathayāmi iti na | ye mama mano-nītās_tān_ahaṃ jānāmi | kiṃ_tu | mama bhakṣyāṇi yo bhuṅkte yo bhuṅkte mat-prāṇa-prātikūlyataḥ | ut-thāpayati pādasya mūlaṃ sa eṣa mānavaḥ | yad_etad dharma-pustakasya vacanaṃ tad-anusāreṇāvaśyaṃ ghaṭiṣyate |

१३-१९ अहं स जन इत्यत्र यथा युष्माकं विश्वासि जायते तदर्थमेतादृशघटनात्पूर्वमहमिदानीं युष्मभ्यमकथयम्।

13-19 ahaṃ sa jana ity_atra yathā yuṣmākaṃ vi-śvāsi jāyate tad-artham etādṛśa-ghaṭanāt pūrvam aham_idānīṃ yuṣmabhyam_akathayam |

१३-२० अहं युष्मानतीव यथार्थं वदामि। मया प्रेरितं जनं यो गृह्णाति स मामेव गृह्णाति यश्च मां गृह्णाति स मत्प्रेरकं गृह्णाति।

13-20 ahaṃ yuṣmān_atīva yathārthaṃ vadāmi | mayā preritaṃ janaṃ yo gṛhṇāti sa mām_eva gṛhṇāti yaś_ca māṃ gṛhṇāti sa mat-prerakaṃ gṛhṇāti |

१३-२१ एतां कथां कथयित्वा यीशुर्दुःखी सन्प्रमाणं दत्त्वा कथितवानहं युष्मानतियथार्थं वदामि युष्माकमेको जनो मां परकरेषु समर्पयिष्यति।

13-21 etāṃ kathāṃ kathayitvā yīśur_duḥkhī san pra-māṇaṃ dattvā kathitavān ahaṃ yuṣmān_ati-yathārthaṃ vadāmi yuṣmākam eko jano māṃ para-kareṣu sam-arpayiṣyati ।

१३-२२ ततः स कमुद्दिश्य कथामेतां कथितवानित्यत्र सन्दिग्धाः शिष्याः परस्परं मुखमालोक्यितुं प्रारभन्त।

13-22 tataḥ sa kam_ud-diśya kathām_etāṃ kathitavān ity_atra san-digdhāḥ śiṣyāḥ paras-paraṃ mukham_ā-lokyituṃ prārabhanta ।

१३-२३ तस्मिन्समये यीशुर्यस्मिनप्रीयत स शिष्यस्तस्य वक्षःस्थलमवालम्बत।

13-23 tasmin sam-aye yīśur_yasmin aprīyata sa śiṣyas_tasya vakṣaḥ-sthalam avālambata ।

१३-२४ शिमोन्पितरस्तं सङ्केतेनावदत्। अहं कमुद्दिश्य कथामेताम्कथयतीति पृच्छ।

13-24 śimon-pitaras_taṃ saṅketenāvadat । ahaṃ kamu_d-diśya kathām_etām kathayatīti pṛccha ।

१३-२५ तदा स यीशोर्वक्षःस्थलमवलम्ब्य पृष्टवान्। हे प्रभो स जनः कः

13-25 tadā sa yīśor_vakṣaḥ-sthalam ava-lambya pṛṣṭavān । he pra-bho sa janaḥ kaḥ?

१३-२६ ततो यीशुः प्रत्यवददेकखण्डं पूपं मज्जयित्वा यस्मै दास्यामि स एव सः। पश्चात्पूपखण्डमेकं मज्जयित्वा शिमोनः पुत्राय ईष्करियोतीयाय यिहूदै दत्तवान्।

13-26 tato yīśuḥ praty_avadad eka-khaṇḍaṃ pūpaṃ majjayitvā yasmai dāsyāmi sa eva saḥ । paścāt pūpa-khaṇḍam_ekaṃ majjayitvā śimonaḥ putrāya īṣkariyotīyāya yihūdai dattavān ।

१३-२७ तस्मिन्दत्ते सति शैतान्तमाश्रयत्। तदा यीशुस्तमवदत्त्वं यत्करिष्यसि तत्क्षिप्रं कुरु।

13-27 tasmin datte sati śaitān tam_āśrayat । tadā yīśus_tam avadat tvaṃ yat kariṣyasi tat kṣipraṃ kuru ।

१३-२८ किंतु स येनाशयेन तां कथामकथयत्तमुपविष्टलोकानां कोऽपि नाबुध्यत।

13-28 kiṃ_tu sa yenāśayena tāṃ kathām_akathayat tam upa-viṣṭa-lokānāṃ ko'pi nābudhyata ।

१३-२९ किंतु यिहूदाः समीपे मुद्रासम्पुटकस्थितेः केचिदित्थमबुध्यन्त पार्वणासादनार्थं किमपि द्रव्यं क्रेतुं वा दरिद्रेभ्यः किंचिद्वितरितुं कथितवान्।

13-29 kiṃ_tu yihūdāḥ sam-īpe mudrā-sampuṭaka-sthiteḥ ke_cid ittham abudhyanta pārvaṇāsādanārthaṃ kim_api dravyaṃ kretuṃ vā daridrebhyaḥ kiṃ_cid vi-tarituṃ kathitavān ।

१३-३० तदा पूपखण्डग्रहणात्परं स तूर्णं बहिरगच्छत्। रात्रिश्च समुपस्थिता।

13-30 tadā pūpa-khaṇḍa-grahaṇāt paraṃ sa tūrṇaṃ bahir-agacchat । rātriś_ca sam-upa-sthitā ।

१३-३१ यिहूदे बहिर्गते यीशुरकथयदिदानीं मानवसुतस्य महिमा प्रकाशते तेनेश्वरस्यापि महिमा प्रकाशते।

13-31 yihūde bahir-gate yīśur_akathayad idānīṃ mānava-sutasya mahimā pra-kāśate teneśvarasyāpi mahimā pra-kāśate ।

१३-३२ यदि तेनेश्वरस्य महिमा प्रकाशते तर्हीश्वरोऽपि स्वेन तस्य महिमानं प्रकाशयिष्यति तूर्णमेव ओरकाशयिष्यति।

13-32 yadi teneśvarasya mahimā pra-kāśate tarhīśvaro'pi svena tasya mahimānaṃ pra-kāśayiṣyati tūrṇam_eva ora-kāśayiṣyati ।

१३-३३ हे वत्सा अहं युष्माभिः सार्धं किंचित्कालमात्रमासे। ततः परं मां मृगयिष्यध्वे किंत्वहं यत्स्थानं यामि तत्स्थानं यूयं गन्तुं न शक्ष्यथ। यामिमां कथां यिहूदीयेभ्यः कथितवान्तथाधुना युष्मभ्यमपि कथयामि।

13-33 he vatsā ahaṃ yuṣmābhiḥ sārdhaṃ kiṃ_cit_kāla-mātram āse । tataḥ paraṃ māṃ mṛgayiṣyadhve kiṃ_tv_ahaṃ yat_sthānaṃ yāmi tat_sthānaṃ yūyaṃ gantuṃ na śakṣyatha । yām_imāṃ kathāṃ yihūdīyebhyaḥ kathitavān tathādhunā yuṣmabhyam_api kathayāmi ।

१३-३४ यूयं परस्परं प्रीयध्वमहं युष्मासु यथा प्रीये यूयमपि परस्परम्तथैव प्रीयध्वम्। युष्मानिमां नवीनामाज्ञामादिशामि।

13-34 yūyaṃ paras-paraṃ prīyadhvam ahaṃ yuṣmāsu yathā prīye yūyam_api paras-param tathaiva prīyadhvam । yuṣmān imāṃ navīnām ā-jñām ā-diśāmi ।

१३-३५ तेनैव यदि परस्परं प्रीयध्वे तर्हि लक्षणेनानेन यूयं मम शिष्या इति सर्वे ज्ञातुं शक्ष्यन्ति।

13-35 tenaiva yadi paras-paraṃ prīyadhve tarhi lakṣaṇenānena yūyaṃ mama śiṣyā iti sarve jñātuṃ śakṣyanti |

१३-३६ शिमोनपितरः पृष्टवान्हे प्रभो भवान्कुत्र यास्यति ततो यीशुः प्रत्यवदत्। अहं यत्स्थानं यामि तत्स्थानं साम्प्रतं मम पश्चाद्गन्तुं न शक्नोषि किंतु पश्चाद्गमिष्यसि।

13-36 śimona-pitaraḥ pṛṣṭavān he pra-bho bhavān kutra yāsyati? tato yīśuḥ praty_avadat | ahaṃ yat-sthānaṃ yāmi tat-sthānaṃ sāmpratam mama paścād gantuṃ na śaknoṣi kiṃ_tu paścād gamiṣyasi |

१३-३७ तदा पितरः प्रत्युदितवान्। हे प्रभो साम्प्रतं कुतो हेतोस्तव पश्चाद्गन्तुं न शक्नोमि

13-37 tadā pitaraḥ praty_uditavān | he pra-bho sāmpratam kuto hetos_tava paścād gantuṃ na śaknomi?

१३-३८ तदथं प्राणान्दातुं शक्नोमि। ततो यीशुः प्रत्युक्तवान्मन्निमित्तं किं प्राणाम्दातुं शक्नोषि त्वामहं यथार्थं वदामि। कुक्कुटरवणात्पूर्वं त्वं त्रिर्मामपह्नोष्यसे।

13-38 tad-athaṃ prāṇān dātuṃ śaknomi | tato yīśuḥ praty-uktavān man-nimittaṃ kiṃ prāṇām dātuṃ śaknoṣi? tvām_ahaṃ yathārthaṃ vadāmi | kukkuṭa-ravaṇāt pūrvaṃ tvaṃ trir_mām apahnoṣyase |

१४-१ मनोदुःखिनो मा भूत। ईश्वरे विश्वसित मयि च विश्वसित।

14-1 mano-duḥkhino mā bhūta | īśvare vi-śvasita mayi ca vi-śvasita |

१४-२ मम पितुर्गृहे बहूनि वासस्थानानि सन्ति नो चेत्पूर्वं युष्मानज्ञापयिष्यं युष्मदर्थं स्थानं सज्जयितुं गच्छामि।

14-2 mama pitur_gṛhe bahūni vāsa-sthānāni santi no cet pūrvaṃ yuṣmān ajñāpayiṣyaṃ yuṣmad-arthaṃ sthānaṃ sajjayituṃ gacchāmi |

१४-३ यदि गत्वाहं युष्मन्निमित्तं स्थानं सज्जयामि तर्हि पुनरागत्य युष्मान्स्वसमीपं नेष्यामि। ततो यत्राहं तिष्ठामि तत्र यूयमपि स्थास्यथ।

14-3 yadi gatvāhaṃ yuṣman-nimittaṃ sthānaṃ sajjayāmi tarhi punar_ā-gatya yuṣmān sva-samīpaṃ neṣyāmi | tato yatrāhaṃ tiṣṭhāmi tatra yūyam_api sthāsyatha |

१४-४ अहं यत्स्थानं व्रजामि तत्स्थानं यूयं जानीथ तस्य पन्थानमपि जानीथ।

14-4 ahaṃ yat-sthānaṃ vrajāmi tat-sthānaṃ yūyaṃ jānītha tasya panthānam_api jānītha |

१४-५ तदा थोमा अवदत्। हे प्रभो भवान्कुत्र याति तद्वयं न जानीमः। तर्हि कथं पन्थानं ज्ञातुं शक्नुमः

14-5 tadā thomā avadat | he pra-bho bhavān kutra yāti tad_vayaṃ na jānīmaḥ | tarhi kathaṃ panthānaṃ jñātuṃ śaknumaḥ?

१४-६ यीशुरकथयदहमेव सत्यजीवनरूपपथो मया न गन्ता कोऽपि पितुः समीपं गन्तुं न शक्नोति।

14-6 yīśur_akathayad aham_eva satya-jīvana-rūpa-patho mayā na gantā ko'pi pituḥ sam-īpaṃ gantuṃ na śaknoti |

१४-७ यदि मामज्ञास्यत तर्हि मम पितरमप्यज्ञास्यत किंत्वधुनातस्तं जानीथ पश्यथ च।

14-7 yadi mām ajñāsyata tarhi mama pitaram_apy_ajñāsyata kiṃ_tv_adhunātas_taṃ jānītha paśyatha ca |

१४-८ तदा फिलिपः कथितवान्। हे प्रभो पितरं दर्शय तस्मादस्माकं यथेष्टं भविष्यति।

14-8 tadā philipaḥ kathitavān | he pra-bho pitaraṃ darśaya tasmād_asmākaṃ yatheṣṭaṃ bhaviṣyati |

१४-९ ततो यीशुः प्रत्यवादीत्। हे फिलिप युष्माभिः सार्धमेतावद्दिनानि स्थितमपि मां किं न प्रत्यभिजानासि यो जनो मामपश्यत्स पितरमप्यपश्यत्तर्हि पितरमस्मान्दर्शयेति कथां कथं कथयसि

14-9 tato yīśuḥ praty-avādīt | he philipa yuṣmābhiḥ sārdham etāvad_dināni sthitam_api māṃ kiṃ na praty-abhi-jānāsi? yo jano mām apaśyat sa pitaram_apy_apaśyat tarhi pitaram asmān darśayeti kathāṃ kathaṃ kathayasi?

१४-१० अहं पितरि तिष्ठामि पिता मयि तिष्ठतीति किं त्वं न प्रत्येषि अहं यद्वाक्यं वदामि तत्स्वतो न वदामि किंतु यः पिता मयि विराजते स एव सर्वकर्माणि करोति।

14-10 ahaṃ pitari tiṣṭhāmi pitā mayi tiṣṭhatīti kiṃ tvaṃ na pratyeṣi? ahaṃ yad-vākyaṃ vadāmi tat svato na vadāmi kiṃ_tu yaḥ pitā mayi vi-rājate sa eva sarva-karmāṇi karoti |

१४-११ अत एव पितर्यहं तिष्ठामि पिता च मयि तिष्ठति ममास्यां कथायां प्रत्ययं कुरुत नो चेत्कर्महेतोः प्रत्ययं कुरुत।

14-11 ata eva pitary_ahaṃ tiṣṭhāmi pitā ca mayi tiṣṭhati mamāsyāṃ kathāyāṃ praty-ayaṃ kuruta no cet karma-hetoḥ praty-ayaṃ kuruta |

१४-१२ अहं युष्मानतियथार्थं वदामि। यो जनो मयि विश्वसिति सोऽहमिव कर्माणि करिष्यति वरं ततोऽपि महाकर्माणि करिष्यति यतो हेतोरहं पितुः समीपं गच्छामि।

14-12 ahaṃ yuṣmān_ati-yathārthaṃ vadāmi | yo jano mayi vi-śvasiti so'ham_iva karmāṇi kariṣyati varaṃ tato'pi mahā-karmāṇi kariṣyati yato hetor_ahaṃ pituḥ sam-īpaṃ gacchāmi |

१४-१३ यथा पुत्रेण पितुर्महिमा प्रकाशते तदथं मम नाम प्रोच्य यत्प्रार्थयिष्यध्वे तत्सफलं करिष्यामि।

14-13 yathā putreṇa pitur_mahimā pra-kāśate tad-athaṃ mama nāma procya yat prārthayiṣyadhve tat sa-phalaṃ kariṣyāmi |

१४-१४ यदि मम नाम्ना यत्किंचिद्याचध्वे तर्हि तदहं साधयिष्यामि।

14-14 yadi mama nāmnā yat kiṃ_cid yācadhve tarhi tad_ahaṃ sādhayiṣyāmi |

१४-१५ यदि मयि प्रीयध्वे तर्हि ममाज्ञाः समाचरत।

14-15 yadi mayi prīyadhve tarhi mamājñāḥ sam-ā-carata |

१४-१६ ततो मया पितुः समीपे प्रार्थिते पिता निरन्तरं युष्माभिः सार्धं स्थातुमितरमेकं सहायमर्थात्सत्यमयमात्मानं युष्माकं निकटं प्रेषयिष्यति।

14-16 tato mayā pituḥ sam-īpe prārthite pitā nir-antaraṃ yuṣmābhiḥ sārdhaṃ sthātum itaram_ekaṃ sahāyam arthāt satyam_ayam ātmānaṃ yuṣmākaṃ ni-kaṭaṃ preṣayiṣyati |

१४-१७ एतज्जगतो लोकास्तं ग्रहीतुं न शक्नुवन्ति यतस्ते तं नाप्श्यन्नाजनंश्च किंतु यूयं जानीथ यतो हेतोः स युष्माकमन्तर्निवसति युष्माकं मध्ये स्थास्यति च।

14-17 etaj-jagato lokās_taṃ grahītuṃ na śaknuvanti yatas_te taṃ nāpśyan nājanaṃś_ca kiṃ_tu yūyaṃ jānītha yato hetoḥ sa yuṣmākam_antar_ni-vasati yuṣmākaṃ madhye sthāsyati ca |

१४-१८ अहं युष्माननाथान्कृत्वा न यास्यामि पुनरपि युष्माकं समीपमागमिष्यामि।

14-18 ahaṃ yuṣmān a-nāthān kṛtvā na yāsyāmi punar_api yuṣmākaṃ sam-īpam ā-gamiṣyāmi |

१४-१९ कियत्कालात्परमस्य हगतो लोका मां पुनर्न द्रक्ष्यन्ति किंतु यूयं द्रक्ष्यथ। अहं जीविष्यामि तस्मात्कारणाद्यूयमपि जीविष्यथ।

14-19 kiyat-kālāt param asya hagato lokā māṃ punar_na drakṣyanti kiṃ_tu yūyaṃ drakṣyatha | ahaṃ jīviṣyāmi tasmāt kāraṇād yūyam_api jīviṣyatha |

१४-२० पितर्यहमस्मि मयि च यूयं स्थ। तथाहं युष्मास्वस्मि तदपि तदा ज्ञास्यथ।

14-20 pitary_aham_asmi mayi ca yūyaṃ stha | tathāhaṃ yuṣmāsv_asmi tad_api tadā jñāsyatha |

१४-२१ यो जनो ममाज्ञा गृहीत्वा ता आचरति स एव मयि प्रीयते। यो जनश्च मयि प्रीयते स एव मम पितुः प्रियपात्रं भविष्यति। तथाहमपि तस्मिन्प्रीत्वा तस्मै स्वं प्रकाशयिष्यामि।

14-21 yo jano mamājñā gṛhītvā tā ā-carati sa eva mayi prīyate | yo janaś_ca mayi prīyate sa eva mama pituḥ priya-pātraṃ bhaviṣyati | tathāham_api tasmin prītvā tasmai svaṃ pra-kāśayiṣyāmi |

१४-२२ तदा ईष्करियोतीयादन्यो यिहूदास्तमवदत्। हे प्रभो भवान्जगतो लोकानां सन्निधौ प्रकाशितो न भूत्वास्माकं सन्निधौ कुतः प्रकाशितो भविष्यति

14-22 tadā īṣkariyotīyād anyo yihūdās_tam_avadat | he pra-bho bhavān jagato lokānāṃ san-ni-dhau pra-kāśito na bhūtvāsmākaṃ san-nidhau kutaḥ pra-kāśito bhaviṣyati?

१४-२३ ततो यीशुः प्रत्युदितवान्। यो जनो मयि प्रीयते स ममाज्ञा अपि गृह्लाति। तेन मम पितापि तस्मिन्प्रेष्यते। आवां च तन्निकटमागत्य तेन सह निवत्स्यावः।

14-23 tato yīśuḥ praty_uditavān | yo jano mayi prīyate sa mamājñā api gṛhṇāti | tena mama pitāpi tasmin preṣyate | āvāṃ ca tan-nikaṭam_ā-gatya tena saha ni-vatsyāvaḥ |

१४-२४ यो जनो मयि न प्रीयते स मम कथा अपि न गृह्लाति पुनश्च यामिमां कथां यूयं शृणुथ सा कथा केवलस्य मम न किंतु मम प्रेरको यः पिता तस्यापि कथा।

14-24 yo jano mayi na prīyate sa mama kathā api na gṛhṇāti punaś_ca yām_imāṃ kathāṃ yūyaṃ śṛṇutha sā kathā kevalasya mama na kiṃ_tu mama prerako yaḥ pitā tasyāpi kathā |

१४-२५ इदानीं युष्माकं निकटे विद्यमानोऽहमेताः सकलाः कथाः कथयामि।

14-25 idānīṃ yuṣmākaṃ ni-kaṭe vidyamāno'ham etāḥ sa-kalāḥ kathāḥ kathayāmi |

१४-२६ किंत्वितः परं पित्रा यः सहायोऽर्थात्पवित्र आत्मा मम नाम्नि प्रेरयिष्यते स सर्वं शिक्षयित्वा मयोक्ताः समस्ताः कथा युष्मान्स्मारयिष्यति।

14-26 kiṃ_tv_itaḥ paraṃ pitrā yaḥ sahāyo'rthāt pavitra ātmā mama nāmni prerayiṣyate sa sarvaṃ śikṣayitvā mayoktāḥ sam-astāḥ kathā yuṣmān smārayiṣyati |

१४-२७ अहं युष्माकं निकटे शान्तिं स्थापयित्वा यामि। निजा शान्तिं युष्मभ्यं ददामि। जगतो लोका यथा ददति तथाहं न ददामि। युष्माकमन्तःकरणानि दुःखितानि भीतानि च न भवन्तु।

14-27 ahaṃ yuṣmākaṃ ni-kaṭe śāntiṃ sthāpayitvā yāmi | ni-jā śāntiṃ yuṣmabhyaṃ dadāmi | jagato lokā yathā dadati tathāhaṃ na dadāmi | yuṣmākam antaḥ-karaṇāni duḥkhitāni bhītāni ca na bhavantu |

१४-२८ अहं गत्वा पुनरपि युष्माकं समीपमागमिष्यामि मयोक्तं वाक्यमिदं यूयमश्रौष्ट।यदि मय्यप्रेष्यध्वं तर्ह्यहं पितुः समीपं गच्छामि ममास्यां कथायां यूयमह्लादिष्यध्वं यतो मम पिता मत्तोऽपि महान्।

14-28 ahaṃ gatvā punar_api yuṣmākaṃ sam-īpam ā-gamiṣyāmi mayoktaṃ vākyam_idaṃ yūyam aśrauṣṭa |yadi mayy_apreṣyadhvaṃ tarhy_ahaṃ pituḥ sam-īpaṃ gacchāmi mamāsyāṃ kathāyāṃ yūyam ahlādiṣyadhvaṃ yato mama pitā matto'pi mahān |

१४-२९ तस्या घटनायाः समये यथा युष्माकं श्रद्धा जायते तदर्थमहं त्सया घटनायाः पूर्वमिदानीं युष्मानेतां वार्त्तां वदामि।

14-29 tasyā ghaṭanāyāḥ sam-aye yathā yuṣmākaṃ śraddhā jāyate tad-artham ahaṃ tsayā ghaṭanāyāḥ pūrvam idānīṃ yuṣmān etāṃ vārttāṃ vadāmi |

१४-३० इतः परं युष्माभिः सह मम बहव आलापा न भविष्यन्ति यतः कारणादेतस्य जगतः पतिरागच्छति किंतु मया सह तस्य कोऽपि सम्बन्धो नास्ति।

14-30 itaḥ paraṃ yuṣmābhiḥ saha mama bahava ā-lāpā na bhaviṣyanti yataḥ kāraṇād etasya jagataḥ patir_ā-gacchati kiṃ_tu mayā saha tasya ko'pi sambandho nāsti |

१४-३१ अहं पितरि प्रेम करोमि तथा पितुर्विधिवत्कर्माणि करोमीति येन जगतो लोका जानन्ति तदर्थमुत्तिष्ठत वयं स्थानादस्माद्गच्छाम।

14-31 ahaṃ pitari prema karomi tathā pitur_vidhivat karmāṇi karomīti yena jagato lokā jānanti tad-artham ut-tiṣṭhata vayaṃ sthānād_asmād gacchāma |

१५-१ अहं सत्यद्राक्षालतास्वरूपो मम्पिता तूद्यानपरिचारकस्वरूपश्च।

15-1 ahaṃ satya-drākṣā-latā-svarūpo mam pitā tūdyāna-paricāraka-svarūpaś_ca |

१५-२ मम यासु शाखासु फलानि न भवन्ति ताः स छिनत्ति तथा फलवत्यः शाखा यथाधिकफलानि फलन्ति तदर्थं ताः परिष्करोति।

15-2 mama yāsu śākhāsu phalāni na bhavanti tāḥ sa chinatti tathā phalavatyaḥ śākhā yathādhika-phalāni phalanti tad-arthaṃ tāḥ pariṣ-karoti |

१५-३ इदानीं मयोक्तोपदेशेन यूयं परिष्कृताः।

15-3 idānīṃ mayoktopadeśena yūyaṃ pariṣ-kṛtāḥ |

१५-४ अतः कारणात्मयि तिष्ठत तेनाहमपि युष्मासु तिष्ठामि। यतो हेतोर्द्राक्षालतायामसंलग्ना शाखा यथा फलवती भवितुं न शक्नोति तथा यूयमपि मय्यतिष्ठन्तः फलवन्तो भवितुं न शक्नुथ।

15-4 ataḥ kāraṇāt mayi tiṣṭhata tenāham_api yuṣmāsu tiṣṭhāmi | yato hetor_drākṣā-latāyām a-saṃ-lagnā śākhā yathā phalavatī bhavituṃ na śaknoti tathā yūyam_api mayy_atiṣṭhantaḥ phalavanto bhavituṃ na śaknutha |

१५-५ अहं द्राक्षालतास्वरूपो यूयं च शाखास्वरूपाः। यो जनो मयि तिष्ठति यत्र चाहं तिष्ठामि। स प्रचुरफलैः फलवान्भवति। किंतु मां विना यूयं किमपि कर्तुं न श्क्नुथ।

15-5 ahaṃ drākṣā-latā-svarūpo yūyaṃ ca śākhā-svarūpāḥ | yo jano mayi tiṣṭhati yatra cāhaṃ tiṣṭhāmi | sa pracura-phalaiḥ phalavān bhavati | kiṃ_tu māṃ vinā yūyaṃ kim_api kartuṃ na śknutha |

१५-६ यः कश्चिन्मयि न तिष्ठति स शुष्कशाखेव बहिर्निक्षिप्यते लोकाश्च ता आहृत्य वह्नौ निक्षिप्य दाहयन्ति।

15-6 yaḥ kaś_cin mayi na tiṣṭhati sa śuṣka-śākheva bahir_ni-kṣipyate lokāś_ca tā ā-hṛtya vahnau ni-kṣipya dāhayanti |

१५-७ यदि यूयं मयि तिष्ठथ मम कथा च युष्मासु तिष्ठति तर्हि यद्वाञ्छित्वा याचिष्यध्वे युष्माकं तदेव सफलं भविष्यति।

15-7 yadi yūyaṃ mayi tiṣṭhatha mama kathā ca yuṣmāsu tiṣṭhati tarhi yad vāñchitvā yāciṣyadhve yuṣmākaṃ tad-eva sa-phalaṃ bhaviṣyati |

१५-८ यदि यूयं प्रचुरफलवन्तो भवथ तर्हि तद्द्वारा मम पितुर्महिमा प्रकाशिष्यते तथा यूयं मम शिष्या इति परिचायिष्यध्वे।

15-8 yadi yūyaṃ pracura-phalavanto bhavatha tarhi tad-dvārā mama pitur_mahimā prakāśiṣyate tathā yūyaṃ mama śiṣyā iti pari-cāyiṣyadhve |

१५-९ पिता यथा मयि प्रीतवानहमपि युष्मासु तथा प्रीतवानतो हेतोर्यूयं निरन्तरं मम प्रेमपात्राणि भूत्वा तिष्ठत।

15-9 pitā yathā mayi prītavān aham_api yuṣmāsu tathā prītavān ato hetor_yūyaṃ nirantaraṃ mama prema-pātrāṇi bhūtvā tiṣṭhata |

१५-१० अहं यथा पितुराज्ञा गृहीत्वा तस्य प्रेमभाजनं तिष्ठामि तथैव यूयमपि यदि ममाज्ञा ग्फ्णीथ तर्हि मम प्रेमभाजनानि स्थास्यथ।

15-10 ahaṃ yathā pitur_ā-jñā gṛhītvā tasya prema-bhājanaṃ tiṣṭhāmi tathaiva yūyam_api yadi mamājñā gphṇītha tarhi mama prema-bhājanāni sthāsyatha |

१५-११ युष्मन्निमित्तं मम य आह्लादः स यथा चितं तिष्ठति युष्माकमानन्दश्च यथा पूर्यते तदर्थं युष्मभ्यमेताः कथा अचकथम्।

15-11 yuṣman-nimittaṃ mama ya ā-hlādaḥ sa yathā citaṃ tiṣṭhati yuṣmākam ā-nandaś_ca yathā pūryate tad-arthaṃ yuṣmabhyam etāḥ kathā acakatham |

१५-१२ अहं युष्मासु यथा प्रीये यूयमपि परस्परं तथा प्रीयध्वमेषा ममाज्ञा।

15-12 ahaṃ yuṣmāsu yathā prīye yūyam_api paras-paraṃ tathā prīyadhvam eṣā mamājñā |

१५-१३ मित्राणां कारणात्स्वप्राणदानपर्यन्तं यत्प्रेम तस्मान्महाप्रेम कस्यापि नास्ति।

15-13 mitrāṇāṃ kāraṇāt sva-prāṇa-dāna-paryantaṃ yat prema tasmān mahā-prema kasyāpi nāsti |

१५-१४ अहं यद्यदादिशामि तत्तदेव यदि यूयमाचरत तर्हि यूयमेव मम मित्राणि।

15-14 ahaṃ yad_yad ā-diśāmi tat_tad_eva yadi yūyam ā-carata tarhi yūyam_eva mama mitrāṇi |

१५-१५ अद्यारभ्य युष्मान्दासान्न वदिष्यामि यतः प्रभुर्यत्करोति दासस्तन्न जानाति। किंतु पितुः समीपे यद्यदशृणवं तत्सर्वं युमानज्ञापयम्तत्कारणाद्युष्मान्मित्राणि प्रोक्तवान्।

15-15 adyārabhya yuṣmān dāsān na vadiṣyāmi yataḥ pra-bhur_yat karoti dāsas_tat na jānāti | kiṃ_tu pituḥ sam-īpe yad-yad aśṛṇavaṃ tat sarvaṃ yumān ajñāpayam tat-kāraṇād yuṣmān mitrāṇi proktavān |

१५-१६ यूयं मां रोचितवन्त इति न। किंत्वहमेव युष्मान्रोचितवान्यूयं गत्वा यथा फलान्युत्पादयथ तानि फलानि चाक्षयाणि भवन्ति। तदर्थं युष्मान्न्ययुनजं तस्मान्मम नाम प्रोच्य पितरं यत्किंचिद्याचिष्यध्वे तदेव स युष्मभ्यं दास्यति।

15-16 yūyaṃ māṃ rocitavanta iti na | kiṃ_tv_aham_eva yuṣmān rocitavān yūyaṃ gatvā yathā phalāny_ut-pādayatha tāni phalāni cākṣayāṇi bhavanti | tad-arthaṃ yuṣmān nyayunajaṃ tasmān mama nāma procya pitaraṃ yat kiṃ_cid yāciṣyadhve tad_eva sa yuṣmabhyaṃ dāsyati |

१५-१७ यूयं परस्परं प्रीयध्वमहमित्याज्ञापयामि।

15-17 yūyaṃ paras-paraṃ prīyadhvam aham ity_ā-jñāpayāmi |

१५-१८ जगतो लोकैर्युष्मासु ऋतीयितेषु ते पूर्वं मामेवार्तीयन्त इति यूयं जानीथ।

15-18 jagato lokair_yuṣmāsu ṛtīyiteṣu te pūrvaṃ mām_evārtīyanta iti yūyaṃ jānītha ǀ

१५-१९ यदि यूयं जगतो लोका अभविष्यत तर्हि जगतो लोका युष्मानात्मीयान्बुद्ध्वाप्रेष्यन्त। किंतु यूयं जगतो लोका न भवथ। अहं युष्मानस्माज्जगतो ऽरोचयमेतस्मात्कारणाज्जगतो लोका युष्मानृतीयन्ते।

15-19 yadi yūyaṃ jagato lokā abhaviṣyata tarhi jagato lokā yuṣmān ātmīyān buddhvāpreṣyanta ǀ kiṃ_tu yūyaṃ jagato lokā na bhavatha ǀ ahaṃ yuṣmān asmāj_jagato 'rocayam etasmāt kāraṇāj_jagato lokā yuṣmān ṛtīyante ǀ

१५-२० दासः प्रभोर्महान्न भवति ममैतत्पूर्वीयं वाक्यं स्मरत। ते यदि मामेवाताडयन्तर्हि युष्मानपि ताडयिष्यन्ति। यदि मम वाक्यं गृह्लन्ति तर्हि युष्माकमपि वाक्यं ग्रहीष्यन्ति।

15-20 dāsaḥ pra-bhor_mahān na bhavati mamaitat pūrvīyaṃ vākyaṃ smarata ǀ te yadi mām_evātāḍayan tarhi yuṣmān_api tāḍayiṣyanti ǀ yadi mama vākyaṃ gṛhṇanti tarhi yuṣmākam_api vākyaṃ grahīṣyanti ǀ

१५-२१ किंतु ते मम नामकारणाद्युष्मान्प्रति तादृशं व्यवहरिष्यन्ति यतो यो मां प्रेरितवान्तं ते न जानन्ति।

15-21 kiṃ_tu te mama nāma-kāraṇād yuṣmān prati tādṛśaṃ vy-ava-hariṣyanti yato yo māṃ preritavān taṃ te na jānanti ǀ

१५-२२ तेषां सन्निधिमागत्य यद्यहं नाकथयिष्यं तर्हि तेषां पापं नाभविष्यत्किंत्वधुना तेषां पापमाच्छादयितुमुपायो नास्ति।

15-22 teṣāṃ san-ni-dhim ā-gatya yady_ahaṃ nākathayiṣyaṃ tarhi teṣāṃ pāpaṃ nābhaviṣyat kiṃ_tv_adhunā teṣāṃ pāpam_ācchādayitum upāyo nāsti ǀ

१५-२३ यो जनो मामृतीयते स मम पितरमपि ऋतीयते।

15-23 yo jano mām ṛtīyate sa mama pitaram_api ṛtīyate ǀ

१५-२४ यादृशानि कर्माणि केनापि कदापि नाक्रियन्त तादृशानि कर्माणि यदि तेषां साक्षादहं नाकरिष्यं तर्हि तेषां पापं नाभविष्यत्किंत्वधुना ते दृष्ट्वापि मां मम पितरं चार्तीयन्त।

15-24 yādṛśāni karmāṇi kenāpi kadāpi nākriyanta tādṛśāni karmāṇi yadi teṣāṃ sākṣād ahaṃ nākariṣyaṃ tarhi teṣāṃ pāpaṃ nābhaviṣyat kiṃ_tv_adhunā te dṛṣṭvāpi māṃ mama pitaraṃ cārtīyanta ǀ

१५-२५ तस्मात्ते ऽकारणं मामृतीयन्ते यदेतद्वचनं तेषां शास्त्रे लिखितमास्ते तत्सफलमभवत्।

15-25 tasmāt te 'kāraṇaṃ māṃ ṛtīyante yad_etad vacanaṃ teṣāṃ śāstre likhitam_āste tat sa-phalam abhavat ǀ

१५-२६ किंतु पितुर्निर्गतं यं सहायमर्थात्सत्यमयमात्मानं पितुः समीपाद्युष्माकं समीपे प्रेषयिष्यामि स आगत्य मयि प्रमाणं दास्यति।

15-26 kiṃ_tu pitur_nirgataṃ yaṃ sahāyam_arthāt satyam_ayam ātmānaṃ pituḥ sam-īpād yuṣmākaṃ sam-īpe preṣayiṣyāmi sa ā-gatya mayi pra-māṇaṃ dāsyati ǀ

१५-२७ यूयं प्रथममारभ्य मया सार्धं तिष्ठथ तस्माद्धेतोर्यूयमपि प्रमाणं दास्यथ।

15-27 yūyaṃ prathamam_ā-rabhya mayā sārdhaṃ tiṣṭhatha tasmād_dhetor_yūyam_api pra-māṇaṃ dāsyatha ǀ

१६-१ युष्माकं यथा वाधा न जायते तदर्थं युष्मानेतानि सर्ववाक्यानि व्याहरम्।

16-1 yuṣmākaṃ yathā vādhā na jāyate tad-arthaṃ yuṣmān etāni sarva-vākyāni vy-āharam ǀ

१६-२ लोका युष्मान्भजनगृहेभ्यो दूरीकरिष्यन्ति तथा यस्मिन्समये युष्मान्हत्वा ईश्वरस्य तुष्टिजनकं कर्माकुर्म इति मंस्यन्ते स समय आगच्छति।

16-2 lokā yuṣmān bhajana-gṛhebhyo dūrī-kariṣyanti tathā yasmin sam-aye yuṣmān hatvā īśvarasya tuṣṭi-janakaṃ karmākurma iti maṃsyante sa sam-aya ā-gacchati ǀ

१६-३ ते पितरं मांच न जानन्ति। तस्माद्युष्मान्प्रतीदृशमाचरिष्यन्ति।

16-3 te pitaraṃ māṃ_ca na jānanti ǀ tasmād yuṣmān pratīdṛśam ā-cariṣyanti ǀ

१६-४ अतो हेतोः समये समुपस्थिते यथा मम कथा युष्माकं मनःसु समुपतिष्ठति तदर्थं युष्मभ्यमेतां कथां कथयामि युष्माभिः सार्धमहं तिष्ठन्प्रथमं तां युष्मभ्यं नाकथयम्।

16-4 ato hetoḥ sam-aye sam-upa-sthite yathā mama kathā yuṣmākaṃ manaḥsu sam-upa-tiṣṭhati tad-arthaṃ yuṣmabhyam etāṃ kathāṃ kathayāmi yuṣmābhiḥ sārdham ahaṃ tiṣṭhan prathamaṃ tāṃ yuṣmabhyaṃ nākathayam ǀ

१६-५ साम्प्रतं स्वस्य प्रेरयितुः समीपं गच्छामि तथापि त्वं क्व गच्छसि कथामेतां युष्माकं कोऽपि मां न पृच्छति।

16-5 sāmprataṃ svasya prerayituḥ sam-īpaṃ gacchāmi tathāpi tvaṃ kva gacchasi kathām_etāṃ yuṣmākaṃ ko'pi māṃ na pṛcchati ǀ

१६-६ किंतु मयोक्ताभिराभिः कथाभिर्युष्माकमन्तःकरणानि दुःखेन पूर्वान्यभवन्।

16-6 kiṃ_tu mayoktābhir_ābhiḥ kathābhir_yuṣmākam antaḥ-karaṇāni duḥkhena pūrvāny_abhavan ǀ

१६-७ तथाप्यहं यथार्थं कथयामि मम गमनं युष्माकं हितार्थमेव यतो हेतोर्गमने न कृते सहायो युष्माकं समीपं नागमिष्यति किंतु यदि गच्छामि तर्हि युष्माकं समीपे तं प्रेषयिष्यामि।

16-7 tathāpy_ahaṃ yathārthaṃ kathayāmi mama gamanaṃ yuṣmākaṃ hitārtham_eva yato hetor_gamane na kṛte sahāyo yuṣmākaṃ sam-īpaṃ nāgamiṣyati kiṃ_tu yadi gacchāmi tarhi yuṣmākaṃ sam-īpe taṃ preṣayiṣyāmi ǀ

१६-८ ततः स आगत्य पापपुण्यदण्डेषु जगतो लोकानां प्रबोधं जनयिष्यति।

16-8 tataḥ sa ā-gatya pāpa-puṇya-daṇḍeṣu jagato lokānāṃ pra-bodhaṃ janayiṣyati ǀ

१६-९ ते मयि न विश्वसन्ति तस्माद्धेतोः पापप्रबोधं जनयिष्यन्ति।

16-9 te mayi na vi-śvasanti tasmād-dhetoḥ pāpa-prabodhaṃ janayiṣyanti ǀ

१६-१० युष्माकमदृश्यः सन्नहं पितुः समीपं गच्छामि तस्मात्पुण्ये प्रबोधं जनयिष्यति।

16-10 yuṣmākam a-dṛśyaḥ san_nahaṃ pituḥ sam-īpaṃ gacchāmi tasmāt puṇye pra-bodhaṃ janayiṣyati ǀ

१६-११ एतज्जगतो ऽधिपतिर्दण्डाज्ञां प्राप्नोति तस्माद्दण्डे प्रबोधं जनयिष्यति।

16-11 etaj-jagato 'dhi-patir_daṇḍājñāṃ prāpnoti tasmād daṇḍe pra-bodhaṃ janayiṣyati ǀ

१६-१२ युष्मभ्यं कथयितुं ममानेकाः कथा आसते। ताः कथा इदानीं यूयं सोढुं न शक्नुथ।

16-12 yuṣmabhyaṃ kathayituṃ mamānekāḥ kathā āsate ǀ tāḥ kathā idānīṃ yūyaṃ soḍhuṃ na śaknutha ǀ

१६-१३ किंतु सत्यमय आत्मा यदा समागमिष्यति तदा सर्वं सत्यं युष्मान्नेष्यति। स स्वतः किमपि न वदिष्यति किंतु यच्छ्रोष्यति तदेव कथयित्वा भाविकार्यं युष्मान्ज्ञापयिष्यति।

16-13 kiṃ_tu satyamaya ātmā yadā sam-ā-gamiṣyati tadā sarvaṃ satyaṃ yuṣmān neṣyati ǀ sa svataḥ kim_api na vadiṣyati kiṃ_tu yacchroṣyati tad_eva kathayitvā bhāvikāryaṃ yuṣmān jñāpayiṣyati ǀ

१६-१४ मम महिमानं प्रकाशयिष्यति यतो मदीयां कथां गृहीत्वा युष्मान्बोधयिष्यति।

16-14 mama mahimānaṃ pra-kāśayiṣyati yato madīyāṃ kathāṃ gṛhītvā yuṣmān bodhayiṣyati ǀ

१६-१५ पितुर्यद्यदास्ते तत्सर्वं मम तस्मात्कारणादवादिषं स मदीयां कथां गृहीत्वा युष्मान्बोधयिष्यति।

16-15 pitur_yad_yad āste tat sarvaṃ mama tasmāt kāraṇād avādiṣaṃ sa madīyāṃ kathāṃ gṛhītvā yuṣmān bodhayiṣyati ǀ

१६-१६ कियत्कालात्परं यूयं मां द्रष्टुं न लप्स्यध्वे किंतु कियत्कालात्परं पुनर्द्रष्टुं लप्स्यध्वे यतो ऽहं पितुः समीपं गच्छामि।

16-16 kiyat-kālāt paraṃ yūyaṃ māṃ draṣṭuṃ na lapsyadhve kiṃ_tu kiyat-kālāt paraṃ punar_draṣṭuṃ lapsyadhve yato 'haṃ pituḥ sam-īpaṃ gacchāmi ǀ

१६-१७ ततः शिष्याणां कियन्तो जनाः परस्परं वदितुमारभन्त। लियत्कालात्परं मां द्रष्टुं न लप्स्यध्वे किंतु कियत्कालात्परं पुनर्द्रष्टुं लप्स्यध्वे यतो ऽहं पितुः समीपं गच्छामि इति यद्वाक्यमयं वदति तत्किं

16-17 tataḥ śiṣyāṇāṃ kiyanto janāḥ paras-paraṃ vaditum ā-rabhanta ǀ liyat-kālāt paraṃ māṃ draṣṭuṃ na lapsyadhve kiṃ_tu kiyat-kālāt paraṃ punar_draṣṭuṃ lapsyadhve yato 'haṃ pituḥ sam-īpaṃ gacchāmi iti yad vākyam ayaṃ vadati tat kiṃ?

१६-१८ ततः कियत्कालात्परमिति तस्य वाक्यं किम् तस्य वाक्यस्याभिप्रायं वयं बोद्धुं न शक्नुमस्तैरिति निगदिते

16-18 tataḥ kiyat-kālāt param iti tasya vākyaṃ kim? tasya vākyasyābhi-prāyaṃ vayaṃ boddhuṃ na śaknumas_tair_iti ni-gadite

१६-१९ यीशुस्तेषां प्रश्नेच्छां ज्ञात्वा तेभ्यो ऽकथयत्कियत्कालात्परं मां द्रष्टुं न लप्स्यध्वे। किंतु कियत्कालात्परं पुनर्द्रष्टुं लप्स्यध्वे यामिमां कथामकथयं तस्या अभिप्रायं किं यूयं परस्परं मृगयध्वे

16-19 yīśus_teṣāṃ praśnecchāṃ jñātvā tebhyo 'kathayat kiyat-kālāt paraṃ māṃ draṣṭuṃ na lapsyadhve | kiṃ_tu kiyat-kālāt paraṃ punar_draṣṭuṃ lapsyadhve yām_imāṃ kathām_akathayaṃ tasyā abhiprāyaṃ kiṃ yūyaṃ paras-paraṃ mṛgayadhve?

१६-२० युष्मानह्मतियथार्थं वदामि यूयं क्रन्दिष्यथ विलपिष्यथ च। किंतु जगतो लोका आनन्दिष्यन्ति। यूयं शोकाकुला भविष्यथ किंतु शोकात्परं आनन्दयुक्ता भविष्यथ।

16-20 yuSmAn_ahm ati-yathArthaM vadAmi yUyaM krandiSyatha vi-lapiSyatha ca | kiṃ_tu jagato lokā ā-nandiṣyanti | yūyaṃ śokākulā bhaviṣyatha kiṃ_tu śokāt paraṃ ānanda-yuktā bhaviṣyatha |

१६-२१ प्रसक्तकाल उपस्थिते नारी यथा प्रसववेदनया व्याकुला भवति किंतु पुत्रे भूमिष्ठे सति मनुष्यैको जन्मना नरलोके प्रविष्ट इत्यानन्दात्तस्यास्तत्सर्वं दुःखं मनसि न तिष्ठति।

16-21 prasakta-kāla upa-sthite nārī yathā prasava-vedanayā vyākulā bhavati kiṃ_tu putre bhūmiṣṭhe sati manuṣyaiko janmnanā nara-loke pra-viṣṭa ity_ā-nandāt tasyās_tat_sarvaṃ duḥ-khaṃ manasi na tiṣṭhati |

१६-२२ तथा यूयमपि साम्प्रतं शोकाकुला भवथ किंतु पुनरपि युष्मभ्यं दर्शनं दास्यामि तेन युष्माकमन्तःकरणानि सानन्दानि भविष्यन्ति। युष्माकं तमानन्दं च कोऽपि हर्तुं न शक्ष्यति।

16-22 tathā yūyam_api sāmpratam śokākulā bhavatha kiṃ_tu punar_api yuṣmabhyaṃ darśanaṃ dāsyāmi tena yuṣmākam antaḥ-karaṇāni sānandāni bhaviṣyanti | yuṣmākaṃ tam ā-nandaṃ ca ko'pi hartuṃ na śakṣyati |

१६-२३ तस्मिन्दिवसे कामपि कथां मां न प्रक्ष्यथ। युष्मानहमतियथार्थं वदामि। मम नाम्ना यत्किम्चित्पितरं याचिष्यध्वे तदेव स दास्यति।

16-23 tasmin divase kām_api kathāṃ māṃ na prakṣyatha | yuṣmān_aham ati-yathārthaṃ vadāmi | mama nāmnā yat kim_cit pitaraṃ yāciṣyadhve tad_eva sa dāsyati |

१६-२४ पूर्वे मम नाम्ना किमपि नायाचध्वं ततः प्राप्स्यथ तस्माद्युष्माकं सम्पूर्णानन्दो जनिष्यते।

16-24 pūrve mama nāmnā kim_api nāyācadhvaṃ tataḥ prāpsyatha tasmād yuṣmākaṃ sam-pūrṇānando janiṣyate |

१६-२५ उपमाकथाभिः सर्वाण्येतानि युष्मान्ज्ञापितवान्किंतु यस्मिन्समये उपमया नोक्त्वा पितुः कथां स्पष्टं ज्ञापयिष्यामि समय एतादृश आगच्छति।

16-25 upamā-kathābhiḥ sarvāṇy_etāni yuṣmān jñāpitavān kiṃ_tu yasmin sam-aye upa-mayā noktvā pituḥ kathāṃ spaṣṭaṃ jñāpayiṣyāmi sam-aya etādṛśa ā-gacchati |

१६-२६ तदा मम नाम्ना प्रार्थयिष्यध्वे ऽहं युष्मन्निमित्तं पितरं विनेष्ये कथामिमां न वदामि।

16-26 tadā mama nāmnā prārthayiṣyadhve 'haṃ yuṣman-nimittaṃ pitaraṃ vi-neṣye kathām_imāṃ na vadāmi |

१६-२७ यतो यूयं मयि प्रेम कुरुथ तथाहमीश्वरस्य समीपादागतवानित्यपि प्रतीथ। तस्मात्कारणात्पिता स्वयं युष्मासु प्रीयते।

16-27 yato yūyaṃ mayi prema kurutha tathāham īśvarasya sam-īpād ā-gatavān ity_api pratītha | tasmāt kāraṇāt pitā svayaṃ yuṣmāsu prīyate |

१६-२८ पितुः समीपाज्जगदागतोऽस्मि जगत्परित्यज्य च पुनरपि पितुः समीपं गच्छामि।

16-28 pituḥ sam-īpāj_jagad ā-gato'smi jagat pari-tyajya ca punar_api pituḥ sam-īpaṃ gacchāmi |

१६-२९ तदा शिष्या अवदन्। हे प्रभो भवानुपमया नोक्त्वाधुना स्पष्टं वदति।स्

16-29 tadā śiṣyā avadan | he pra-bho bhavān upa-mayā noktvādhunā spaṣṭaṃ vadati |s

१६-३० भवान्सर्वज्ञः केनचित्पृष्टो भवितुमपि भवतः प्रयोजनं नास्तीत्यत्यधुनास्माकं स्थिरज्ञानं जातं तस्माद्भवानीश्वरस्य समीपादागतवानित्यत्र वयं विश्वसिमः।

16-30 bhavān sarva-jñaḥ kena_cit pṛṣṭo bhavitum_api bhavataḥ pra-yojanaṃ nāstīty_aty_adhunāsmākaṃ sthira-jñānaṃ jātaṃ tasmād bhavān īśvarasya sam-īpād ā-gatavān ity_atra vayaṃ vi-śvasimaḥ |

१६-३१ ततो यीशुः प्रत्यवादीदिदानीं किं यूयं विश्वसिथ

16-31 tato yīśuḥ praty_avādīd idānīṃ kiṃ yūyaṃ vi-śvasitha?

१६-३२ पश्यत सर्वे यूयं विकीर्णाः सन्तो मामेकाकिनं परित्यज्य स्वं स्वं स्थानं गमिष्यथ। एतादृशः समय आगच्छति वरं प्रायेणोपस्थितवान्। तथाप्यहं नैकाकी भवामि यतः पिता मया सार्धमास्ते।

16-32 paśyata sarve yūyaṃ vi-kīrṇāḥ santo mām ekākinaṃ pari-tyajya svaṃ svaṃ sthānaṃ gamiṣyatha | etādṛśaḥ sam-aya ā-gacchati varaṃ prāyeṇopasthitavān | tathāpy_ahaṃ naikākī bhavāmi yataḥ pitā mayā sārdham āste |

१६-३३ यथा मया युष्माकं शान्तिर्जायते तदर्थमेताः कथा युष्मभ्यमचकथम्। अस्मिन्जगति युष्माकं क्लेशो घटिष्यते किंत्वक्षोभा भवत यतो मया जगज्जितम्।

16-33 yathā mayā yuṣmākaṃ śāntir_jāyate tad-artham etāḥ kathā yuṣmabhyam acakatham | asmin jagati yuṣmākaṃ kleśo ghaṭiṣyate kiṃ_tv_akṣobhā bhavata yato mayā jagaj_jitam |

१७-१ ततः परं यीशुरेताः कथाः कथयित्वा स्वर्गं विलोक्यैतत्प्रार्थयत। हे पितः समय उपस्थितवान्। यथा तव पुत्रस्तव महिमानं प्रकाशयति तदर्थं त्वं निजपुत्रस्य महिमानं प्रकाशय।

17-1 tataḥ paraṃ yīśur_etāḥ kathāḥ kathayitvā svargaṃ vi-lokyaitat prārthayata | he pitaḥ sam-aya upa-sthitavān | yathā tava putras_tava mahimānaṃ pra-kāśayati tad-arthaṃ tvaṃ nija-putrasya mahimānaṃ pra-kāśaya |

१७-२ त्वं यांल्लोकान्तस्य हस्ते समर्पितवान्स यथा तेभ्यो ऽनन्तायुर्ददाति तदर्थं त्वं प्राणिमात्राणामधिपतित्वभारं तस्मै दत्तवान्।

17-2 tvaṃ yāṃl_lokān tasya haste sam-arpitavān sa yathā tebhyo 'nantāyur_dadāti tad-arthaṃ tvaṃ prāṇi-mātrāṇām adhi-patitva-bhāraṃ tasmai dattavān |

१७-३ यस्त्वमद्वितीयः सत्य ईश्वरस्त्वया प्रेरितश्च यीशुः ख्रीष्टेतयोरुभयोः परिचये प्राप्ते ऽनन्तायुर्भवति।

17-3 yas_tvam a-dvitīyaḥ satya īśvaras_tvayā preritaś_ca yīśuḥ khrīṣṭ etayor_ubhayoḥ pari-caye prāpte 'nantāyur_bhavati |

१७-४ त्वं यस्य कर्मणो भारं मह्यं दत्तवान्। तत्सम्पन्नं कृत्वा जगत्यस्मिन्तव महिमानं प्राकाशयम्।

17-4 tvaṃ yasya karmaṇo bhāraṃ mahyaṃ dattavān | tat sam-pannaṃ kṛtvā jagaty_asmin tava mahimānaṃ prākāśayam |

१७-५ अत एव हे पितर्जगत्यविद्यमाने त्वया सह तिष्ठतो मम यो महिमासीत्सम्प्रति तव समीपे मां तं महिमानं प्रापय।

17-5 ata eva he pitar_jagaty_avidyamāne tvayā saha tiṣṭhato mama yo mahimāsīt sam-prati tava sam-īpe māṃ taṃ mahimānaṃ prāpaya |

१७-६ अन्यच्च त्वमेतज्जगतो यांल्लोकान्मह्यमददा अहं तेभ्यस्तव नाम्नस्तत्त्वज्ञानमददां। ते तवैवासन्। त्वं तान्मह्यमददाः।

17-6 anyac_ca tvam etaj-jagato yāṃl_lokān mahyam adadā ahaṃ tebhyas_tava nāmnas_tattva-jñānam adadāṃ | te tavaivāsan | tvaṃ tān mahyam_adadāḥ |

१७-७ तस्मात्ते तवोपदेशमगृह्लन्। त्वं मह्यं यत्किंचिददास्तत्सर्वं त्वत्तो जायते इत्यधुनाजानन्।

17-7 tasmāt_te tavopadeśam agṛhṇan | tvaṃ mahyaṃ yat kiṃ_cid adadās_tat_sarvaṃ tvatto jāyate ity_adhunājānan |

१७-८ मह्यं यमुपदेशमददा अहमपि तेभ्यसुपदेशमददां तेऽपि तमगृह्लन्त्वत्तोऽहं निर्गत्य त्वया प्रेरितोऽभवमत्र च व्यश्वसन्।

17-8 mahyaṃ yam_upadeśam adadā aham_api tebhyas_upadeśam adadāṃ te'pi tam_agṛhṇan tvatto'haṃ nir-gatya tvayā prerito'bhavam atra ca vy-aśvasan |

१७-९ तेषामेव निमित्तं प्रार्थयेऽहं जगतो लोकनिमित्तं न प्रार्थये किंतु यांल्लोकान्मह्यमददास्तेषामेव निमित्तं प्रार्थयेऽहं यतस्ते तवैवासते।

17-9 teṣām_eva ni-mittaṃ prārthaye'haṃ jagato loka-nimittaṃ na prārthaye kiṃ_tu yāṃl_lokān mahyam adadās_teṣām_eva ni-mittaṃ prārthaye'haṃ yatas_te tavaivāsate |

१७-१० ये मम ते तव ये च तव ते मम तथा तैर्मम महिमा प्रकाश्यते।

17-10 ye mama te tava ye ca tava te mama tathā tair_mama mahimā pra-kāśyate |

१७-११ साम्प्रतमस्मिन्जगति ममावस्थितेः शेषमभवतहं तव समीपं गच्छामि किंतु ते जगति स्थास्यति। हे पवित्र पितरावयोर्यथैकत्वमास्ते तथा तेषामप्येतकत्वं भवति तदर्थं यांल्लोकान्मह्यमददास्तान्स्वनाम्ना रक्ष।

17-11 sāmpratam asmin jagati mamāvasthiteḥ śeṣam abhavat ahaṃ tava sam-īpaṃ gacchāmi kiṃ_tu te jagati sthāsyati | he pavitra pitar_āvayor_yathaikatvam_āste tathā teṣām_apy_etakatvaṃ bhavati tad-arthaṃ yāṃl_lokān mahyam adadās_tān sva-nāmnā rakṣa |

१७-१२ यावन्ति दिनानि जगत्यस्मिन्तैः सहाहमासं तावन्ति दिनानि तान्तव नाम्नाहं रक्षितवान्। यांल्लोकान्मह्यमददास्तान्सर्वानहमरक्षम्। तेषां मध्ये केवलं विनाशपात्रं हारितं तेन धर्मपुस्तकस्य वचनं प्रत्यक्षं भवति।

17-12 yāvanti dināni jagaty_asmin taiḥ sahāham_āsaṃ tāvanti dināni tān tava nāmnāhaṃ rakṣitavān | yāṃl_lokān mahyam adadās_tān sarvān aham_arakṣam | teṣāṃ madhye kevalaṃ vināśa-pātraṃ hāritaṃ tena dharma-pustakasya vacanaṃ praty_akṣaṃ bhavati |

१७-१३ किंत्वधुना तव सन्निधिं गच्छामि मया यथा तेषां सम्पूर्णानन्दो भवति तदर्थमहं जगति तिष्ठनेताः कथा अकथयम्।

17-13 kiṃ_tv_adhunā tava san-ni-dhiṃ gacchāmi mayā yathā teṣāṃ sam-pūrṇānando bhavati tad-artham_ahaṃ jagati tiṣṭhan etāḥ kathā akathayam |

१७-१४ तवोपदेशं तेभ्यो ऽददां जगता सह यथा मम सम्बन्धो नास्ति तथा जजता सह तेषामपि सम्बन्धाभावाज्जगतो लोकास्तानृतीयन्ते।

17-14 tavopadeśaṃ tebhyo 'dadāṃ jagatā saha yathā mama sam-bandho nāsti tathā jajatā saha teṣām_api sam-bandhābhāvāj_jagato lokās_tān ṛtīyante |

१७-१५ त्वं जगतस्तान्गृहाणेति न प्रार्थये किंत्वशुभाद्रक्षेति प्रार्थये ऽहम्।

17-15 tvaṃ jagatas_tān gṛhāṇeti na prārthaye kiṃtv_a-śubhād rakṣeti prārthaye 'ham |

१७-१६ अहं यथा जगत्सम्बन्धीयो न भवामि तथा ते ऽपि जगत्सम्बन्धीया न भवन्ति।

17-16 ahaṃ yathā jagat-sam-bandhīyo na bhavāmi tathā te 'pi jagat-sambandhīyā na bhavanti |

१७-१७ तव सत्यकथया तान्पवित्रीकुरु तव वाक्यमेव सत्यम्।

17-17 tava satya-kathayā tān pavitrī_kuru tava vākyam_eva satyam |

१७-१८ त्वं यथा मां जगति प्रैरयस्तथाहमपि तान्जगति प्रैरयम्।

17-18 tvaṃ yathā māṃ jagati prairayas_tathāham_api tān jagati prairayam |

१७-१९ तेषां हितार्थं यथाहं स्वं पवित्रीकरोमि तथा सत्यकथया तेऽपि पवित्रीभवन्तु।

17-19 teṣāṃ hitārthaṃ yathāhaṃ svaṃ pavitrī_karomi tathā satya-kathayā te'pi pavitrī_bhavantu |

१७-२० केवलं एतेषामर्थे प्रार्थये।हमिति न किंत्वेतेषामुपदेशेन ये जना मयि विश्वसिष्यन्ति तेषामप्यर्थे प्रार्थये ऽहम्।

17-20 kevalaṃ eteṣām_arthe prārthaye |ham iti na kiṃ_tv_eteṣām_upadeśena ye janā mayi vi-śvasiṣyanti teṣām_apy_arthe prārthaye 'ham |

१७-२१ हे पितस्तेषां सर्वेषामेकत्वं भवतु तव यथा मयि मम च यथा त्वय्येकत्वं तथा तेषामप्यावयोरेकत्वं भवतु तेन त्वं मां प्रेरितवानिति जगतो लोकाः प्रतियन्तु।

17-21 he pitas_teṣāṃ sarveṣām ekatvaṃ bhavatu tava yathā mayi mama ca yathā tvayy_ekatvaṃ tathā teṣām_apy_āvayor_ekatvaṃ bhavatu tena tvaṃ māṃ preritavān iti jagato lokāḥ prati-yantu |

१७-२२ यथावयोरेकत्वं यथा तेषामप्येकत्वं भवतु तेष्वहं मयि च त्वमित्थं तेषां सम्पूर्णमेकत्वं भवतु। त्वं मां प्रेरितवान्त्वं मयि यथा प्रीयसे च तथा तेष्वपि प्रीतवान्

17-22 yathāvayor_ekatvaṃ yathā teṣām_apy_ekatvaṃ bhavatu teṣv_ahaṃ mayi ca tvam itthaṃ teṣāṃ sam-pūrṇam_ekatvaṃ bhavatu | tvaṃ māṃ preritavān tvaṃ mayi yathā prīyase ca tathā teṣv_api prītavān

१७-२३ एतद्यथा जगतो लोका जानन्ति तदर्थं त्वं यं महिमानं मह्यमददास्तं महिमानमहमपि तेभ्यो दत्तवान्।

17-23 etad_yathā jagato lokā jānanti tad-arthaṃ tvaṃ yaṃ mahimānaṃ mahyam adadās_taṃ mahimānam aham_api tebhyo dattavān |

१७-२४ हे पितर्जगतो निर्माणात्पूर्वं मयि स्नेहं कृत्वा यं महिमानं दत्तवान्मम तं महिमानं यथा ते पश्यन्ति तदर्थं यांल्लोकान्मह्यं दत्तवानहं यत्र तिष्ठामि तेऽपि यथा तत्र तिष्ठन्ति ममैषा वाञ्छा।

17-24 he pitar_jagato nir-māṇāt pūrvaṃ mayi snehaṃ kṛtvā yaṃ mahimānaṃ dattavān mama taṃ mahimānaṃ yathā te paśyanti tad-arthaṃ yāṃl_lokān mahyaṃ dattavān ahaṃ yatra tiṣṭhāmi te'pi yathā tatra tiṣṭhanti mamaiṣā vāñchā |

१७-२५ हे याथार्थिक पितर्जगतो लोकैस्त्वय्यज्ञातेऽपि त्वामहं जाने त्वं मां प्रेरितवानितीमे शिष्या जानन्ति।

17-25 he yāthārthika pitar_jagato lokais_tvayy_ajñāte'pi tvām_ahaṃ jāne tvaṃ māṃ preritavān itīme śiṣyā jānanti |

१७-२६ यथाहं तेषु तिष्ठामि तथा मयि येन प्रेम्ना प्रेमाकरोस्तत्तेषु तिष्ठति तदर्थं तव नामाहं तान्ज्ञापितवान्पुनरपि ज्ञापयिष्यामि।

17-26 yathāhaṃ teṣu tiṣṭhāmi tathā mayi yena premnā premākaros_tat teṣu tiṣṭhati tad-arthaṃ tava nāmāhaṃ tān jñāpitavān punar_api jñāpayiṣyāmi |

१८-१ ताः कथाः कथयित्वा यीशुः शिष्यानादाय किद्रोन्नामकं स्रात उत्तीर्य शिष्यैः सह तत्रत्योद्यानं प्राविशत्।

18-1 tāḥ kathāḥ kathayitvā yīśuḥ śiṣyān_ā-dāya kidron-nāmakaṃ srāta ut-tīrya śiṣyaiḥ saha tatratyodyānaṃ prāviśat |

१८-२ किंतु विश्वासघातियिहूदास्तत्स्थानं परिचीयते यतो यीशुः शिष्यैः सार्धं कदाचित्तत्स्थानमगच्छत्।

18-2 kiṃ_tu vi-śvāsa-ghāti-yihūdās_tat sthānaṃ pari-cīyate yato yīśuḥ śiṣyaiḥ sārdhaṃ kadā_cit tat sthānam agacchat |

१८-३ तदा स यिहूदाः सैन्यगणं प्रधानयाजकानां फिरूशिनां च पदातिगणं च गृहीत्वा प्रदीपानुल्कानस्त्राणि चादाय तस्मिन्स्थान उपस्थितवान्।

18-3 tadā sa yihūdāḥ sainya-gaṇaṃ pradhāna-yājakānāṃ phirūśināṃ ca padāti-gaṇaṃ ca gṛhītvā pra-dīpān ulkān astrāṇi cādāya tasmin sthāna upa-sthitavān |

१८-४ स्वं प्रति यद्घटिष्यते तज्ज्ञात्वा यीशुरग्रेसरः सन्तानपृच्छत्कं गवेषयथ

18-4 svaṃ prati yad ghaṭiṣyate taj_jñātvā yīśur_agre-saraḥ san tān_apṛcchat kaṃ gaveṣayatha?

१८-५ ते प्रत्यवदन्। नासरतीयं यीशुम्। ततो यीशुरवादीद्। अहम्सः। तैः सह विश्वासघाती यिहूदाश्चातिष्ठत्।

18-5 te praty_avadan | nāsaratīyam yīśum | tato yīśur_avādīd | aham saḥ | taiḥ saha vi-śvāsa-ghātī yihūdāś_cātiṣṭhat |

१८-६ तदाहमेव स तस्थैतां कथां श्रुत्वैव ते पश्चादेत्य भूमौ पतिताः।

18-6 tadāham_eva sa tasthaitāṃ kathāṃ śrutvaiva te paścād_etya bhūmau patitāḥ |

१८-७ ततो यीशुः पुनरपि पृष्टवान्कं गवेषयथ ततस्ते प्रत्यवदन्नासरतीयं यीशुम्।

18-7 tato yīśuḥ punar_api pṛṣṭavān kaṃ gaveṣayatha? tatas_te praty_avadan nāsaratīyaṃ yīśum |

१८-८ तदा यीशुः प्रत्युदितवानहमेव स इमां कथामचकथम्। यदि मामन्विच्छथ तर्हीमान्गन्तुं मा वारयथ।

18-8 tadā yīśuḥ praty-uditavān aham_eva sa imāṃ kathām_acakatham | yadi mām_anv-icchatha tarhīmān gantuṃ mā vārayatha |

१८-९ इत्थं भूते मह्यं यांल्लोकानददास्तेषामेकमपि नाहारयम्। इमां यां कथां स स्वयमकथयत्सा कथा सफला जाता।

18-9 itthaṃ bhūte mahyaṃ yāṃl_lokān adadās_teṣām ekam_api nāhārayam | imāṃ yāṃ kathāṃ sa svayam_akathayat sā kathā sa-phalā jātā |

१८-१० तदा शिमोन्पितरस्य निकटे खड्गस्थितेः स तं निष्कोषं कृत्वा महायाजकस्य माल्खनामानं दासमाहत्य तस्य दक्षिणकर्मं छिन्नवान्।

18-10 tadā śimon-pitarasya ni-kaṭe khaḍga-sthiteḥ sa taṃ niṣ-koṣaṃ kṛtvā mahā-yājakasya mālkha-nāmānaṃ dāsam ā-hatya tasya dakṣiṇa-karmaṃ chinnavān |

१८-११ ततो यीशुः पितरमवदत्खड्गं कोषे स्थापय मम पिता मह्यं पातुं यं कंसमददात्तेनाहं किं न पास्यामि

18-11 tato yīśuḥ pitaram avadat khaḍgaṃ koṣe sthāpaya mama pitā mahyaṃ pātuṃ yaṃ kaṃsam adadāt tenāhaṃ kiṃ na pāsyāmi?

१८-१२ तदा सैन्यगणः सेनापतिर्यिहूदीयानां पदातयश्च यीशुं धृत्वा बद्ध्वा हानन्नाम्नः कियफाः श्वशुरस्य समीपं प्रथममनयन्।

18-12 tadā sainya-gaṇaḥ senā-patir_yihūdīyānāṃ padātayaś_ca yīśuṃ dhṛtvā baddhvā hānan-nāmnaḥ kiyaphāḥ śvaśurasya sam-īpaṃ prathamam anayan ǀ

१८-१३ स कियफास्तस्मिन्वत्सरे महायाजत्वपदे नियुक्तः सन्

18-13 sa kiyaphās_tasmin vatsare mahā-yājatva-pade niyuktaḥ san

१८-१४ साधारणलोकानां मङ्गलार्थमेकजनस्य मरणमुचितमिति यिहूदीयैः सार्धममन्त्रयत्।

18-14 sādhāraṇa-lokānāṃ maṅgalārtham eka-janasya maraṇam_ucitam iti yihūdīyaiḥ sārdham amantrayat ǀ

१८-१५ तदा शिमोन्पितरो ऽन्यैकशिष्यश्च यीशोः पश्चादगच्छतां तस्यान्यशिष्यस्य महायाजकेन परिचितत्वात्स यीशुना सह महायाजकस्याट्टालिकां प्राविशत्।

18-15 tadā śimon-pitaro 'nyaika-śiṣyaś_ca yīśoḥ paścād agacchatāṃ tasyānya-śiṣyasya mahā-yājakena pari-citatvāt sa yīśunā saha mahā-yājakasyāṭṭālikāṃ prāviśat ǀ

१८-१६ किंतु पितरो बहिर्द्वारस्य समीपे ऽतिष्ठदत एव महायाजकेन परिचितः स शिष्यः पुनर्बहिर्गत्वा दौवारिकायै कथियित्वा पितरमभ्यन्तरमानयत्।

18-16 kiṃ_tu pitaro bahir-dvārasya sam-īpe 'tiṣṭhad ata eva mahā-yājakena pari-citaḥ sa śiṣyaḥ punar_bahir_gartvā dauvārikāyai kathiayitvā pitaram abhy_antaram ānayat ǀ

१८-१७ तदा सा द्वाररक्षिका पितरमवदत्त्वं किं न तस्य मानवस्य शिष्यः ततः सोऽवददहं न भवामि।

18-17 tadā sā dvāra-rakṣikā pitaram avadat tvaṃ kiṃ na tasya mānavasya śiṣyaḥ? tataḥ so'vadad ahaṃ na bhavāmi ǀ

१८-१८ ततः परं यत्स्थाने दासाः पदातयश्च शीतहेतोरङ्गारैर्वह्निं प्रज्वाल्य तापं सेवितवन्तस्तत्स्थाने पितरस्तिष्ठन्तैः सह वह्नितापं सेवितुमारभत।

18-18 tataḥ paraṃ yat-sthāne dāsāḥ padātayaś_ca śīta-hetor_aṅgārair_vahniṃ pra-jvālya tāpaṃ sevitavantas_tat-sthāne pitaras_tiṣṭhan taiḥ saha vahni-tāpaṃ sevitum ārabhata ǀ

१८-१९ तदा शिष्येषूपदेशे च महायाजकेन यीशुः पृष्टः सन्प्रत्युक्तवान्

18-19 tadā śiṣyeṣūpadeśe ca mahāyājakena yīśuḥ pṛṣṭaḥ san praty-uktavān

१८-२० सर्वलोकानां समक्षं कथामकथयम्गुप्तं कामपि कथां न कथयित्वा यत्स्थानं यिहूदीयाः सततं गच्छन्ति तत्र भजनगेहे मन्दिरे चाशिक्षयम्

18-20 sarva-lokānāṃ sam-akṣaṃ kathām_akathayam guptaṃ kām_api kathāṃ na kathayitvā yat sthānaṃ yihūdīyāḥ sa-tataṃ gacchanti tatra bhajana-gehe mandire cāśikṣayam

१८-२१ मत्तः कुतः पृच्छसि ये जना मदुपदेशमशृण्वन्तानेव पृच्छ यद्यदवदं ते तज्ञाजन्ति।

18-21 mattaḥ kutaḥ pṛcchasi? ye janā mad-upadeśam aśṛṇvan tān_eva pṛccha yad_yad avadaṃ te taj_jājanti ǀ

१८-२२ तदेत्थं प्रत्युदितत्वान्निकटस्थपदातिर्यीशुं चपेटेनाहत्य व्याहरत्महायाजकमेवं प्रतिवदसि

18-22 tadetthaṃ praty-uditatvāt nikaṭa-stha-padātir_yīśuṃ capeṭenāhatya vy-āharat mahā-yājakam evaṃ prati-vadasi?

१८-२३ ततो यीशुः प्रतिगदितवान्यद्यथार्थमचकथं तर्हि तस्यायथार्थस्य प्रमाणं देहि। किंतु यदि यथार्थं तर्हि कुतो हेतोर्मामताडयः

18-23 tato yīśuḥ prati-gaditavān yad_yathārtham acakathaṃ tarhi tasyāyathārthasya pra-māṇaṃ dehi ǀ kiṃ_tu yadi yathārthaṃ tarhi kuto hetor_mām atāḍayaḥ?

१८-२४ पुर्वं हानन्सबन्धनं तं कियफामहायाजकस्य समीपं प्रैषयत्।

18-24 purvaṃ hānan sa-bandhanaṃ taṃ kiyaphā-mahā-yājakasya sam-īpaṃ praiṣayat ǀ

१८-२५ शिमोन्पितरस्तिष्ठन्वह्नितापं सेवते। एतस्मिन्समये कियन्तस्तमपृच्छन्त्वं किमेतस्य जनस्य शिष्यो न ततः सोऽपह्नुत्याब्रवीदहं न भवामि।

18-25 śimon-pitaras_tiṣṭhan vahni-tāpaṃ sevate | etasmin sam-aye kiyantas_tam apṛcchan tvaṃ kim etasya janasya śiṣyo na? tataḥ so'pahnutyābravīd ahaṃ na bhavāmi |

१८-२६ तदा महायाजकस्य यस्य दासस्य पितरः कर्णमच्छिनत्तस्य कुटुम्बः प्रत्युदितवानुद्याने तेन सह तिष्ठन्तं त्वां किं नापश्यम्

18-26 tadā mahā-yājakasya yasya dāsasya pitaraḥ karṇam_acchinat tasya kuṭumbaḥ praty_uditavān ud-yāne tena saha tiṣṭhantaṃ tvāṃ kiṃ nāpaśyam?

१८-२७ किंतु पितरः पुनरपह्नुत्य कथितवान्। तदानीं कुक्कुटो ऽरौत्।

18-27 kiṃ_tu pitaraḥ punar_apa-hnutya kathitavān | tadānīṃ kuṭṭuṭo 'raut |

१८-२८ तदनन्तरं प्रत्यूषे ते कियफागृहादधिपतेर्गृहं यीशुमनयन्किंतु यस्मिनशुचित्वे जाते तैर्निस्तारोत्सवे न भोक्तव्यम्। तस्य भयाद्यिहूदीयास्तद्गृहं नाविशन्।

18-28 tad-anantaraṃ praty-ūṣe te kiyaphā-gṛhād adhi-pater_gṛhaṃ yīśum anayan kiṃ_tu yasmin aśucitve jāte tair_nis-tārotsave na bhoktavyam | tasya bhayād yihūdīyās_tad-gṛhaṃ nāviśan |

१८-२९ अपरं पीलातो बहिरागत्य तान्पृष्टवानेतस्य मनुष्यस्य कं दोषं वदथ

18-29 a-paraṃ pīlāto bahir_ā-gatya tān pṛṣṭavān etasya manuṣyasya kaṃ doṣaṃ vadatha?

१८-३० तदा ते प्रत्यवदन्दुष्कर्मकारिणि न सति भवतः समीपे नैनं समार्पयिष्यामः।

18-30 tadā te praty_avadan duṣ-karma-kāriṇi na sati bhavataḥ sam-īpe nainaṃ sam-ārpayiṣyāmaḥ |

१८-३१ ततः पीलातो ऽवदद्यूयमेनं गृहीत्वा स्वेषां व्यवस्थया विचारयत। तदा यिहूदीयाः प्रत्यवदन्कस्यापि मनुष्यस्य प्राणदण्डं कर्तुं नास्माकमधिकरो ऽस्ति।

18-31 tataḥ pīlāto 'vadad yūyam_enaṃ gṛhītvā sveṣāṃ vy-ava-sthayā vi-cārayata | tadā yihūdīyāḥ praty_avadan kasyāpi manuṣyasya prāṇa-daṇḍaṃ kartuṃ nāsmākam adhi-karo 'sti |

१८-३२ एवं सति यीशुः सव्स्य मृत्यौ यां कथां कथितवान्सा सफलाभवत्।

18-32 evaṃ sati yīśuḥ savsya mṛtyau yāṃ kathāṃ kathitavān sā sa-phalābhavat |

१८-३३ तदनन्तरं पीलातः पुनरपि तद्राजगृहं गत्वा यीशुमाहूय पृष्टवान्त्वं किं यिहूदीयानां राजा

18-33 tad-anantaraṃ pīlātaḥ punar_api tad rāja-gṛhaṃ gatvā yīśum_ā-hūya pṛṣṭavān tvaṃ kiṃ yihūdīyānāṃ rājā?

१८-३४ यीशुः प्रत्यवदत्त्वमेतां कथां स्वतः कथयसि किमन्यः कश्चिन्मयि कथितवान्

18-34 yīśuḥ praty_avadat tvam etāṃ kathāṃ svataḥ kathayasi kim_anyaḥ kaś_cin mayi kathitavān?

१८-३५ पिलातोऽवददहं किं यिहूदीयः तव स्वदेशीया विशेषतः प्रधानयाजका मम निकटे त्वां समार्पयन्त्वं किं कृतवान्

18-35 pilāto'vadad ahaṃ kiṃ yihūdīyaḥ? tava sva-deśīyā vi-śeṣataḥ pradhāna-yājakā mama ni-kaṭe tvāṃ sam-ārpayan tvaṃ kiṃ kṛtavān?

१८-३६ यीशुः प्रत्यवदत्। मम राज्यमेतज्जगत्सम्बन्धीयं न भवति यदि मम राज्यं जगत्सम्बन्धीयमभविष्यत्तर्हि यिहूदीयानां हस्तेषु यथा समर्पितो नाभवं तदर्थं मम सेवका अयोत्स्यन्किंतु मम राज्यमैहिकं न।

18-36 yīśuḥ praty_avadat | mama rājyam etaj-jagat-sambandhīyaṃ na bhavati yadi mama rājyaṃ jagat-sambandhīyam abhaviṣyat tarhi yihūdīyānāṃ hasteṣu yathā sam-arpito nābhavaṃ tad-arthaṃ mama sevakā ayotsyan kiṃ_tu mama rājyam aihikaṃ na |

१८-३७ तदा पीलातः कथितवान्। तर्हि त्वं राजा भवसि यीशुः प्रत्युक्तवान्त्वं सत्यं कथयसि। राजाहं भवामि। सत्यतायां साक्ष्यं दातुं जनिं गृहीत्वा जगत्यस्मिनवतीर्णवान्। तस्मात्सत्यधर्मपक्षपातिनो मम कथां शृण्वन्ति।

18-37 tadā pīlātaḥ kathitavān | tarhi tvaṃ rājā bhavasi? yīśuḥ praty-uktavān tvaṃ satyaṃ kathayasi | rājāhaṃ bhavāmi | satyatāyāṃ sākṣyaṃ dātuṃ janiṃ gṛhītvā jagaty_asmin ava-tīrṇavān | tasmāt satya-dharma-pakṣa-pātino mama kathāṃ śṛṇvanti |

१८-३८ तदा सत्यं किम् एतां कथां पृष्ट्वा पीलातः पुनरपि बहिर्गत्वा यिहूदीयानभाषत। अहं तस्य कमप्यपराधं न प्राप्नोमि।

18-38 tadā satyaṃ kim? etāṃ kathāṃ pṛṣṭvā pīlātaḥ punar_api bahir-gatvā yihūdīyān abhāṣata | ahaṃ tasya kam_apy_apa-rādhaṃ na prāpnomi |

१८-३९ निस्तरोत्सवसमये युष्माभिरभिरुचित एको जनो मया मोचयितव्य एषा युष्माकं रीतिरस्ति। अत एव युष्माकं निकटे यिहूदीयानां राजानं किं मोचयामि। युष्माकमिच्छा का

18-39 nistarotsava-samaye yuṣmābhir_abhi-rucita eko jano mayā mocayitavya eṣā yuṣmākaṃ rītir_asti | ata eva yuṣmākaṃ ni-kaṭe yihūdīyānāṃ rājānaṃ kiṃ mocayāmi | yuṣmākam icchā kā?

१८-४० तदा ते सर्वे रुवन्तो व्याहरनेनं मानुषं नहि बरब्बां मोचय। किंतु स बरब्बा दस्युरासीत्।

18-40 tadā te sarve ruvanto vy-āharan enaṃ mānuṣaṃ nahi barabbāṃ mocaya | kiṃ_tu sa barabbā dasyur_āsīt |

१९-१ पीलातो यीशुमानीय कशया प्राहारयत्।

19-1 pīlāto yīśum ā-nīya kaśayā prāhārayat |

१९-२ पश्चात्सेनागणः कण्टकनिर्मातं मुकुटं तस्य मस्तके समर्प्य वार्त्ताकीवर्णं राजपरिच्छदं परिधाप्य।

19-2 paścāt senā-gaṇaḥ kaṇṭaka-nirmātaṃ mukuṭaṃ tasya mastake sam-arpya vārttākī-varṇaṃ rāja-paricchadaṃ pari-dhāpya |

१९-३ हे यिहूदीयानां राजन्मनस्कार इयूक्त्वा तं चपेटेनाहन्तुमारभत।

19-3 he yihūdīyānāṃ rājan manas-kāra iyu_uktvā taṃ capeṭenāhantum ārabhata |

१९-४ तदा पीलातः पुनरपि बहिर्गत्वा लोकानवदत्। अस्य कमप्यपराधं न लभेऽहं।पश्यत तद्युष्मान्ज्ञापयितुं युष्माकं सन्निधौ बहिरेनमानयामि।

19-4 tadā pīlātaḥ punar_api bahir_gatvā lokān avadat | asya kam_apy_apa-rādhaṃ na labhe'haṃ |paśyata tad yuṣmān jñāpayituṃ yuṣmākaṃ san-ni-dhau bahir_enam ā-nayāmi |

१९-५ ततः परं यीशुः कण्टकमुकुटवान्वार्त्ताकीवर्णवसनवांश्च बहिरागच्छत्।

19-5 tataḥ paraṃ yīśuḥ kaṇṭaka-mukuṭavān vārttākī-varṇa-vasanavāṃś_ca bahir_āgacchat |

१९-६ ततः पीलात उक्तवानेनं मनुष्यं पश्यत। तदा प्रधानयाजकाः पदातयश्च तं दृष्ट्वा एनं क्रुशे विध एनं क्रुशे विध इत्युक्त्वा तवितुं आरभन्त। ततः पीलातः कथितवान्। यूयं स्वयमेनं नीत्वा क्रुशे विधत। अहमेतस्य कमप्यपराधं न प्राप्तवान्।

19-6 tataḥ pīlāta uktavān enaṃ manuṣyaṃ paśyata | tadā pradhāna-yājakāḥ padātayaś_ca taṃ dṛṣṭvā enaṃ kruśe vidha enaṃ kruśe vidha ity_uktvā tavituṃ ārabhanta | tataḥ pīlātaḥ kathitavān | yūyaṃ svayam enaṃ nītvā kruśe vi-dhata | aham etasya kam_apy_apa-rādhaṃ na prāptavān |

१९-७ यीहूदीयाः प्रत्यवदन्। अस्माकं या व्यवस्थास्ते तदनुसारेणास्य प्राणहननमुचितं यतोऽयं स्वमीश्वरस्य पुत्रमवदत्।

19-7 yīhūdīyāḥ praty-avadan | asmākaṃ yā vy-ava-sthās_te tad-anusāreṇāsya prāṇa-hananam ucitaṃ yato'yaṃ svam īśvarasya putram_avadat |

१९-८ पीलात इमां कथां श्रुत्वा महात्रासयुक्तः सन्पुनरपि राजगृह आगत्य यीशुं पृष्टवान्क्वं कुत्रत्यो लोकः

19-8 pīlāta imāṃ kathāṃ śrutvā mahā-trāsa-yuktaḥ san punar_api rāja-gṛha ā-gatya yīśuṃ pṛṣṭavān kvaṃ kutratyo lokaḥ?

१९-९ किंतु यीशुस्तस्य किमपि प्रत्युत्तरं नावदत्।

19-9 kiṃ_tu yīśus_tasya kim_api praty_uttaraṃ nāvadat |

१९-१० ततः पीलातः कथितवान्। त्वं किं मया सार्धं न संलपिष्यसि त्वां क्रुशे वेधितुं वा मोचयितुं शक्तिर्ममास्ते इति किं त्वं न जानासि

19-10 tataḥ pīlātaḥ kathitavān | tvaṃ kiṃ mayā sārdhaṃ na saṃ-lapiṣyasi? tvāṃ kruśe vedhituṃ vā mocayituṃ śaktir_mamāste iti kiṃ tvaṃ na jānāsi?

१९-११ तदा यीशुः प्रत्यवददीश्वरेणादत्तं ममोपरि तव किमप्यधिपतित्वं न विद्यते तथापि यो जनो मां तव हस्ते समार्पयत्तस्य महापातकं जातम्।

19-11 tadā yīśuḥ praty_avadad īśvareṇādattaṃ mamopari tava kim_apy_adhipatitvaṃ na vidyate tathāpi yo jano māṃ tava haste sam-ārpayat tasya mahā-pātakaṃ jātam |

१९-१२ तदारभ्य पीलातस्तं मोचयितुं चेष्टितवान्। किंतु यीहूदीया रुवन्तो व्याहरन्यदीमं मानवं त्यजसि तर्हि त्वं कैसरस्य मित्रं न भवसि। यो जनः स्वं राजानं वक्ति स एव कैसरस्य विरुद्धां कथां कथयति।

19-12 tad-ārabhya pīlātas_taṃ mocayituṃ ceṣṭitavān | kiṃ_tu yīhūdīyā ruvanto vy-āharan yadīmaṃ mānavaṃ tyajasi tarhi tvaṃ kaisarasya mitraṃ na bhavasi | yo janaḥ svaṃ rājānaṃ vakti sa eva kaisarasya vi-ruddhāṃ kathāṃ kathayati |

१९-१३ एतां कथां श्रुत्वा पीलातो यीशुं बहिरानीय निस्तारोत्सवस्य आसादनदिनस्य द्वितीयप्रहरात्पूर्वं प्रस्तरबन्धननाम्नि स्थाने ऽर्थातिब्रीयभाषया यद्गब्बिथा कथ्यते तस्मिन्स्थाने विचारासन उपाविशत्।

19-13 etāṃ kathāṃ śrutvā pīlāto yīśuṃ bahir_ā-nīya nis-tārotsavasya ā-sādana-dinasya dvitīya-praharāt pūrvaṃ prastara-bandhana-nāmni sthāne 'rthāt ibrīya-bhāṣayā yad gabbithā kathyate tasmin sthāne vi-cārāsana upāviśat |

१९-१४ अनन्तरं पीलातो यिहूदीयानवदत्। युष्माकं राजानं पश्यत।

19-14 an-antaraṃ pīlāto yihūdīyān avadat | yuṣmākaṃ rājānaṃ paśyata |

१९-१५ किंतु एनं दूरीकुरु। एनं दूरीकुरु। एनं क्रुशे विध इति कथां कथयित्वा ते रवितुमारभन्त। तदा पीलातः कथितवान्युष्माकं राजानं किं क्रुशे वेधिष्यामि प्रधानयाजका उत्तरमवदन्कैसरं विना कोऽपि राजास्माकं नास्ति।

19-15 kiṃ_tu enaṃ dūrī-kuru | enaṃ dūrī-kuru | enaṃ kruśe vidha iti kathāṃ kathayitvā te ravitum ārabhanta | tadā pīlātaḥ kathitavān yuṣmākaṃ rājānaṃ kiṃ kruśe vedhiṣyāmi? pradhāna-yājakā uttaram avadan kaisaraṃ vinā ko'pi rājāsmākaṃ nāsti |

१९-१६ ततः पीलातो यीशुं क्रुशे वेधितुं तेषां हस्तेषु समार्पयत्। ततस्ते तं धृत्वा नीतवन्तः।

19-16 tataḥ pīlāto yīśuṃ kruśe vedhituṃ teṣāṃ hasteṣu sam-ārpayat | tatas_te taṃ dhṛtvā nītavantaḥ |

१९-१७ ततः परं यीशुः क्रुशं वहन्शिरःकपालमर्थाद्यदिब्रीयभाषया गुल्गल्तां वदन्ति तस्मिन्स्थान उपस्थितः।

19-17 tataḥ paraṃ yīśuḥ kruśaṃ vahan śiraḥ-kapālam arthād yad ibrīya-bhāṣayā gulgaltāṃ vadanti tasmin sthāna upa-sthitaḥ |

१९-१८ ततस्ते मध्यस्थाने तं तस्योभयपार्श्वे द्वावपरौ क्रुशेऽविधन्।

19-18 tatas_te madhya-sthāne taṃ tasyobhaya-pārśve dvāv_aparau kruśe'vidhan |

१९-१९ अपरमेष यिहूदीयानां राजा नासरतीययीशुः इति विज्ञापनं लिखित्वा पीलातस्तस्य क्रुशोपरि समयोजयत्।

19-19 a-param eṣa yihūdīyānāṃ rājā nāsaratīya-yīśuḥ iti vi-jñāpanaṃ likhitvā pīlātas_tasya kruśopari sam-ayojayat |

१९-२० सा लिपिः इब्रीययूनानीयरोमीयभाषाभिर्लिखिता। यीशोः क्रुशवेधनस्थानं नगरस्य समीपं तस्माद्बहवो यिहूदीयास्तां पठितुमारभन्त।

19-20 sā lipiḥ ibrīya-yūnānīya-romīya-bhāṣābhir_likhitā | yīśoḥ kruśa-vedhana-sthānaṃ nagarasya sam-īpaṃ tasmād bahavo yihūdīyās_tāṃ paṭhitum ārabhanta |

१९-२१ यिहूदीयानां प्रधानयाजकाः पीलातमिति न्यवेदयन्यिहूदीयानां राजेति वाक्यं न किंतु एष स्वं यिहूदीयानां राजानमवददित्थं लिखतु।

19-21 yihūdīyānāṃ pradhāna-yājakāḥ pīlātam_iti ny-avedayan yihūdīyānāṃ rājeti vākyaṃ na kiṃtu eṣa svaṃ yihūdīyānāṃ rājānam avadad itthaṃ likhatu |

१९-२२ ततः पीलात उत्तरं दत्तवान्यल्लेखनीयं तल्लिखितवान्।

19-22 tataḥ pīlāta uttaraṃ dattavān yal_lekhanīyaṃ tal_likhitavān |

१९-२३ इत्थं सेनागणो यीशुं क्रुशे विधित्वा तस्य परिधेयवस्त्रं चतुरो भागान्कृत्वा एकैकसेना एकैकभागमगृह्णत्तस्योत्तरीयवस्त्रंचागृह्णत्किंतूत्तरीयवस्त्रं सूचिसेवनं विना सर्वमूतम्।

19-23 itthaṃ senā-gaṇo yīśuṃ kruśe vidhitvā tasya paridheya-vastraṃ caturo bhāgān kṛtvā ekaika-senā ekaika-bhāgam agṛhṇat tasyottarīya-vastraṃ_cāgṛhṇat kiṃ_tūttarīya-vastraṃ sūci-sevanaṃ vinā sarvam ūtam |

१९-२४ तस्मात्ते व्याहरनेतत्कः प्राप्स्यति तन्न खण्डयित्वा तत्र गुटिकापातं करवाम। विभजन्तेऽधरीयं मे वसनं ते परस्परं। ममोत्तरीयवस्त्रार्थं गुटिकां पातयन्ति च। इति यद्वाक्यं धर्मपुस्तके लिखितमास्ते तत्सेनागणेनेत्थं व्यवहरणात्सिद्धमभवत्।

19-24 tasmāt_te vy-āharan etat kaḥ prāpsyati? tan_na khaṇḍayitvā tatra guṭikā-pātaṃ karavāma | vi-bhajante'dharīyaṃ me vasanaṃ te paras-paraṃ | mamottarīya-vastrārthaṃ guṭikāṃ pātayanti ca | iti yad_vākyaṃ dharma-pustake likhitam_āste tat senā-gaṇenetthaṃ vy-ava-haraṇāt siddham_abhavat |

१९-२५ तदानीं यीशोर्माता मातुर्भगिनी च या क्लियपा भार्या मरियम्मग्दलीनी मरियम्च एतास्तस्य क्रुशस्य सन्निधौ समतिष्ठन्।

19-25 tadānīṃ yīśor_mātā mātur_bhaginī ca yā kliyapā bhāryā mariyam magdalīnī mariyam ca etās_tasya kruśasya san-nidhau sam-atiṣṭhan |

१९-२६ ततो यीशुः स्वमातरं प्रियतमशिष्यं च समीपे दण्डायमानो विलोक्य मातरमवदत्। हे योषिदेनं तव पुत्रं पश्य। शिष्यं त्ववदत्। एनां तव मातरं पश्य।

19-26 tato yīśuḥ sva-mātaraṃ priyatama-śiṣyaṃ ca sam-īpe daṇḍāyamāno vi-lokya mātaram avadat | he yoṣid enaṃ tava putraṃ paśya | śiṣyaṃ tv_avadat | enāṃ tava mātaraṃ paśya |

१९-२७ ततः स शिष्यस्तद्घटिकायां तां निजगृहं नीतवान्।

19-27 tataḥ sa śiṣyas_tad-ghaṭikāyāṃ tāṃ nija-gṛhaṃ nītavān |

१९-२८ अनन्तरं सर्वं कर्माधुना सम्पन्नमभूत्यीशुरिति ज्ञात्वा धर्मपुस्तकस्य वचनं यथा सिद्धं भवति तदर्थमकथयत्मम पिपासा जाता।

19-28 anantaraṃ sarvaṃ karmādhunā sam-pannam_abhūt yīśur_iti jñātvā dharma-pustakasya vacanaṃ yathā siddhaṃ bhavati tad-artham akathayat mama pipāsā jātā |

१९-२९ ततस्तस्मिन्स्थाने अम्लरसेन पूर्णपात्रस्थित्या ते स्पञ्जमेकं तदम्लरसेनार्द्रीकृत्य एसोब्नले तद्योजयित्वा तस्य मुखस्य सन्निधावस्थापयन्।

19-29 tatas_tasmin sthāne amla-rasena pūrṇa-pātra-sthityā te spañjam_ekaṃ tad-amla-rasenārdrī-kṛtya esobnale tad yojayitvā tasya mukhasya san-nidhāv_asthāpayan |

१९-३० तदा यीशुरम्लरसं गृहीत्वा सर्वं सिद्धमिति कथां कथयित्वा मस्तकं नमयन्प्राणान्पर्यत्यजत्।

19-30 tadā yīśur_amla-rasaṃ gṛhītvā sarvaṃ siddham iti kathāṃ kathayitvā mastakaṃ namayan prāṇān paryatyajat |

१९-३१ तद्दिनमासादनदिनं तस्मात्परेऽहनि विश्रामवारो महादिनमासीत्। तस्माद्यिहूदीयाः पीलातनिकटं गत्वा तेषां पादभञ्जनस्य स्थानान्तरनयनस्य चानुमतिं प्रार्थयन्त।

19-31 tad-dinam āsādana-dinaṃ tasmāt pare'hani vi-śrāma-vāro mahā-dinam_āsīt | tasmād yihūdīyāḥ pīlāta-nikaṭaṃ gatvā teṣāṃ pāda-bhañjanasya sthānāntara-nayanasya cānumatiṃ prārthayanta |

१९-३२ अतः सेना आगत्य यीशुना सह क्रुशे हतयोः प्रथमद्वितीयचोरयोः पादानभञ्जन्।

19-32 ataḥ senā ā-gatya yīśunā saha kruśe hatayoḥ prathama-dvitīya-corayoḥ pādān abhañjan |

१९-३३ किंतु यीशोः सन्निधिं गत्वा स मृत इति दृष्ट्वा तस्य पादौ नाभञ्जन्।

19-33 kiṃ_tu yīśoḥ san-ni-dhiṃ gatvā sa mṛta iti dṛṣṭvā tasya pādau nābhañjan |

१९-३४ पश्चादेको योद्धा शूलाघातेन तस्य कुक्षिमविधत्तत्क्षणात्तस्माद्रक्तं जलं च निरगच्छत्।

19-34 paścād eko yoddhā śūlā-ghātena tasya kukṣim avidhat tat-kṣaṇāt tasmād raktaṃ jalaṃ ca nir_agacchat |

१९-३५ यो जनोऽस्य साक्ष्यं ददाति स स्वयं दृष्टवान्तस्येदं साक्ष्यं सत्यं तस्य कथा युष्माकं विश्वासं जनयितुं योग्या तत्स जानाति।

19-35 yo jano'sya sākṣyaṃ dadāti sa svayaṃ dṛṣṭavān tasyedaṃ sākṣyaṃ satyaṃ tasya kathā yuṣmākaṃ vi-śvāsaṃ janayituṃ yogyā tat sa jānāti |

१९-३६ तस्यैकमस्थ्यपि न भङ्क्ष्यते। इदं धर्मपुस्तकस्य वचनं यथा सफलं भवति तदर्थमेताः सर्वघटना अभवन्। तद्वद्यथा सफलं भवति तदर्थमेताः सर्वघटना अभवन्।

19-36 tasyaikam asthy_api na bhaṅkṣyate | idaṃ dharma-pustakasya vacanaṃ yathā sa-phalaṃ bhavati tad-artham etāḥ sarva-ghaṭanā abhavan | tad-vad yathā sa-phalaṃ bhavati tad-artham etāḥ sarva-ghaṭanā abhavan |

१९-३७ तद्वदन्यशास्त्रेऽपि लिख्यते यथा। दृष्टिपातं करिष्यन्ति तेऽविधन्यन्तु तम्प्रति।

19-37 tadvad anya-śāstre'pi likhyate yathā | dṛṣṭipātaṃ kariṣyanti te'vidhan yantu tam_prati |

१९-३८ अरिमथीयनगरस्य यूषफ्नामा शिष्य एक आसीत्किंतु यिहूदीयेभ्यो भयात्प्रकाशितो न भवति। स यीशोर्देहं नेतुं पीलातस्यानुमतिं प्रार्थयत। ततङ्कज् पीलातेनानुमते सति स गत्वा यीशोर्देहमनयत्।

19-38 arimathīya-nagarasya yūṣaph-nāmā śiṣya eka āsīt kiṃ_tu yihūdīyebhyo bhayāt pra-kāśito na bhavati | sa yīśor_dehaṃ netuṃ pīlātasyānu-matiṃ prārthayata | tataJ pīlātenānu-mate sati sa gatvā yīśor_deham anayat |

१९-३९ अपरं यो निकदीमो रात्रौ यीशोः समीपमगच्छत्सोऽपि गन्धरसेन मिश्रितं प्रायेण पञ्चाशत्सेटकमगुरुं गृहीत्वागच्छत्।

19-39 aparaṃ yo ni-kadīmo rātrau yīśoḥ sam-īpam agacchat so'pi gandha-rasena miśritaṃ prāyeṇa pañcāśat-seṭakama-guruṃ gṛhītvāgacchat |

१९-४० ततस्ते यिहूदीयानां श्मशाने स्थापनरीत्यानुसारेण तत्सुगन्धिद्रव्येण सहितं तस्य देहं वस्त्रेणावेष्टयन्।

19-40 tatas_te yihūdīyānāṃ śmaśāne sthāpana-rītyānusāreṇa tat-sugandhi-dravyeṇa sahitaṃ tasya dehaṃ vastreṇāveṣṭayan |

१९-४१ अपरं च यत्र स्थाने तं क्रुशे ऽविधन्तस्य निकटस्थोद्याने यत्र किमपि मृतदेहं कदापि नास्थाप्यत तादृशमेकं नूतनं श्मशानमासीत्।

19-41 a-paraṃ ca yatra sthāne taṃ kruśe 'vidhan tasya nikaṭa-sthodyāne yatra kim_api mṛta-dehaṃ kadāpi nāsthāpyata tādṛśam ekaṃ nūtanaṃ śmaśānam āsīt |

१९-४२ यिहूदीयानामासादनदिनागमनात्ते तस्मिन्समीपस्थश्मशाने यीशुमशाययन्।

19-42 yihūdīyānām āsādana-dināgamanāt te tasmin samīpa-stha-śmaśāne yīśum aśāyayan |

२०-१ अनन्तरं सप्ताहस्य प्रथमदिने ऽतिप्रत्यूषे ऽन्धकारे तिष्ठति मग्दलीली मरियम्तस्य श्मशानस्य निकटं गत्वा श्मशानस्य मुखात्प्रस्तरमपसारितमपश्यत्।

20-1 an-antaraṃ saptāhasya prathama-dine 'ti-praty-ūṣe 'ndha-kāre tiṣṭhati magdalīlī mariyam tasya śmaśānasya nikaṭaṃ gatvā śmaśānasya mukhāt pra-staram_apa-sāritam apaśyat |

२०-२ पश्चाद्धावित्वा शिमोन्पितरायथीशोः प्रियतमशिष्याय चेदमकथयत्। लोकाः श्मशानात्प्रभुं नीत्वा कुत्रास्थापयन्तद्वक्तुं न शक्नोमि।

20-2 paścād dhāvitvā śimon-pitarāyayīśoḥ priyatama-śiṣyāya cedam akathayat | lokāḥ śmaśānāt pra-bhuṃ nītvā kutrāsthāpayan tad vaktuṃ na śaknomi |

२०-३ अतः पितरः सोऽन्यशिष्यश्च बहिर्भूत्वा श्मशानस्थानं गन्तुमारभेताम्।

20-3 ataḥ pitaraḥ so'nya-śiṣyaś_ca bahir_bhūtvā śmaśāna-sthānaṃ gantum ārabhetām |

२०-४ उभयोर्धावतोः सोऽन्यिशिष्यः पितरः पश्चात्त्यक्त्वा पूर्वं श्मशानस्थान उपस्थितवान्।

20-4 ubhayor_dhāvatoḥ so'any-śiṣyaḥ pitaraḥ paścāt tyaktvā pūrvaṃ śmaśāna-sthāna upa-sthitavān |

२०-५ तदा प्रह्वीभूत्य स्थापितवस्त्राणि दृष्टवान्किंतु न प्राविशत्।

20-5 tadā prahvī-bhūtya sthāpita-vastrāṇi dṛṣṭavān kiṃ_tu na prāviśat |

२०-६ अपरं शिमोन्पितर आगत्य श्मशानस्थानं प्रविश्य

20-6 a-paraṃ śimon-pitara ā-gatya śmaśāna-sthānaṃ pra-viśya

२०-७ स्थापितवस्त्राणि मस्तकस्य वस्त्रं च पृथक्स्थानान्तरे स्थापितं दृष्टवान्।

20-7 sthāpita-vastrāṇi mastakasya vastraṃ ca pṛthak sthānāntare sthāpitaṃ dṛṣṭavān |

२०-८ ततः श्मशानस्थानं पूर्वमागतो योऽन्यशिष्यः सोऽपि प्रविश्य तादृशं व्यश्वसीत्।

20-8 tataḥ śmaśāna-sthānaṃ pūrvam ā-gato yo'nya-śiṣyaḥ so'pi pra-viśya tādṛśaṃ vyaśvasīt |

२०-९ यतः श्मशानात्स उत्थापयितव्य एतस्य धर्मपुस्तकवचनस्य भावं ते तदा बोद्धुं नाशक्नुवन्।

20-9 yataḥ śmaśānāt sa ut-thāpayitavya etasya dharma-pustaka-vacanasya bhāvaṃ te tadā boddhuṃ nāśaknuvan |

२०-१० अनन्तरं तौ द्वौ शिष्यौ स्वं स्वं गृहं परावृत्यागच्छताम्।

20-10 an-antaraṃ tau dvau śiṣyau svaṃ svaṃ gṛhaṃ parā-vṛtyāgacchatām ।

२०-११ ततः परं मरियम्श्मशानद्वारस्य बहिः स्थित्वा रोदितुमारभत

20-11 tataḥ paraṃ mariyam śmaśāna-dvārasya bahiḥ sthitvā roditum ārabhata

२०-१२ ततो रुदती प्रह्वीभूय श्मशानं विलोक्य यीशोः शयनस्थानस्य शिरःस्थाने पदतले च द्वयोर्दिशोर्द्वौ स्वर्गीयदूतावुपविष्टौ समपश्यत्।

20-12 tato rudatī prahvī-bhūya śmaśānaṃ vi-lokya yīśoḥ śayana-sthānasya śiraḥ-sthāne pada-tale ca dvayor_diśor_dvau svargīya-dūtāv_upa-viṣṭau sam-apaśyat ।

२०-१३ तौ पृष्टवन्तौ हे नारि कुतो रोदिषि सावदत्लोका मम प्रभुं नीत्वा कुत्रास्थापयनिति न जानामि।

20-13 tau pṛṣṭavantau he nāri kuto rodiṣi? sāvadat lokā mama pra-bhuṃ nītvā kutrāsthāpayan iti na jānāmi ।

२०-१४ इत्युक्त्वा मुखं परावृत्य यीशुं दण्डायमानमपश्यत्।

20-14 ity_uktvā mukhaṃ parā-vṛtya yīśuṃ daṇḍāyamānam apaśyat ।

२०-१५ किंतु स यीशुरिति सा ज्ञातुं नाशक्नोत्। तदा यीशुस्तामपृच्छथे नारि कुतो रोदिषि कं वा मृगयसे ततः सा तमुद्यानसेवकं ज्ञात्वा व्याहरत्। हे महेच्छ त्वं यदीतः स्थानात्तं नीतवान्तर्हि कुत्रास्थापयस्तद्वद तत्स्थानात्तमानयामि।

20-15 kiṃ_tu sa yīśur_iti sā jñātuṃ nāśaknot । tadā yīśus_tām apṛcchat he nāri kuto rodiṣi? kaṃ vā mṛgayase? tataḥ sā tam udyāna-sevakaṃ jñātvā vy-āharat । he maheccha tvaṃ yadītaḥ sthānāt taṃ nītavān tarhi kutrāsthāpayas_tad vada tat-sthānāt tam ā-nayāmi ।

२०-१६ तदा यीशुस्तामवदथे मरियम्। ततः सा परावृत्य प्रत्यवदत्। हे रब्बूनी अर्थाथे गुरो।

20-16 tadā yīśus_tām avadat he mariyam । tataḥ sā parā-vṛtya praty-avadat । he rabbūnī arthāt he guro ।

२०-१७ तदा यीशुरवदत्मां मा धर। इदानीं पितुः समीप ऊर्ध्वगमनं न करोमि किंतु यो मम युष्माकं च पिता मम युष्माकं चेश्वरस्तस्य निकट ऊर्ध्वगमनं कर्तुमुद्यतो ऽस्मि। इमां कथां त्वं गत्वा मम भ्रातृगणं ज्ञापय।

20-17 tadā yīśur_avadat māṃ mā dhara । idānīṃ pituḥ sam-īpae ūrdhva-gamanaṃ na karomi kiṃ_tu yo mama yuṣmākaṃ ca pitā mama yuṣmākaṃ ceśvaras_tasya ni-kaṭa ūrdhva-gamanaṃ kartum ud-yato 'smi । imāṃ kathāṃ tvaṃ gatvā mama bhrātṛ-gaṇaṃ jñāpaya ।

२०-१८ तत मग्दलीनीमरियम्तत्क्षणाद्गत्वा प्रभुस्तस्यै दर्शनं दत्त्वा कथा एता अकथयदिति वार्त्तां शिष्येभ्यो ऽकथयत्।

20-18 tatao magdalīnī-mariyam tat-kṣaṇād gatvā pra-bhus_tasyai darśanaṃ dattvā kathā etā akathayad iti vārttāṃ śiṣyebhyo 'kathayat ।

२०-१९ ततः परं सप्ताहस्य प्रथमदिनस्य सन्ध्यासमये शिष्या एकत्र मिलित्वा यिहूदीयेभ्यो भिया द्वाररुद्धमकुर्वन्। एतस्मिन्काले यीशुस्तेषां मध्यस्थाने तिष्ठनकथयद्युष्माकं कल्याणं भूयात्।

20-19 tataḥ paraṃ saptāhasya prathama-dinasya sandhyā-samaye śiṣyā ekatra militvā yihūdīyebhyo bhiyā dvāra-ruddham akurvan । etasmin kāle yīśus_teṣāṃ madhya-sthāne tiṣṭhan akathayad yuṣmākaṃ kalyāṇaṃ bhūyāt ।

२०-२० इत्युक्त्वा निजहस्तं कुक्षिं च दर्शितवान्। ततः शिष्याः प्रभुं दृष्ट्वा हृष्ट्वा अभवन्।

20-20 ity_uktvā nija-hastaṃ kukṣiṃ ca darśitavān । tataḥ śiṣyāḥ pra-bhuṃ dṛṣṭvā hṛṣṭvā abhavan ।

२०-२१ यीशुः पुनरवददुष्माकं कल्याणं भूयात्पिता यथा मां प्रैषयत्तथाहमपि युष्मान्प्रेषयामि।

20-21 yīśuḥ punar_avadad uiṣmākaṃ kalyāṇaṃ bhūyāt pitā yathā māṃ praiṣayat tathāham_api yuṣmān preṣayāmi ।

२०-२२ इत्युक्त्वा स तेषामुपरि दीर्घप्रश्वासं दत्त्वा कथितवान्पवित्रमात्मानं गृह्णीत।

20-22 ity_uktvā sa teṣām_upari dīrgha-praśvāsaṃ dattvā kathitavān pavitram ātmānaṃ gṛhṇīta ।

२०-२३ यूयं येषां पापानि मोचयिष्यथ ते न मोचयिष्यन्ते।

20-23 yūyaṃ yeṣāṃ pāpāni mocayiṣyatha te na mocayiṣyante ।

२०-२४ द्वादशमध्ये गणितो यमजो थोमानामा शिष्यो यीशोरागमनकाले तैः सार्धं नासीत्।

20-24 dvādaśa-madhye gaṇito yam_ajo thomā-nāmā śiṣyo yīśor_āgamana-kāle taiḥ sārdhaṃ nāsīt |

२०-२५ अतो वयं प्रभुमपश्यामेति वाक्ये ऽन्यशिष्यैरुक्ते सोऽवदत्। तस्य हस्तयोर्लौहकीलकानां चिह्नं न विलोक्य तच्चिह्नमङ्गुल्या न स्पृष्ट्वा तस्य कुक्षौ हस्तं नारोप्य चाहं न विश्वसिष्यामि।

20-25 ato vayaṃ pra-bhum apaśyāmeti vākye 'nya-śiṣyair_ukte so'vadat | tasya hastayor_lauha-kīlakānāṃ cihnaṃ na vi-lokya tac-cihnam aṅgulyā na spṛṣṭvā tasya kukṣau hastaṃ nāropya cāhaṃ na vi-śvasiṣyāmi |

२०-२६ अपरमष्टमे ऽह्नि गते सति थिमासहितः शिष्यगण एकत्र मिलित्वा द्वारं रुद्ध्वाभ्यन्तर आसीत्। एतर्हि यीशुस्तेषां मध्यस्थाने तिष्ठनकथयत्। युष्माकं कुशलं भूयात्।

20-26 a-param aṣṭame 'hni gate sati thiomā-sahitaḥ śiṣya-gaṇa ekatra militvā dvāraṃ ruddhvābhyantara āsīt | etarhi yīśus_teṣāṃ madhya-sthāne tiṣṭhan akathayat | yuṣmākaṃ kuśalaṃ bhūyāt |

२०-२७ पश्चात्थोमै कथितवान्। त्वम्कुक्षावर्पय नाविश्वस्य विश्वसिहि।

20-27 paścāt thomai kathitavān | tvam kukṣāv_arpaya nāviśvasya vi-śvasihi |

२०-२८ तदा थोमा अवदत्। हे मम प्रभो हे मदीश्वर।

20-28 tadā thomā avadat | he mama pra-bho he mad-īśvara |

२०-२९ यीश्युरकथयत्। हे थोमा मां निरीक्ष्य विश्वसिषि ये न दृष्ट्वा विश्वसन्ति त एव धन्याः।

20-29 yīśyur_akathayat | he thomā māṃ nir-īkṣya vi-śvasiṣi ye na dṛṣṭvā vi-śvasanti ta eva dhanyāḥ |

२०-३० एतदन्यानि पुस्तकेऽस्मिनलिखितानि बहून्याश्चर्यकर्माणि यीशुः शिष्याणां पुरस्तादकरोत्।

20-30 etad_anyāni pustake'smin a-likhitāni bahūny_āścarya-karmāṇi yīśuḥ śiṣyāṇām purastād akarot |

२०-३१ किंतु यीशुरीश्वरस्याभिषिक्तः सुत एवेति यथा यूयं विश्वसिथ विश्वस्य च तस्य नाम्ना परमायुः प्राप्नुथ तदर्थमेतानि सर्वाण्यलिख्यन्त।

20-31 kiṃ_tu yīśur_īśvarasyābhiṣiktaḥ suta eveti yathā yūyaṃ vi-śvasitha vi-śvasya ca tasya nāmnā paramāyuḥ prāpnutha tad-artham etāni sarvāṇy_alikhyanta |

२१-१ ततः परं तिविरियाजलधेस्तटे यीशुः पुनरपि शिष्येभ्यो दर्शनं दत्तवान्दर्शनस्याख्यानमिदम्।

21-1 tataḥ paraṃ tiviriyā-jaladhes_taṭe yīśuḥ punar_api śiṣyebhyo darśanaṃ dattavān darśanasyākhyānam_idam |

२१-२ शिमोन्पितरः यमजथोमा गालीलीयकान्नानगरनिवासी निथनेल्सिवदेः पुत्रावन्यौ द्वौ शिष्यौ चैतेष्वेकत्र मिलितेषु शिमोन्पितरो ऽकथयत्। मत्स्यान्धर्तुं यामि।

21-2 śimon-pitaraḥ yamaja-thomā gālīlīya-kānnā-nagara-nivāsī nithanel sivadeḥ putrāv_anyau dvau śiṣyau caiteṣv_ekatra militeṣu śimon-pitaro 'kathayat | matsyān dhartuṃ yāmi |

२१-३ ततस्ते व्याहरन्तर्हि वयमपि त्वया सार्धं यामः तदा ते बहिर्गताः सन्तः क्षिप्रं नावमारोहन्किंतु तस्यां रजन्यामेकमपि न प्राप्नुवन्।

21-3 tatas_te vy-āharan tarhi vayam_api tvayā sārdhaṃ yāmaḥ tadā te bahir-gatāḥ santaḥ kṣipraṃ nāvam ārohan kiṃ_tu tasyāṃ rajanyām ekam_api na prāpnuvan |

२१-४ पर्भाते सति यीशुस्तटे स्थितवान्। किंतु स यीशुरिति शिष्या ज्ञातुं नाशक्नुवन्।

21-4 par-bhāte sati yīśus_taṭe sthitavān | kiṃ_tu sa yīśur_iti śiṣyā jñātuṃ nāśaknuvan |

२१-५ तदा यीशुरपृच्छत्। हे वत्सा युष्माकं सन्निधौ किंचित्स्वाङ्क्फ्यद्रव्यमास्ते

21-5 tadā yīśur_apṛcchat | he vatsā yuṣmākaṃ san-ni-dhau kiṃ_cit svāfya-dravyam āste?

२१-६ ते ऽवदन्किमपि नास्ति। तदा सोऽवदत्। नौकाया दक्षिणपार्श्वे जालं निक्षिपत ततो लप्स्यध्वे। तस्मात्तैर्निक्षिप्ते जाले मत्स्या एतावन्तो ऽपतन्येन ते जालमकृष्य नोत्तोलयितुं शक्ताः।

21-6 te 'vadan kim_api nāsti | tadā so'vadat | naukāyā dakṣiṇa-pārśve jālaṃ ni-kṣipata tato lapsyadhve | tasmāt tair_ni-kṣipte jāle matsyā etāvanto 'patan yena te jālam_a-kṛṣya nottolayituṃ śaktāḥ |

२१-७ तस्माद्यीशोः प्रियतमशिष्यः पितरायाकथयतेष प्रभुर्भ्वेत्। एष प्रभुरिति वाचं श्रुत्वैव शिमोन्नग्नताहेतोर्मत्स्यधारिण उत्तरीयवस्त्रं परिधाय ह्रदं प्रत्युदलम्फयत्।

21-7 tasmād yīśoḥ priyatama-śiṣyaḥ pitarāyākathayat eṣa pra-bhur_bhvet । eṣa pra-bhur_iti vācaṃ śrutvaiva śimon nagnatā-hetor_matsya-dhāriṇa uttarīya-vastraṃ pari-dhāya hradaṃ praty-ud-alamphayat ।

२१-८ अपरे शिष्या मत्स्यैः सार्धं जालमाकर्षन्तः क्षुद्रनौकां वाहयित्वा कूलमानयन्ते कूलादतिदूरे नासन्द्विशतगस्तेभ्यो दूर आसनित्यनुमीयते।

21-8 a-pare śiṣyā matsyaiḥ sārdhaṃ jālam ā-karṣantaḥ kṣudra-naukāṃ vāhayitvā kūlam_ānayan te kūlād ati-dūre nāsan dvi-śata-gastebhyo dūra āsan ity_anu-mīyate ।

२१-९ तीरं प्राप्तैस्तैस्तत्र प्रज्वलिताग्निस्तदुपरि मत्स्याः पूपाश्च दृष्टाः।

21-9 tīraṃ prāptais_tais_tatra prajvalitāgnis_tad-upari matsyāḥ pūpāś_ca dṛṣṭāḥ ।

२१-१० ततो यीशुरकथयद्यान्मत्स्यानधरत तेषां कतिपयानानयत।

21-10 tato yīśur_akathayad yān matsyān adharata teṣāṃ katipayān ānayata ।

२१-११ अतः शिमोन्पितरः परावृत्य गत्वा बृहद्भिस्त्रिपञ्चाशदधिकशतमत्स्यैः परिपूर्णं तज्जालमाकृष्योदतोलयत्किंत्वेतावद्भिर्मत्स्यैरपि जालं नाच्छिद्यत।

21-11 ataḥ śimon-pitaraḥ parā-vṛtya gatvā bṛhadbhis_tri-pañcāśad-adhika-śata-matsyaiḥ pari-pūrṇaṃ taj-jālam ā-kṛṣyod-atolayat kiṃ_tv_etāv_adbhir_matsyair_api jālaṃ nācchidyata ।

२१-१२ अनन्तरं यीशुस्तानवादीत्यूयमागत्य भुङ्ग्ध्वम्। तदा स एव प्रभुरिति ज्ञातत्वात्त्वं कः इति प्रष्टुं शिष्याणां कस्यापि प्रगल्भता नाभवत्।

21-12 an-antaraṃ yīśus_tān avādīt yūyam_ā-gatya bhuṅgdhvam । tadā sa eva pra-bhur_iti jñātatvāt tvaṃ kaḥ? iti praṣṭuṃ śiṣyāṇāṃ kasyāpi pra-galbhatā nābhavat ।

२१-१३ ततो यीशुरागत्य पूपान्मत्स्यांश्च गृहीत्वा तेभ्यः पर्यवेषयत्।

21-13 tato yīśur_ā-gatya pūpān matsyāṃśca gṛhītvā tebhyaḥ pary_aveṣayat ।

२१-१४ इत्थं श्मशानादुत्थानात्परं यीशुः शिष्येभ्यस्तृतीयवारं दर्शनं दत्तवान्।

21-14 itthaṃ śmaśānād_ut-thānāt paraṃ yīśuḥ śiṣyebhyas_tṛtīya-vāraṃ darśanaṃ dattavān ।

२१-१५ भोजने समाप्ते सति यीशुः शिमोन्पितरं पृष्टवान्। हे यूनसः पुत्र शिमोन्त्वं किमेतेभ्यो ऽधिकं मयि प्रीयसे ततः स उतितवान्सत्यं प्रभो त्वयि प्रीयऽहं तद्भवान्जानाति।

21-15 bhojane sam-āpte sati yīśuḥ śimon-pitaraṃ pṛṣṭavān । he yūnasaḥ putra śimon tvaṃ kim etebhyo 'dhikaṃ mayi prīyase? tataḥ sa utitavān satyaṃ pra-bho tvayi prīyae'haṃ tad bhavān jānāti ।

२१-१६ तदा यीशुरकथयत्तर्हि मम मेषशावकगणं पालय। ततः स द्वितीयवारं पृष्टवान्। हे यूनसः पुत्र शिमोन्त्वं किं मयि प्रीयसे ततः स उक्तवान्सत्यं प्रभो त्वयि प्रीयेऽहं तद्भवान्जानाति।

21-16 tadā yīśur_akathayat tarhi mama meṣa-śāvaka-gaṇaṃ pālaya । tataḥ sa dvitīya-vāraṃ pṛṣṭavān । he yūnasaḥ putra śimon tvaṃ kiṃ mayi prīyase? tataḥ sa uktavān satyaṃ pra-bho tvayi prīye'haṃ tad bhavān jānāti ।

२१-१७ तदा यीशरकथयत्। तर्हि मम मेषगणं पालय। पश्चात्स तृतीयवारं पृष्टवान्। हे यूनसः पुत्र शिमोन्त्वं किं मयि प्रीयसे एतद्वाक्यं तृतीयवारं पृष्टवान्तस्मात्पितरो दुःखितो भूत्वा ऽकथयथे प्रभो भवतः किमप्यगोचरं नास्ति त्वय्यहं प्रीये तद्भवान्जानाति। ततो यीशुरवदत्तर्हि मम मेषगणं पालय।

21-17 tadā yīśar_akathayat । tarhi mama meṣa-gaṇaṃ pālaya । paścāt sa tṛtīya-vāraṃ pṛṣṭavān । he yūnasaḥ putra śimon tvaṃ kiṃ mayi prīyase? etad-vākyaṃ tṛtīya-vāraṃ pṛṣṭavān tasmāt pitaro duḥ-khito bhūtvā 'kathayat he pra-bho bhavataḥ kim_apy_agocaraṃ nāsti tvayy_ahaṃ prīye tad bhavān jānāti । tato yīśur_avadat tarhi mama meṣa-gaṇaṃ pālaya ।

२१-१८ अहं तुभ्यं यथार्थं कथयामि यौवनकाले स्वयं बद्धकटिर्यत्रेच्छा तत्र यातवान्किंत्वितः परं वृद्धे वयसि हस्तं विस्तारयिष्यसि। अन्यजनस्त्वां बद्ध्वा यत्र गन्तुं तवेच्छा न भवति त्वां धृत्वा तत्र नेष्यति।

21-18 ahaṃ tubhyaṃ yathārthaṃ kathayāmi yauvana-kāle svayaṃ baddha-kaṭir_yatrecchā tatra yātavān kiṃ_tv_itaḥ paraṃ vṛddhe vayasi hastaṃ vi-stārayiṣyasi | anya-janas_tvāṃ baddhvā yatra gantuṃ tavecchā na bhavati tvāṃ dhṛtvā tatra neṣyati |

२१-१९ पहलतः कीदृशेन मरणेन स ईश्वरस्य महिमानं प्रकाशयिष्यति तद्बोधयितुं स इति वाक्यं प्रोक्तवान्। इत्यिक्ते सति स तमवोचत्मम पश्चादागच्छ।

21-19 pahalataḥ kīdṛśena maraṇena sa īśvarasya mahimānaṃ pra-kāśayiṣyati tad bodhayituṃ sa iti vākyaṃ proktavān | ity_ikte sati sa tam_avocat mama paścād ā-gaccha |

२१-२० यो जनो रात्रिकाले यीशोर्वक्षोऽवलम्ब्य हे प्रभो को भवन्तं परकरेषु समर्पयिष्यतीति वाक्यं पृष्टवान्तं यीशोः प्रियतमशिष्यं पश्चादागच्छन्तं पितरो मुखं परावर्त्य विलोक्य

21-20 yo jano rātri-kāle yīśor_vakṣo'va-lambya he pra-bho ko bhavantaṃ para-kareṣu sam-arpayiṣyatīti vākyaṃ pṛṣṭavān taṃ yīśoḥ priyatama-śiṣyaṃ paścād ā-gacchantaṃ pitaro mukhaṃ parā-vartya vi-lokya

२१-२१ यीशुं पृष्टवान्। हे प्रभो एतस्य मानवस्य कीदृशी गतिर्भविष्यति

21-21 yīśuṃ pṛṣṭavān | he pra-bho etasya mānavasya kīdṛśī gatir_bhaviṣyati?

२१-२२ स प्रत्यवदत्मम पुनरागमनपर्यन्तं यदि तं स्थापयितुमिच्छामि तत्र तव किं

21-22 sa praty_avadat mama punar_āgamana-paryantaṃ yadi taṃ sthāpayitum icchāmi tatra tava kiṃ?

२१-२३ त्वं मम पश्चादागच्छ। तस्मात्स शिष्यो न मरिष्यतीति भ्रातृगणमध्ये किंवदन्ती जाता किंतु स न मरिष्यतीति वाक्यं यीशुर्नावदत्केवलं मम पुनरागमनपर्यन्तं यदि तं स्थापयितुमिच्छामि तत्र तव किं इति वाक्यमुक्तवान्।

21-23 tvaṃ mama paścād ā-gaccha | tasmāt sa śiṣyo na mariṣyatīti bhrātṛ-gaṇa-madhye kiṃ-vadantī jātā kiṃ_tu sa na mariṣyatīti vākyaṃ yīśur_nāvadat kevalaṃ mama punar_āgamana-paryantaṃ yadi taṃ sthāpayitum icchāmi tatra tava kiṃ? iti vākyam uktavān |

२१-२४ यो जनो एतानि सर्वाणि लिखितवानत्र साक्ष्यं च दत्तवान्स एव स शिष्यः। तस्य साक्ष्यं प्रमाणमिति वयं जानीमः।

21-24 yo jano etāni sarvāṇi likhitavān atra sākṣyaṃ ca dattavān sa eva sa śiṣyaḥ | tasya sākṣyaṃ pramāṇam_iti vayaṃ jānīmaḥ |

२१-२५ यीशुरेतेभ्यो ऽपराण्यपि बहूनि कर्माणि कृतवान्तानि सर्वाणि यद्येकैकं कृत्वा लिख्यन्ते तर्हि ग्रन्था एतावन्तो भवन्ति तेषां धारणे पृथिव्यां स्थानं न भवति। इति॥

21-25 yīśur_etebhyo 'parāṇy_api bahūni karmāṇi kṛtavān tāni sarvāṇi yady_ekaikaṃ kṛtvā likhyante tarhi granthā etāvanto bhavanti teṣāṃ dhāraṇe pṛthivyāṃ sthānaṃ na bhavati | iti ||

http://www.sanskritweb.net